बुदे॥गडुःपृष्ठगुडेकुंजेगडोमीनांतराययोः॥९॥गुडःस्याद्गोलके
हस्तिसन्नादेक्षुविकारयोः॥गुडास्नुत्यांचकथितागुडिकायांच
योषिति॥१०॥गोंडःपामरजातौच हूहूनाम्नोचतद्भृति॥चंडोनाति
स्निग्धवृक्षेयमकिंकरदैत्ययोः॥११॥चंडाधनहरीशंखपुष्पोस्त्रि
तिकोपने॥चंडीकात्यायनीदेव्यांहिंस्रकोपनयोषितोः॥१२॥ती
व्रेपिचूडावडभीशिखायांबाहुभूषणे॥चोडःप्रावरणेभूम्निदेश
भेदेजडास्त्रियाम्॥१३॥शूकशिंब्यांहिमग्रस्तमूकाप्रज्ञेषुतुस्त्रिषु॥
ताडस्तुताडनेयोषेसुष्टिमेयतृणादिषु॥१४॥ताडीपत्रद्रुमेचाथ
दंडोऽस्त्रीलगुडेपुमान्॥व्यूहभेदेप्रकांडेऽश्वेकोणमंथानयोर
पि॥१५॥सैन्येकालेमानभेदेचंडांशोःपारिपार्श्विके॥दमयमेऽभि
मानेचनाडीनालेव्रणांतरे॥१६॥शिरायांगंडदूर्वायांचर्मायांकु
हनस्यच॥तथाषट्क्षणकालेपिनीडंस्थानकुलाययोः॥१७॥पिं
डःषंडेधियिस्त्रीस्यात्पांडुर्नानृपतौसिते॥पिंडोबालेबलेसांद्रे
देहागारैकदेशयोः॥१८॥देहमात्रेनिवापेचगोलसिक्थकयोर

पि॥ओडुपुष्पेचपुंसिस्यात्क्लीबंमाजीवनासयोः॥१९॥पिंडीतुपिंडीतगरेऽलाबुरवर्जूरभेदयोः॥पीडाकृपाशिरोमालाऽपमर्दसरलद्रुषु॥२०॥भांडंपात्रेवणिग्द्रव्येधनेभूषाऽस्त्रभूषयोः॥मंडःपेचांगुलेशाकभेदेक्लीबंतुमस्तकेनि॥२१॥आमलक्यांस्त्रियांमंडाऽथाऽस्त्रियांसारपिच्छयोः॥मुंडोदैत्यांतरेराहुग्रहेनामुंडितेत्रिषु॥२२॥मुंडामुंडीरकायांस्यात्स्त्रियामस्त्रीतुमूर्द्धनि॥रंडामूषिकपर्ण्यांचविधवायांचयोषिति॥२३॥रोडःक्षोदक्षमेपुंसितद्वतुवाच्यलिंगकः॥रंडातुपांसुलायांस्त्रीभृत्यासुहस्तादिवर्जितेषु॥२४॥व्याडोहिंस्रपशौसर्पेभृंडापानगृहेमृता॥अप्यंबुहस्तिनीवेश्याहस्तिहस्तकरासुच॥२५॥शौंडोमत्तेचधिरव्यातःपिप्पल्यांचभवेत्स्त्रियां॥षंडंपद्मादिसंघातेनस्त्रीस्याद्भोपतौपुमान्॥२६॥ ॥डम्बि॥ ॥करंडोमधुकोशासिकारंडेषुदलादके॥कूष्मांडेस्त्रियांस्त्रीपुंसिकर्कारौचगणांतरे॥२७॥भृणांतरेऽथकोदंडेचापेनानीदृदंतरे॥भुज्यथोगारुडंक्ष्वेडमंत्रेमरकतेपिच॥२८॥तरंडोबडिशीसूत्रबद्धकाष्ठादिकेप्लवे॥नौकायामपिनस्त्रीस्यात्तित्तिडीडिंबचिंचयोः॥२९द्राविडोदेशभिज्जातेसंख्याभिद्वेधमुख्ययोः॥निर्गुंडीनीलशेफाल्यांसिंधुवारद्रुमेपिच॥३०॥प्रचंडोदुर्वहेभ्वेतकरवीरेप्रतापिनि॥प्रकांडोनस्त्रीविटपेमूलशारबांतरेतरोः॥३१॥शस्तेपिचंडउद्रेपशोरवयवेपुमान्॥पूत्यंडोगंधकीटेपितथाजंतंतरेपुमान्॥३२॥वरंडोप्यंतरेवेदीसमूहमुरवरोगयोः॥वाकुंडीद्वारपिंड्यांस्त्रीफणिनांराजकेपुमान्॥३३॥नस्त्रियांसेकपात्रेचमलेक्ष्णःश्रवणस्यच॥भेरुंडादेवताभेदयक्षिण्यंतरयोःस्त्रियां॥३४॥भयानकेवाच्यवत्स्याच्चार्तंडःक्रोडसूर्ययोः॥मारुंडोऽडेभुजंगीनांमार्गेगोमयमंडले॥३५॥वरंडासारिकावर्त्तिशास्त्रभेदेचयोषिति॥वितंडावादभेदेस्यात्कुत्सायांशाकशिलाद्वये॥३६॥करवीर्यामपिस्त्रीस्याच्छिखंडोबर्हचूडयोः॥शरंडस्तुपुमान्धूर्त्तेशरंडे

भूषणांतरे॥३७॥ ॥इचतुः॥ ॥अपोगंडस्कबलिभे
विकलांगेशिशावपि॥अतिगंडोयोगभेदेवृद्धद्वंडेतुवाच्यवत्
॥३८॥चक्रवाडोऽद्रिभेदेस्याच्चक्रवाडंतुमंडले॥जलरुंडोज-
लावर्तेपयोरेणौक्षुजंगमे॥३९॥देवताडःमेंढ्रिकेयेजीमूतेचहु
ताशने॥अथवातहुडावात्याराजशोणितयोरपि॥४०॥पृक्किल
स्फोटिकायांचवामायामपियोषिति॥ ॥इतिडांतवर्गः॥ ॥
५२७॥ ॥ढोदक्षायांपुमानुक्तःशृनितस्यचलांगुले॥ ॥
दढि॥ ॥गूढंरहसिगुल्फेचनद्वयोःसंवृतेत्रिषु॥१॥दृढंस्थू
लेनितांतेचप्रगाढेबलवत्यपि॥माढिःस्त्रीपत्रपंक्तौचदेन्यस्या
पिप्रकाशने॥२॥मूढस्तब्धतमिस्रेचबालेरादास्त्रीरहस्यशोभयोः॥रू
ढंजातेप्रसिद्धेचबादंदृढमतिज्ञयोः॥३॥व्यूढःसंहतविन्यस्तपृ
थुसंज्ञाभिधेयवत्॥वोढेनाभारिकेसूतेशंढःस्यात्सुंसिगोपतौ॥
४॥आरूढांडेवर्षवरेतृतीयाप्रकृतावपि॥षोढातितिक्षासंयुक्ते
शक्तेचाप्यभिधेयवत्॥५॥ ॥णत्रि॥ ॥अध्यूढाकृतसा
पत्न्यनार्यामध्यूढईश्वरे॥आषाढोग्रतिनांदंडेमासेमलयपर्व
तेे॥६॥स्त्रीपूर्णिमायामालीढंपादन्यासेशितेत्रिषु॥उद्गूढंऊढे-
स्थूलेस्यादुपोढोनिकटोद्यतयोः॥७॥प्रगाढःकृच्छ्रदृढयोःप्रमी-
ढोमूर्च्छितेघने॥प्ररूढोजातरेबद्धमूलेवारूढइत्ययं॥८॥वरूथं
चलेकपादेऽग्नेःपंजरेशंबलेपिच॥विरूढोंकुरितेजातेविगूढो
गर्हितेपिच॥९॥गुसेपित्रिषुसंरूढःमोदेचांकुरितेत्रिषु॥समू
ढःपुंजितेसुग्नेसद्योजातेनुपप्लुते॥१०॥ ॥दचतुः॥ ॥
अध्यारूढंसमारूढेऽभ्यधिकेचाभिधेयवत्॥रवद्वारूढःश्रि
तेरवद्वामविनीतेचवाच्यवत्॥११॥प्रत्यालीढंतुचरणान्यासभे
देशितेत्रिषु॥ ॥इतिढांतवर्गः॥ ॥५३१॥ ॥
णोकं॥ ॥णःपुमान्निंदुदेवेस्याद्गुणेगुणवर्जिते॥पानीय
मिलयेपीतिकेचिदूचुर्विपश्चितः॥१॥ ॥णद्वि॥ ॥

अणुर्व्रीहिविशेषःस्यात्पुंस्त्रिसूक्ष्माभिधेयवत्॥ अणिराणिवदक्षाग्रकीलाश्रिसीमसूक्ष्मयोः॥२॥ उष्णोग्रीष्मेपुमान्दक्षाशीतयोरन्यलिंगकः॥ ऊर्णामेषादिलोम्निस्यादंतरावर्तकेभ्रुवोः॥३॥ कर्णःपृथाज्येष्ठसूतेसूक्ष्मवर्णालोभ्रुनावपि॥ क्षणःपर्वोत्सवव्यापारेषुमानेऽप्यनेहसः॥४॥ कणाजीरककुंभीरमक्षिकापिप्पलीषुच॥ कणोऽतिसूक्ष्मेधान्यांशेकाणःकाकेकचक्षुषोः॥५॥ कीर्णोदन्तेचविक्षिप्तेहींसितेप्यभिधेयवत्॥ कुणिस्तब्धकवृक्षेनाकुकरेत्वभिधेयवत्॥६॥ कृष्णःसत्यवतीपुत्रेवायसेकेशवेऽर्जुने॥ कृष्णास्याद्द्रौपदीनीलीकणाद्राक्षासुरायोषिति॥७॥ मेचकेवाच्यलिंगःस्यात्स्त्रीबेमरिचलोहयोः॥ कोणोवाद्यप्रभेदेस्याद्वीणादीनांचवादने॥८॥ एकदेशेगृहादीनामश्रौचलगुडेपिच॥ गणःप्रथमसंख्यायांघेचंडासैन्यप्रभेदयोः॥९॥ गुणोमौर्व्यांप्रधानेरूपादौसूदइंद्रिये॥ त्यागशौर्यादिसत्वादिसंध्याद्यावृत्तिरज्जुषु॥१०॥ शुक्लादावपिवदयांचगेष्णुर्नागायनेनटे॥ घ्राणंक्लीबंनासिकायांघ्रातेस्याद्ब्यलिंगकम्॥११॥ घृणाजुगुप्साकृपयोरथचूर्णंकपर्दके॥ चूर्णोधूलौक्षारभेदेचूर्णानिवासयुक्तिषु॥१२॥ जर्णुश्चंद्रेचवृक्षेचजिष्णुर्नावासवेऽर्जुने॥ जित्वरेवाच्यवज्जीर्णंपरिपक्वपुराणयोः॥१३॥ ज्यूणिःक्रमुकभेदेपिदुष्टदेवश्रुतौस्त्रियाम्॥ त्राणंतुत्रायमाणायांरक्षणेरक्षितेत्रिषु॥१४॥ तीक्ष्णंसमुद्रलवणेविषलोहाजिमुष्ककेक्लीबंजवाग्रजेपुंसिनिर्मात्सर्यत्यागिनोस्त्रिषु॥१५॥ तूर्णंनील्यांनिषंगेनातृष्णास्यात्तर्षलिप्सयोः॥ दीर्णंविदारितेभीतेद्रुर्णंचापेऽलिनिद्रुणः॥१६॥ द्रुण्यंबुद्रोणीकच्छप्योर्देष्णुर्दातरिदुर्गमे॥ द्रोणोऽस्त्रियामादकेस्यादादवापचतुष्टये॥१७॥ पुमान्क्षीपीपतोदग्धकालेस्त्रीनीवृदंतरे॥ तथाकाष्ठांबुवाहिन्योर्गवादिन्यामपीष्यते॥१८॥ पणोवराटमानेस्यान्मूल्यकार्षापणेग्रहे॥ क्रय्यशाका

ष्टिकाद्यूतव्यवहारेभृतौधने॥१९॥पर्णंपत्रेकिंशुकेनापार्ष्णिः स्यादुन्मदस्त्रियां॥स्त्रियांद्वयोःसैन्यपृष्ठेपादग्रंथ्यधरेपिच॥२०॥ प्राणोस्पन्मारुतेबोले काव्यजीवेऽनिलेऽबले॥पुल्लिंगःपूरितेवाच्य लिंगःपुंभूम्निचासकृषु॥२१॥पूर्णःशक्तेसमग्रेनापूरितेत्वभिधेयव त्॥फाणिर्गुडेकरंवेचस्त्रियांवाणीतुयोषिति॥२२॥व्यूतावपि सरस्वत्यांभ्रूणःस्त्रीगर्भडिंभयोः॥मणिःस्त्रीपुंसयोरब्धिजा तोमुक्तादिकेपिच॥२३॥कंठदेशेस्तनेजायालिंगाग्रेऽलिंजरेपिच॥ मोणःशुक्लफलेनक्रमक्षिकाऽह्निकरंडयोः॥२४॥रणःकोणेक्व णेपुंसिसमरेपुन्नपुंसके॥रेणुःस्त्रीपुंसयोर्धूलौपुल्लिंगःपर्पटेपु नः॥२५॥वर्णोद्विजादिशुक्लादियशोगुणकथासुच॥स्तुतौनान स्त्रियांभेदरूपाक्षरविलेपने॥२६॥बाणःस्याज्झोस्तनेदैत्य भेदेकेवलकांडयोः॥वाणातुवाणमूलेस्त्रीनीलझिंट्यांपुनर्द्वयोः ॥२७॥वीणाविधुतिवल्लक्यांवृष्णिःपांडवचंद्रयोः॥विधुनाया दवेमेषेवेणीकेशस्यबंधने॥२८॥नद्यादेरंतरेदेवतालेवेणुर्नृ पांतरे॥त्वक्सारेपिचपुंसिस्याच्छाणोमासचतुष्टये॥२९॥लौहा दीनांचनिष्कृष्टेशाणीप्रावरणांतरे॥श्राणांपक्वेयवाग्वांस्त्रीशी र्णतनुविशीर्णयोः॥३०॥श्रेणिःस्त्रीपुंसयोःपंक्तौसमानशिल्पि संहतौ॥शोणःरुशानोश्योनाकेलोहितार्श्वेनदेपुमान्॥३१॥ त्रिषुकोकनदच्छायेस्थाणुःकीलेहरेपुमान्॥अस्त्रीध्रुवेऽथ स्थूणास्यात्सूर्म्यांस्तंभेगृहस्यच॥३२॥ ॥णत्रि॥ ॥ अरुणोऽव्यक्तरागेऽर्केसंध्यारागेऽर्कसारथौ॥निःशब्देकपिले कुष्ठभेदेनागुणिनित्रिषु॥३३॥अरुणाऽतिविषाश्यामामंजिष्ठात्रि वृतासुच॥अरणिर्वह्निमंथेनाद्वयोर्निर्मथ्यदारुणि॥३४॥अभी क्ष्णंतुभृशनित्येतद्यक्तक्रिययोस्त्रिषु॥इंद्राणीकरणंस्त्रीणां पौलोमासिंधुवारयोः॥३५॥ईरिणंतूषरेभून्येपीक्षणंदर्शनेद र्शि॥ऊषणंमरिचेक्लीबंकणायामुषणास्त्रियाम्॥३६॥एषणी

व्रणमार्गानुसारिण्यांचतुलाभिदि॥ करुणस्करसेदक्षेकृपायां करुणामता॥३७॥ कर्तृणंतृणभित्तृभ्यः करणंहेतुकर्मणोः॥ वणिजादोहस्तलेपेनृत्यगीतप्रभेदयोः॥३८॥ क्रियाभेदेंद्रियक्षेत्र कायसंवेशनेषुच॥ कायस्थेसाधनेक्लीबेपुंसिभूद्राविशोःस्मृते॥ ॥३९॥ कल्याणमक्षयस्वर्गेमंगलेपिनपुंसके॥ कंकणंकरभूषायांसूत्रमंडनयोरपि॥४०॥ करेणुर्गजयोषायांस्त्रियांपुंसिमतंगजे॥ कार्मणंमंत्रतंत्रादियोजनेकर्मदेपिच॥४१॥ कार्षिकीपणतुर्यांशेमानदंडेचदृश्यते॥ कृष्णलैकवराद्योःस्यादुन्मानस्यांशकेपिच॥४२॥ कारणंकरणेहेतुवधयोश्चनपुंसकम्॥ स्त्रीयातनायांकुर्वाणोभृत्यकारकयोस्त्रिषु॥४३॥ कृपाणःस्वर्णेच्छुरिकाकर्तर्योरपियोषिति॥ कृपणस्तुकमोपुंसिमंदकुत्सितयोस्त्रिषु॥४४॥ क्षेपणंप्रेरणेनौकादंडजालभिदोःस्त्रियां॥ ग्रहणंस्वीकारादरकरोपरागोपलब्धिबंदिषु॥४५॥ स्याद्ग्रामणीःप्रधानेधिपतावृषिभेदेपिनापितेपुंसि॥ ग्रामीणानीलिकायांस्त्रीग्रामोद्भूतेःभिधेयवत्॥४६॥ गोकर्णोऽश्वतरेसर्पसारंगेचगणांतरे॥ अंगुष्ठानामिकोन्मानेगोकर्णामूर्विकौषधौ॥४७॥ चरणोऽस्त्रीबल्कुचादौमूलेगोत्रेपदेपिच॥ भ्रमणोभक्षणेचापिनपुंसकउदाहृतः॥४८॥ जरणंजीरकेजार्जाहिंगुसोवर्चलेपिच॥ तरुणंकुब्जपुष्पेनारुबुकेयूनितुत्रिषु॥४९॥ तरणिर्द्रुमणोपुंसिकुमारीनोकयोःस्त्रियाम्॥ दक्षिणोदक्षिणोद्भूतसरलच्छंदवर्त्तिषु॥५०॥ आगमेत्रिषुयज्ञादिविधिदानेदिशिस्त्रियाम्॥ द्रविणंनद्योर्वित्तेकांचनेचपराक्रमे॥५१॥ दारुणोरसभेदेनात्रिषुतुस्याद्भयावहे॥ द्रुघणोमुद्गरेपिस्यात्द्रुहिणेचपरश्वधे॥५२॥ दुर्वर्णोत्रिषुसदृर्णोक्लीबमैलेयरूप्ययोः॥ दोर्वाणंवृषपर्णेस्याद्दूर्वायांक्षरसेपिच॥५३॥ धर्मणस्तुपुमान्वृक्षभेदसर्पप्रभेदयोः॥ धरणंमानभेदेपिधारणेधरणीभुवि॥५४॥ धर्षणंस्यात्परिभवेरतेऽ

सत्यांतुधर्षिणि॥ धरुणःसम्मतेनीरेस्वर्लोकेपरमेष्ठिनि॥५५॥
धारणीनाडिकायांस्याद्बुधोक्तंमंत्रभिद्यपि॥ धारणांगेचयोगस्य
नपुंसिस्याद्विधारणे॥५६॥धिषणस्त्रिदशाचार्येधिषणाधिषि
योषिति॥ निःश्रेणिरधिरोहिण्यांरवर्जूरीपादपेस्त्रियाम्॥५७॥
निर्याणंवारणापांगदेशेमोक्षेध्वनिर्गमे॥ निर्माणंनिर्मितौसारे-
समंजसेनपुंसकम्॥५८॥निर्वाणमस्तंगमनेनिर्वृतौगजम
ज्जने॥संगमेप्यपवर्गेचप्रवणोनाचतुष्पथे॥५९॥क्रमनिम्नमही
भागोदरप्रच्छेषुचत्रिषु॥प्रघणास्तास्रकुंसेस्यादलिंदेलोहमु
द्गरे॥६०॥प्रमाणंनित्यमर्यादाशास्त्रेषुसत्यवादिनि॥इयत्तायांच
हेतौचक्लीबंकत्वेप्रमातरि॥६१॥पत्रोर्णंधौतकौशेयेक्लीबंस्या
च्छोणकेपुमान्॥पक्षिणीपूर्णिमायांस्याद्विहंग्यांशाकिनीभिदि
॥६२॥आगामिचर्तमानाह्नयुक्तरात्रावपिस्त्रियाम्॥प्रचेपिःस्त्री
कुथावेण्योःपुराणंपंचलक्षणे॥६३॥पणेपुंसित्रिषुप्रत्नेपूरणःपू
रकेत्रिषु॥क्लीबंपिंडप्रभेदेचपूरणीशाल्मलिद्रुमे॥६४॥पदारंभक
सूत्रेषुप्रोक्षणंसेचनेवधे॥वरुणस्तरुभेदेऽस्तुपश्चिमाशाम्बुना
थपि॥६५॥वरुणस्तुपुमान्तिक्तशाकप्राकारयोरपि॥क्लीबंक
न्यादिवरणेवेष्टनेस्त्रीनदीभिदि॥६६॥वारणंप्रतिषेधेस्याद्वार
णस्तुमतंगजे॥ब्राह्मणंब्रह्मसंघातेवेदभागेनपुंसकम्॥६७॥
भूमिदेवेतुपुल्लिंगःस्फुंजिकापृक्कयोःस्त्रियाम्॥ वारुणीगंडदूर्वा
योंप्रतीचीसुरयोरपि॥६८॥भरणीघोषकेभ्रक्षेभरणंवेतनेभृ
तौ॥भ्रमणीकारुंडिकायांक्रीडाद्व्यायामधीशितुः॥६९॥भीषणो
रसेसल्लक्यांनागदेदारुणेत्रिषु॥मसृणोऽकर्कशेस्निग्धेत्रिषूमा
यांतुयोषिति॥७०॥मत्कुणोनिर्विषाणेभेनिःश्मश्रुपुरुषेपिच
॥उदूंशेनालिकेरेचमार्गणोयाचकेशरे॥७१॥याञ्चान्वेषणयोः
क्लीबंयंत्रणंरक्षणेस्मृतम्॥बंधनेस्यान्नियमनेरवणःशब्दने
स्वरे॥७२॥रमणंपत्तलमूलेनार्योस्त्रीनाथवेश्मरे॥रोषणःपार

देहेमघर्षणोपलयोःपुमान्॥७३॥क्रोधनेवाच्यलिंगःस्याद्द्रोहिणीकंठरुग्भिदि॥तडित्कदुंभरासोमवल्केषुलोहितागवोः॥७४॥लवणंसैंधवादौनासिंधुरक्षोभिदोरसे॥तद्युक्तेवाच्यलिंगःस्यान्नदीभेदद्विषोःस्त्रियाम्॥७५॥लक्षणंनाम्निचिन्हेचसारस्यांलक्षणाक्वचित्॥लक्ष्मणात्वोषधीभेदेसारस्यामपियोषिति॥७६॥रामभ्रातरिपुंसिस्यात्सश्रीकेचाभिधेयवत्॥विषाणीक्षीरकाकोल्यामजशृंग्यांचयोषिति॥७७॥कुष्ठनामौषधेक्लीबंपशुशृंगेभदंतयोः॥विपणिःपण्यवीथ्यांचभवेदापणपण्ययोः॥७८॥शरणंगृहरक्षित्रोर्वधेरक्षणयोरपि॥श्रवणंश्रुतौकर्णेनक्षत्रेचनपुंसकम्॥७९॥श्रमणोयतिभेदेनानिंद्यजीविनितुत्रिषु॥स्त्रियांसुदर्शनामास्योसुंडीरीशबरीभिदोः॥८०॥श्रावणोमासिपाषंडेदध्न्यांश्रावणास्त्रियाम्॥शिंघाणंकाचपात्रेचलोहनासिकयोर्मले॥८१॥श्रीपर्णीकाश्मरीकुंभ्योःक्लीबंपद्माग्निमंथयोः॥संकीर्णेनिचितेपिस्यादशुद्धेचापिभेद्यवत्॥८२॥सरणिःपंक्तौमार्गेचसारणोराक्षसांतरे॥रुग्भेदेनाम्रसारण्यांस्वल्पनद्यांचसारणी॥८३॥सृणेणिःकरमर्देस्याद्विष्णुसुग्रीववैद्ययोः॥सुवर्णोनास्वर्णकर्षेसुवर्णानुभरांतरे॥८४॥श्रीकृष्णागुरुणिक्लीबेकांचनेहरिचंदने॥सुपर्णःस्वर्णचूडेचगरुडेकृतमालके॥८५॥सुपर्णीकमलिन्यांचवैनतेयस्यमातरि॥हरेणुर्नासतीलेरुभेरेणुकाकुलयोषितोः॥८६॥हरणंयौतकादीनांद्रव्येभुंजेहतावपि॥हरिणःपुंसिसारंगेविषदेत्वभिधेयवत्॥८७॥हरिणीहरितायांचनारीभिद्वृत्तभेदयोः॥सवर्णप्रतिमायांचहर्षणोक्षिरुगंतरे॥८८॥हर्षकेयोगभेदेचश्रान्तदेवेपिचक्वचित्॥हिरण्यंरेतसिस्वर्णेधनरोटेचनपुंसकम्॥८९॥ णच्चतुः अंगारिणीहसंत्यांचभास्करत्यक्तदिश्यति॥अथर्वणिर्नाऽथर्वज्ञब्राह्मणेचपुरोधसि॥९०॥आतर्पणंप्रीणयेस्यान्मंगलालेे

पनेपिच॥ आरोहणंस्यात्सोपानेसमारोहेप्ररोहणे॥९१॥ उत्क्षेपणंतुव्यजनेधान्यमर्दनवस्त्रनि॥स्यादुद्धरणमुद्धारवांतान्नोन्मूषलेष्वपि॥९२॥ कार्षापणोऽस्त्रीकार्षिकेपणषोडशकेपिच॥अथकामगुणोरागेविषयाभोगयोरपि॥९३॥ चीर्णपर्णंतुनिंबेपिरवर्जूरीभूरुहेपुमान्॥चूडामणिःशिरोरत्नेकाकचिञ्चाफलेपुमान्॥९४॥ जुहुवाणोऽपिचाध्वर्यावपिस्याज्जातवेदसि॥तंडुवीणःकीटमात्रेबर्बरेतंडुलोदके॥९५॥ त्रायमाणावार्षिकेस्त्रीरक्ष्यमाणेऽभिधेयवत्॥तैलपर्णीमलयजेश्रीवासेसिल्हकेपिच॥९६॥ दाक्षायणीत्वपर्णायामश्विन्याद्युडुषुस्त्रियाम्॥अथदेवमणिर्भर्गेऽश्वावर्तेकोरुकेपिच॥९७॥ नारायणोच्युतेभीरुगोर्योतीनारायणीमता॥अथोनिगरणंकूबेंभोजनेस्याद्गलेपुमान्॥९८॥अथनिःसरणंमुक्त्यूपायमोक्षेषुनिर्गमे॥स्यान्निस्तरणमुपायेनिस्तारेतरणेपिच॥९९॥निरूपणंस्यादालोकेविचारेचनिदर्शने॥पर्पटीणश्चपर्णस्यशिरायांद्यूतकंबले॥१००॥पर्णचूर्णरसेपिस्यात्पर्पटीणंतुपर्वणि॥प्रवारणनिषेधेस्यात्काम्यदानेचनद्वयोः॥१॥परीरणःस्यात्कमठेदंडेचपट्टशाटके॥परायणमभीष्टेस्यात्तत्पराश्रययोरपि॥२॥परवाणिःपुमान्धर्माध्यक्षवत्सरयोरपि॥परायणंसमासंगकार्त्स्न्येपारगतावपि॥३॥पीलुपर्णीविंविकायांसूर्वायामौषधीभिदि॥अथपुष्करिणीचेभ्यांसराजिन्यांजलाशये॥४॥मधुपर्णीतुगंभार्यांनीलीसंज्ञौषधावपि॥मीनीस्त्रीणस्त्रपुल्लिंगोडुडुरांम्रेचरंजने॥५॥रक्तरेणुस्तुसिंदूरपलाशकोरकेपुमान्॥रागचूर्णःपुमान्दंतधावनेमकरध्वजे॥६॥रेरिह्राणस्तुपुंसिस्यान्महादेवंबरेपिच॥लंबकर्णःस्मृतोकोढपादपेच्छगलेपिच॥७॥विदारणंविडंबेचभेदेकूबंरणेद्वयोः॥अथवैतरणीनद्यांप्रेतानांयातुमातरि॥८॥शरवाणिःशरसुरवेपापिष्ठेशरजीविनि॥पुमानथोशिरवरिणारसालावृक्षभेदयोः॥९॥नारीरत्नेमल्लिकायांरोमाव

ल्यामपिस्त्रियाम्॥अथसंसरणंक्लीबमसंबाधचमूगतौ॥१०॥धर्मापथेचसंसारेरणारंभेचकुत्रचित्॥समीरणःस्यात्यवनेपथिकेचफणिज्जके॥११॥हस्तिकर्णश्चोरुबूकेपलाशगणभेदयोः॥ ॥ ॥णपंच॥ ॥अवग्रहणमित्येतत्प्रतिरोधेप्यनादरे॥१२॥अवतारणंभूतादिग्रहेवस्त्रांचलेर्चने॥प्रविदारणमाख्यातंसंपरायेऽवदारणे॥१३॥परिभाषायांसनिंदोपालंभनेनियमेपिच॥उक्तोमत्तवारणस्तत्प्रकीर्णकटकुंजरे॥१४॥क्लीबंग्रासादवीथीनांकुंडवृक्षवृतावपि॥मंडूकपर्णीमंजिष्ठाब्राह्मण्योर्नातुशोणके॥१५॥रोमहर्षणंरोमांचेनासूतेचबिभीतके॥वातरायणउन्मत्तेनिष्प्रयोजनपूरुषे॥१६॥कांडेचपरपत्रेचकूटेचपरसंक्रमे॥ ॥णषट्॥ ॥दोहदलक्षणमुक्तंवयःसंधौचगर्भेच॥१७॥यौवनलक्षणमप्यारव्यातंलावण्यकुचयोश्च ॥ ॥ ॥इतिर्णांतवर्गः॥ ॥६४९॥ ॥तेकं॥ ॥तश्चौरामृतपुच्छेषुक्रोडेम्लेछेचकुत्रचित्॥अनुमोंस्तरणेपुण्येकथितःशब्दवेदिभिः॥१॥ ॥तद्वि॥ ॥अस्तंक्षिप्तेप्यवसितेत्रिषुनापश्चिमाचले॥अंतंस्वरूपेनाशेनानस्त्रीशेषेंऽतिकेत्रिषु॥२॥आर्त्तिःपीडाधनुष्कोट्योःस्त्रियांलब्धेस्वसत्तयोः॥आप्तिःस्त्रीयोगसंप्राप्योरितंस्मृतेगतेत्रिषु॥३॥इतिर्दिग्वेप्रवासेतिदृष्ट्यादिषट्सकचस्त्रियाम्॥उक्तमेकाक्षरच्छंदस्यक्तंस्याद्भाषितेत्रिषु॥४॥ऊतिःस्त्रीरक्षणेसूनावृतिःकल्याणवर्त्मनोः॥जुगुप्सास्पर्धयोस्त्रीस्याद्घृतमुच्छशिलाजले॥५॥सत्येदीसेपूजितेस्याद्धृतिश्चवर्षादिषट्सकच॥आर्तवेभासिचपुमानेतःकर्बुरआगते॥६॥क्षत्ताशूद्राक्षत्रियजेप्रतीहारेचसारथौ॥भुजिस्थातनयेपिस्यान्निशुक्रवेधसोःपुमान्॥७॥कर्त्तातुकारकेवाच्यलिंगोनापरमेष्ठिनि॥कृतुर्यज्ञेमुनौपुंसिकांतिःशोभेच्छयोःस्त्रियाम्॥८॥कांतानायांप्रियंगौस्त्रीशोभनेत्रिषुनाधवे॥लोहेचचंद्रसूर्यायःपर्या

यांतःशिलास्रुचः॥९॥क्षितिर्निवासेमेदिन्यांकालभेदेक्षयेस्त्रियाम्॥कीर्त्तिःप्रसादयशसोर्योषित्कुंतोगवेधुकायांस्यात्॥१०॥प्रासायुधेचकुंतीयुग्गुलुपृथयोश्वशालुक्याम्॥कृंतयुगेऽलमर्थेरयाद्विहितेहिंसितेत्रिषु॥११॥कृत्तंतुवेष्टितेच्छिन्नेकृतिःकारणहिंसयोः॥कृत्तिश्चर्मत्वचोर्भूर्जेकृत्तिकायांह्यस्त्रियाम्॥१२॥केतुर्नारुकृपताकाविग्रहोत्पातेषुलक्ष्मणि॥गर्त्तस्त्रिगर्तभेदेस्याद्वटेचक्रुकुंदरे॥१३॥ग्रस्तंग्रासीकृतेपिस्यात्सुसवर्णापदेपिच॥गतिःस्त्रीमार्गदशयोर्ज्ञानेयात्राप्युपाययोः॥१४॥नाडीव्रणसरण्योश्चगर्तंविज्ञातयातयोः॥गातुर्नाकोकिलेभृंगेगंधर्वेत्रिषुरोषणे॥१५॥गीतिश्छंदसिगानेस्त्रीगीतंशब्दितगानयोः॥गुप्तिरूध्वकरस्थानेकारागारेचरक्षणे॥१६॥गुप्तंस्याद्रक्षितेगूढेघातःकांडप्रहारयोः॥घृतमाज्येजलेक्लीबंप्रदीप्तेत्वभिधेयवत्॥१७॥चित्तंछन्नेत्रिषुचिताचित्यायांसंहतौस्त्रियाम्॥चितिश्चित्यादृंदयोःस्त्रीजातंयक्तोद्यजन्मसु॥१८॥क्लीबंत्रिलिंगमुत्पन्नेजातिःस्त्रीगोत्रजन्मनोः॥अश्मंतिकामलक्योश्चसामान्यच्छंदसोरपि॥१९॥जातीफलेचमालत्यांज्ञातिस्तातसगोत्रयोः॥पुमानथतंत्र्यासेविस्तृतेचत्रिलिंगकम्॥२०॥क्लीबंवीणादिवाद्येस्यात्पुल्लिंगस्तुसमीरणे॥तातेनुकंप्येजनकेतिक्तोरससकंधयोः॥२१॥तिक्तातुकटुरोहिण्यांपर्पटेतुनपुंसकम्॥तूस्तंरेणौचविख्यातेजटायांचनपुंसकम्॥२२॥त्रेतायुगेऽग्निथितयेदत्तंविश्राणितेऽर्चिते॥दंतोऽद्रिकटकेकुंजेदशनेऽथौषधौस्त्रियाम्॥२३॥दांतस्तुदमितेपिस्यात्तपःक्लेशासहेत्रिषु॥दितिर्दैत्यजनन्यांचखंडनेपिचयोषिति॥२४॥दीप्तंनिर्भासितेदग्धेज्वलितेऽथद्रुतंत्रिषु॥शाग्रेधिलीनेविद्वाणेधृतिःस्त्रीरश्मिशोभयोः॥२५॥दृतिश्चर्मपुटेमत्स्येनाधातुर्नेंद्रियेत्रिषु॥शब्दयोनिर्महाभूततद्गुणेषुरसादिषु॥२६॥मनःशिलादोश्लेष्मादोविशेषाद्वैरिकेस्त्रिच॥धातारण्यगर्भेनापालकेत्रिषयोधु

तम्॥२७॥ त्यक्तेथितंतेधूतंतुकंपितेभर्त्सितेत्रिषु॥ धूर्तंतुखंडलवणेधूस्तूरेनाविटेत्रिषु॥२८॥ धृतिर्नेष्टौस्त्रियांतुष्टौयोगभिदैर्यधारणे॥ नतंतगरपात्यांस्यात्क्लीबंकुटिलनम्रयोः॥२९॥ त्रिषुनीतिर्नयेपिस्यात्स्रापणेपिचयोषिति॥ पंक्तिःस्त्रीगोरवेपाकेपत्तिर्नोपदगेस्त्रियाम्॥३०॥ गतावेकरथैकेभट्यश्वपंचपदातिके॥ पंक्तिर्दशाक्षरंछंदोदशसंख्यालिषुस्त्रियाम्॥३१॥ पतिर्धवेनात्रिधीशेप्रासंलब्धेसमंजसे॥ पातोनिपातनेत्रातेत्रिषुप्राप्तिर्महोदये॥३२॥ लाभेपिचस्त्रियांप्रातिःपूर्तिप्रादेशयोःस्त्रियाम्॥ पीतिर्नाऽश्वेस्त्रियांपानेप्रीतंस्पृषितनर्मणोः॥३३॥ पीतंपानेहरिद्रायांस्त्रियांगोरेऽभिधेयवत्॥ प्रीतिर्योगांतरेप्रेम्णिस्मरपत्नीमुदोःस्त्रियाम्॥३४॥ पुस्तंक्लीबेपुस्तकेचलेप्यादिशिल्पकर्मणि॥ पुतंतुरंगमगतौक्लीबंपुंसित्रिमात्रके॥३५॥ पूतंत्रिषुपवित्रेचशोधितेबहुलीकृते॥ पूर्तेत्रिषुपूरितेस्याक्लीबंस्रातादिकर्मणि॥३६॥ प्रोतंनपुंसकंवस्त्रेरचितेवाच्यलिंगकम्॥ प्रेतोभूतांतरेपुंसिमृतेस्याद्वाच्यलिंगकः॥३७॥ पोतःशिशोवहित्रेचगृहस्थानेचवाससि॥ वृत्तिस्तुवरणेपिस्याद्वेष्टनेऽपिचयोषिति॥३८॥ भर्त्तास्वामिनिपुंसिस्याच्त्रिषुधानरिपोष्टरि॥ भक्तिर्विभागेसेवायांस्त्रियांभ्रांतिस्तुयोषिति॥३९॥ मिथ्यामितोचभ्रमणेभित्तिःकुड्यप्रदेशयोः॥ भीतिर्भयेस्त्रियांभीतंभयेऽथभीयुतेत्रिषु॥४०॥ भूतिर्भस्मनिसंपत्तौहस्तिशृंगारयोःस्त्रियाम्॥ भूतंक्ष्मादौपिशाचादौजंतौक्लीबंत्रिषूचिते॥४१॥ प्राप्तेवित्तेसमेसत्येदेवयोन्यंतरेतुना॥ कुमारेपिभृतिःस्त्रीस्यान्मूल्येपिभरणेपिच॥४२॥ मतंतुसम्मतेज्ञातेमतिःस्त्रीच्छाशिषोःस्मृतौ॥ मंतुःपुंस्यपराधेपिमनुष्येपिप्रजापतौ॥४३॥ मातागौर्यादिजननीगोब्रह्माण्यादिभूमिषु॥ मातिर्मानेप्यवच्छेदेमुक्तिर्मोक्षेचमोक्षणे॥४४॥ मात्रादयःस्त्रियांमुक्तःप्रमाणेमोक्षेचमोचिते॥ त्रिषुस्त्रीमोक्तिकेमूर्तिःकायकादिन्ययोःस्त्रियां॥४५

मूर्त्तेस्यान्त्रिषु मूर्च्छालेकठिनेमूर्तिमत्यपि॥मृतंतुयाचितेमृत्योक्लीबंमृत्कर्मतिन्त्रिषु॥४५॥यतिःस्त्रीपादविच्छेदेनिकारयतिनोःपुमान्॥यंतामठेचसूतेनायुक्तिःस्त्रीन्याययोगयोः॥४७॥युतोयुक्तोऽपृथग्भूतेक्लीबंहस्तचतुष्टये॥रक्तोनुरक्तेनील्यादिरंजितेलोहितेत्रिषु॥४८॥क्लीबंतुकुंकुमेतास्रेप्राचीनामलकेसृजि॥रतिःस्त्रीस्मरदारेषुरागेसुरतयुत्स्ययोः॥४९॥रथ्यंवर्त्मनिनद्यांस्त्रीरतंसुरतयुत्स्ययोः॥रिक्तंशून्येवनेरीतिःस्त्रियांस्यंदप्रचारयोः॥५०॥पित्तलेलोहकिट्टेचलत्तामियंगुशाकयोः॥वृक्काज्योतिष्मतीवल्लीलत्ताकर्पूरिकासुचः॥५१॥माधवीदूर्वयोर्लिप्तविलिप्तविषदिग्धयोः॥भुक्तेक्लृप्तातूर्णनाभपिपीलिकागदांतरे॥५२॥वसातुजनकेपुंसिवापकेप्यभिधेयवत्॥वक्तातुपंडितेपिस्याद्वाग्मिन्यप्यन्यलिंगकः॥५३॥व्यस्तंतुव्याकुलेव्यातेव्यक्तःस्फुटमनीषिणोः॥वृत्तिर्द्वयोर्निरूहेणाभ्यधोभूम्निदशासुच॥५४॥वर्त्तिर्भेषजनिर्माणेनयनांजनलेखयोः॥गात्रानुलेपनादीपदशादीपेपुयोषिति॥५५॥वार्त्तातुवर्त्तनेवार्तिगणेकृष्याद्युदंतयोः॥निःसारारोग्ययोःक्लीबंवृत्तिर्मल्लीरुजोःस्त्रियाम्॥५६॥व्यासंरव्यातेसमाक्रांतेव्यासिर्व्यापनरंभयोः॥स्त्रियांवित्तिर्विचारेचलाभसंभावयोःस्त्रियाम्॥५७॥वित्तंक्लीबंधनेवाच्यलिंगंव्यासंविचारिते॥वीतमसारगजेस्यादंकुशकर्मण्यसारतुरगेपि॥५८॥वीतिर्गतौचदीप्तौचभोजनाशनधावनेषुस्त्री॥वृत्तिर्विवरणाजीवकेशिक्यादिप्रवर्त्तने॥५९॥स्त्रीवृंतंप्रसवबंधेघटीधाराकुचाग्रयोः॥वृत्तोऽधीतेप्यतीतेतिवर्तुलेपिहतेमृते॥६०॥वृंदेऽन्यलिंगंवाक्लीबंछंदश्चारिचयेसुनिषु॥शक्तिरस्त्रांतरेगौर्यामुत्साहादौबलेस्त्रियाम्॥६१॥शस्तंक्षेमेप्रशस्तेचशांतिःस्त्रीमंगलेशमे॥शास्ता समंतभद्रेनाशासकेपुनरन्यवत्॥६२॥शांतोऽग्न्यियुक्तरसयोःपुंसिग्निषुशमान्विते॥अव्ययंवारणेशांतेशांतंशितंचदुर्बले॥६३॥निशितेक्षशितिभूर्जेनासितासितयोःस्त्रिषु

शीतंहिमगुणेक्लीबंशीतलालसयोःस्त्रिषु॥६४॥वानीरेबहुवारे नाशुक्तंपूनाम्लनिष्ठुरे॥श्रुतिःश्रोत्रेचतत्कर्मण्याम्नायवार्तयोः स्त्रियाम्॥६५॥शुक्तिःकपालशकलेशंखेशंखनरवेपिच॥नख्यश्चावर्तदुर्नाममुक्तास्फोटेषुचस्त्रियाम्॥६६॥श्रुतमाकर्णितेशास्त्रे श्वेतोद्वीपाद्रिभेदयोः॥श्वेतावराटिकाकाष्ठपाटलाशंखिनीषुच॥६७॥क्लीबंरूप्येन्यवच्छुक्लेसन्त्साधौधीरशस्तयोः॥मान्येसत्येविद्यमानेत्रिषुसाध्वसमयोःस्त्रियाम्॥६८॥सातिर्दानेवसानेस्त्रीस्यात्तंचेतसिगद्धरे॥स्थितंप्रतिज्ञातवतिचोर्ध्वनिश्चलयोःस्त्रिषु॥६९॥स्थितिःस्त्रियामवस्थानेमर्यादायांचसीमनि॥सितमवसितेचबद्धेधवलेत्रिषुधवलायांस्त्री॥७०॥सीतालांगलपद्धतिवैदेहीस्वर्गगंगासु॥सूतस्तूपार्थिवेपुत्रेरूढपत्येतुसूतास्मृता॥७१॥सूप्तिःस्पर्शाज्ञतानिद्राविश्रंभेशयनेस्त्रियाम्॥सूतरूसारथौतक्षिणिक्षत्रियाद्ब्राह्मणीसूते॥७२॥बंदिचारणयोःपुंसिप्रसूतेप्रेरितेत्रिषु॥स्यूतिःसीवनसंतत्योस्त्रियांस्यूतःप्रसेवके॥७३॥नात्रिभूतेस्मृतिर्धर्मशास्त्रस्मरणयोःस्त्रियाम्॥सृतिःस्त्रीगमनेमार्गेसेतुर्नालौकुमारके॥७४॥हस्तःकरेकरिकरेसप्तकोष्ठकरेपिच॥ऋक्षेकेशात्परोव्राणेहितंपथ्येगतेधृते॥७५॥हेतिःस्यादायुधज्वालासूर्यतेजःसुयोषिति॥ ॥नत्रि॥ ॥अमृतंयज्ञशेषेस्यात्पीयूषेसलिलेघृते॥७६॥अयाचितेचमोक्षेचनाधन्वंतरिदेवयोः॥अमृतामागधीपथ्यागुडूच्यामलकीषुच॥७७॥अनृतंकृषावसत्येप्यजितोनाहरौत्रिषु॥अनिर्जितेचाच्युतस्तुहरोपुंसित्रिषुस्थिरे॥७८॥अर्दितंयाचितेपिस्याद्व्याधौचहिंसिते॥अक्षतंनपुंसोःपंडेलाजेषुत्रिषुहिंसिते॥७९॥यवेपिकचिदव्यक्तोहरोस्मरहरेषुमान्॥परमात्ममहदाद्योःक्लीबंस्यादस्फुटेत्रिषु॥८०॥अनंतःकेशवेशेषेपुमाननवधौत्रिषु॥अनंतासर्विशल्यायांशारिवादूर्वयोरपि॥८१॥कणादुरालभापथ्यापार्वत्यामलकीषुच॥वि

श्वंभरागुडूच्योःस्यादनंतंस्करवर्त्मनि॥८२॥अश्मंतमशकेचुल्यां-
मरणेऽनुवधावपि॥क्षेत्रेप्यथाऽयतिःपुंसिहिमदीधितिकालयोः॥
८३॥अर्हंस्तुक्षपणेबुद्धेपुंसिमान्येऽन्यलिंगकः॥अर्हंतश्चापिसु
गतेक्षपणेपिचदृश्यते॥८४॥अगस्तिःकुंभयोनौचवंकसेनतरौ
पुमान्॥अर्वर्तीकुंभदास्यांचवडवायांचयोषिति॥८५॥अंगतिः
पुंस्यग्निहोत्रप्रह्लवन्हिश्चथादितिः॥क्ष्वेडेवमात्रोरंहतिस्त्यागेरोगे
व्युप्तेस्त्रियौ॥८६॥आपातःपुंसिपतनेतदात्वेचप्रकीर्तितः॥आ
घ्रातंशिंशिपतेक्रांतेप्यारब्धंतेभाषितेतिङि॥८७॥आध्मातःशब्दि
तेदग्धेवातरुग्भेदसंयुते॥आप्लुतःस्नातकेस्नातेऽप्याद्दृतःसाद
रेर्चिते॥८८॥आचितःशकटोन्मेयेपलानामयुतद्वये॥पुल्लिंगः
संगृहीतेपिछंदेपिस्यान्त्रिलिंगकः॥८९॥आहूतंगुणितेचापिता
डितेचमृषार्थके॥स्यात्पुरातननवस्त्रेपिनववस्त्रेचमाऽनके॥९०॥
आनर्तोदेशभेदेपिनृत्यस्थानेजलेरणे॥आवर्तश्चिंतनेवारि
भ्रमेचावर्त्तनेपुमान्॥९१॥आस्फोतंतुपुमानर्कपर्णेस्यात्कोविदारे
के॥आस्फोतागिरिकर्ण्यांचवनमाल्यांचयोषिति॥९२॥आयस्त
स्तेजितेक्षिसेक्लेशितेकुपितेहते॥आयतिस्तुस्त्रियांदैर्घ्येप्रभावा
गामिकालयोः॥९३॥आयन्तिस्तुस्त्रियांस्नेहेवशित्वेवासवेबले॥
आकृतिस्तुस्त्रियांरूपेसामान्यवपुषोरपि॥९४॥आसत्तिःसंगमे
लाभेस्त्रियामापत्तिरापदि॥प्रापणेपिचयोषित्स्यादुदंतःसाधु
वार्तयोः॥९५॥उषितंव्युषितेदग्धेप्युदात्तस्तुस्वरांतरे॥दयात्या
गादिसंपन्नेकाव्यालंकारहत्ययोः॥९६॥उक्तंशुष्कमांसेथश्रिषु
तसेपरिप्लुते॥उचितंतुभवेन्न्यस्तेमितेज्ञातेसमंजसे॥९७॥उद्भृ
तंस्यान्निष्कृष्टेपरिमुक्तेऽन्निते॥उत्थितंस्यान्निष्पन्नेप्रो-
द्यतेवृद्धिमत्यपि॥९८॥उह्यातस्तुपुमान्पादस्खलनेसमुपक्र
मे॥पवनाभ्यासयोगस्यकालभेदेचकीर्तितः॥९९॥उत्तुंगेमुद्गरेपि
स्यादुदितंतूत्तकागते॥उच्छ्रितंत्रिषुसंजातेसमुन्नद्धप्रहृष्टयोः॥१००

उन्मत्तउन्मादवति धूस्तूरमुच्चटकुंदयोः॥ उद्भांतोनिर्मदगजेषुमा
नुद्भमिश्रेषु॥१॥ एधत्वृषभेऽग्नौनाकलितंविदितास्तयोः॥
कपोतःस्याच्चित्रकंठपारावतविहंगयोः॥२॥ अथक्रंदितमाह्वा
नेरुदितेपिनपुंसकम्॥ क्षारितःस्रावितेक्षारेभिशस्तेपिचत्रि
षु॥३॥ कापोतारुचकेक्लीबेकपोतोयेजनांतरे॥ किरातोम्लेछ
भेदेस्याद्भूनिंबेऽल्पतनावपि॥४॥ स्त्रियांचामरधारिण्यांकुट्टि
नीदुर्गयोरपि॥ कृतांतोयमसिद्धांतदेवाकुशलकर्मसु॥५॥ गर्जि
तंवारिवाहादिध्वनौनामत्तकुंजरे॥ ग्रंथितंगुंफितेक्रांतेहिंसि
तेचन्निलिंगकम्॥६॥ गभस्तिःकिरणेसूर्येनास्वाहायांतुयोषिति
॥ गम्युत्स्त्रीस्वर्णलतयोर्गोपतिःशिवषंढयोः॥७॥ नृपभास्क
रयोःपुंसिचेष्टितंगतिचेष्टयोः॥ जगत्स्यादिष्टपेक्लीबंवायोना
जंगमेत्रिषु॥८॥ जगतीभुवनेक्ष्मायांछंदोभेदेजनेपिच॥ जयं
तीवृक्षभिक्षोर्यौरिंद्रपुत्रीपताकयोः॥९॥ पुमानेंद्रोहरेर्भीमेज्वलि
तंदग्धउज्वले॥ जामातादुहितुःपत्योसूर्यावर्तेधवेपुमान्॥१०॥
जीभूतोऽहौधृतिकरेदेवताडेपयोधरे॥ जीवातुरस्त्रियांभक्षे-
जीवितेजीवनौषधे॥११॥ जीवंतीजीवनाशम्योर्गुडूचीवृंदयोर
पि॥ जृंभितंकरणेस्त्रीणांमीहास्फोटितयोरपि॥१२॥ त्वरितंप्र-
जवेशीघ्रेत्रिगर्तोगणितांतरे॥ देशेपिनाधुर्धुरिकाकामुकांग
नयोःस्त्रियाम्॥१३॥ तृणताधनुषितृणत्वेदर्शितमपिज्ञातदर्शि
तेपिस्यात्॥ कचचित्तेद्विजातिर्विभांडजयोश्चपुल्लिंगः॥१४॥
दुर्जातंव्यसनेक्लीबेसम्यग्जातेऽन्यलिंगकम्॥ दुर्गतिर्नरकेनैस्व्ये
स्त्रीदृष्टांतउदाहृतौ॥१५॥ शास्त्रेचमरणेधीमान्पंडितेचदृढ
स्मृतौ॥ निर्ऋतिःस्यादलक्ष्म्यांस्त्रीदिशांपालांतरेपुमान्॥१६॥नि
कृतंविप्रलंभेस्यान्नीचेविप्रकृतेपिच॥ निर्मुक्तस्त्यक्तसंगेस्यान्मु
क्तकंचुकयोर्गिनि॥१७॥ निरस्तस्त्रिषुनिष्कूतेप्रेषितेषोद्भुतोदिते
॥ संत्यक्तेचमतिर्हतौनिमित्तंहेतुलक्षणोः॥१८॥ निवातोदृढ

सन्नाहे यानभून्येपिचाभये॥निशांतेत्रिषुशांतेस्यात्क्लीबंतुभवनोषसोः॥१९॥निकृतिर्भर्त्सनेक्षेपेशठेशाठ्येपिचस्त्रियाम्॥निर्वृतिःस्वस्थितावस्तंगमनेचस्करंवेस्त्रियाम्॥२०॥नियतिर्नियमेदेवेस्त्रीपतन्पातुकेखगे॥प्रहृतंवितते क्षुण्णेपर्यस्तःपतितेहते॥२१॥प्रभूतमुद्गतेप्राज्येपंडितःसिल्हकेकवौ॥पलितंशैलजेतापेकेशपाकेचकर्दमे॥२२॥प्रसृतःस्कंधसारेस्याद्विनीतेवेगितेत्रिषु॥अर्द्धांजलौतुपुंलिंगोजंघायांप्रसृतामता॥२३॥प्रसूतंकुंकुमेक्लीबंत्रिषुसंजातसूतयोः॥प्रणीतःसंस्कृताग्नौनायज्ञपात्रांतरेस्त्रियाम्॥२४॥त्रिषुक्षिप्तोपसंपन्नविहितेषुप्रवेशिते॥प्रतीतःसादरेज्ञातेदृष्टप्रख्यातयोस्त्रिषु॥२५॥प्रमीतंवाच्यलिंगंस्यात्क्षीणेपिमृतेपिच॥परेतोवाच्यलिंगःस्यान्मृतेभूतांतरेपुमान्॥२६॥पर्वतःपादपेपुंसिशाकमत्स्यप्रभेदयोः॥देवमुन्यंतरेशैलेप्रतापोनिर्झरेतटे॥२७॥पर्याप्तंतुयथेष्टेस्यात्तृप्तोशक्तेनिवारणे॥पंचतापंचभावेस्यान्मरणेपिचयोषिति॥२८॥पक्षतिश्चंचुभवेत्पक्षमूलेचप्रतिपत्तिथौ॥प्रसूतिरुद्भवेपिस्यात्तनयेदुहितर्यपि॥२९॥प्रततिर्विस्तृतौवल्यांपद्धतिःपंक्तिवर्त्मनोः॥प्रवृत्तिरुद्भवाहेस्यादुदंतेचप्रवर्तने॥३०॥आपत्स्यादौचपर्याप्तिःप्रकामप्राप्तिरक्षणे॥प्रकृतिर्गुणसाम्येस्यादमात्यादिस्वभावयोः॥३१॥योनौलिंगेपोरवर्गेऽमीपक्षत्यादयःस्त्रियाम्॥पार्वतीसल्लकीदुर्गागोपालपुत्रिकासुचा॥३२॥प्रार्थितंयाचितेशत्रुसंकल्पेभिहतेत्रिषु॥पित्सन्नविहंगमेपुंसिपत्ननेच्छौपुनस्त्रिषु॥३३॥पिशितंमांसेमांस्यांस्त्रीपिंडितंघृणितेघने॥पीडितंकरणेस्त्रीणांयंत्रितेबाधितेपिच॥३४॥पुटितंस्याद्विपुटेपाटितस्यूतयोरपि॥पृषन्मृगेषुमान्बिंदौनद्योःपृषतोपिना॥३५॥अनयोश्चत्रिषुश्वेतबिंदुयुक्तेप्युभाविमौ॥प्रोक्षितंनिहतेसिक्तेहृतावसनांतरे॥३६॥छंदोभित्क्षुद्रघातार्तकीवारिधानीषुचाचिच॥फंदकारीमहत्योश्चभवद्यु

अत्सतोस्त्रिषु ॥ ३७ ॥ स्त्री बाणभेदे भरतो नाट्यशास्त्रमुनौ नटे ॥ रामानुजेच दौष्यंतौ भास्वान्भास्वरसूर्ययोः ॥ ३८ ॥ भारतंग्रंथभेदेस्या हूर्षभेदेऽथ भारती ॥ वचनेचसरस्वत्यांपक्षिवृत्तिप्रभेदयोः ॥ ३९ ॥ भासेतःस्कंदराकारेत्रिषुनाभासपक्षिणी ॥ भावितंवासितेभासेभूभृन्नाट्येमहीपतौ ॥ ४० ॥ महतीवल्लकीभेदेराज्ञेस्यात्तुनपुंसकम् ॥ तत्वभेदे पुमान्मुख्येचाच्यवन्मथितंपुनः ॥ ४१ ॥ क्लीबंनिर्जलघोलेस्यात्त्रिषुश्लोडितघृष्टयोः ॥ मरुदेवेसमीरेनाग्रंथिपर्णेनपुंसकम् ॥ ४२ ॥ मुषितंलूनखंडितयोर्मूर्च्छितमपिसोच्छ्वयेचमूदेच ॥ रजतंत्रिषुशुक्लेस्यात्क्लीबंहारेचदुर्वर्णे ॥ ४३ ॥ रमतिर्नायकेनाकेपुंसिस्याद्रसितंपुनः ॥ रुतस्तनितयोःक्लीबंस्वर्णादिरचितेत्रिषु ॥ ४४ ॥ रेवती हलिपत्न्यांस्यात्तारकाभिन्नाक्षभेदयोः ॥ रैवतस्तरुवर्णालोशैलभेदेचशंकरे ॥ ४५ ॥ रोहितंकुंकुमेरक्तेऋजुशक्रशरासने ॥ पुंसिस्यान्मीनमृगयोर्भेदेरोहितकद्रुमे ॥ ४६ ॥ रोहिन्मृग्यांलताभेदेस्त्रीनार्के ललितंत्रिषु ॥ ललितेचेशितेपिस्याद्वारभेदेतुनद्वयोः ॥ ४७ ॥ लोहितंरक्तगोशीर्षकुंकुमेरक्तचंदने ॥ पुमान्नदांतरेभौमेवर्णेचत्रिषुतद्वति ॥ ४८ ॥ वर्द्धितप्रसितेच्छिन्नेपूरितेवर्हतिर्गवि ॥ सचिवेपुंसिवहतुःपथिकेवृषभेपुमान् ॥ ४९ ॥ वनिता जातरागस्त्रीस्त्रियोस्त्रिषुचयाचिते ॥ सेविते वापितंबीजाकृतसुंडितयोस्त्रिषु ॥ ५० ॥ वसतिःस्यात्स्त्रियांवासेयामिन्यांचनिकेतने ॥ व्यायतंव्यापृतेदीर्घेदृढेऽतिशयेऽन्यवत् ॥ ५१ ॥ व्याघातोयोगभेदेस्यादंतरायप्रहारयोः ॥ वासिताकरणीनार्योर्वासितंभावितेरुते ॥ ५२ ॥ वासंतीमाधवीयूथ्योरुष्टेनावहितेत्रिषु ॥ विविक्तंत्रिषुसंपृक्तेरहःपूतविवेकिषु ॥ ५३ ॥ वस्त्रनंदेनाविद्वस्तःपंडितेव्याकुलेत्रिषु ॥ विनीतःस्यवहाश्वेस्याद्वणिज्यपिपुमांस्त्रिषु ॥ ५४ ॥ जितेंद्रियेऽपनीतेचनिभृतेविनयान्विते ॥ विश्वस्तोजातविश्वासेविश्वस्ता विधवस्त्रियाम् ॥ ५५ ॥ विद्युत्तडितिसंध्यायांस्त्रियांत्रिषुतुनिश्चये ॥ विवृताक्षद्रुरुभेदेविस्तृतेत्वभिधेयवत् ॥ ५६ ॥ विनेता देशकेरा

ज्ञिनाविधाता तुवेधसि॥स्मरेनाविनता तार्क्ष्यजननीयांपिदक्षजे
॥५७॥विनतःप्रणतेभुग्नेशिक्षितेचाभिधेयवत्॥विकृतंत्रिषुबीभ
त्सरागितेसंस्कृतेपिच॥५८॥विच्छित्तिरंगरागेविच्छेदेहारभेदेस्त्री
॥विदितंबुधितार्थितयोर्विपत्तिरपियातनापदोर्योषित्॥५९॥वृ
त्तांतःप्रक्रियायांस्यात्कार्त्स्न्येवार्तापभेदयोः॥प्रस्तावेवेष्टितंरुद्धेला
सकेकरणांतरे॥६०॥वेल्लितंगमनेक्लीबंकुटिलेविधुतेत्रिषु॥विवर्तः
समुदायेस्यादपवर्तननृत्त्ययोः॥६१॥शकुंतःकीटभेदेस्याद्भासिप
क्षिविहंगयोः॥श्रीमांस्तिलकवृक्षेनामनीज्ञेज्ञानकत्रिषु॥६२॥श्री
पतिःपुंसिपृथिवीनाथेचमधुसूदने॥शृंखलांतोंतःस्मरेस्यान्मृत्नरहः
कक्षांतरेपिच॥६३॥स्रवंतीतुनरंगिण्यांगुल्मस्थानोषधीभिदोः॥
संवर्तःप्रलयेसुन्यंनरेकर्षफलेपिच॥६४॥स्खलितंचलितेत्रेषेसं
हृतंसंगतेहृदे॥संस्कृतःकृत्रिमेशस्तेभूषितेप्यन्यलिंगकः॥६५॥
क्लीबंतुलक्षणोपेतेस्थपतिःकंचुकिन्यपि॥जीवेष्टियाजकेशिल्पि
भेदेनासत्तमेत्रिषु॥६६॥संघातःपुंसियातेचसंहतोनरकांतरे॥
संवित्तिःप्रतिपत्तौस्याद्विवादेजननस्यच॥६७॥संततिःस्यात्पंक्तौ
गोत्रेपारंपर्येपुत्रपौत्राणम्॥संगतिःसंगमेज्ञानेसन्नतिःप्रण
तौध्वनौ॥६८॥समितिःसंपरायेस्यात्सभायांसंगमेपिच॥स-
माप्तिरवसानेस्यात्समर्थनेऽथसंमतिः॥६९॥अभिलाषप्यनुज्ञा
यांसंवित्याद्यास्त्रियोषिति॥स्थापितंनिश्चितेन्यस्तेस्तिमितोऽ
चंचलार्द्रयोः॥७०॥सिकतास्त्रीसिकतिलेवालुकायांतुभूमनि
॥स्फरतंस्यान्निधुवनेदेवत्वेस्फरतास्मृता॥७१॥स्फुरतंतुशुभे
पुण्येक्लीबंस्फुरितेत्रिषु॥स्फुग्रतास्फुरवसंदोत्थाशोभनव्रतयो
रपि॥७२॥स्फुर्तीतिःशोभननयेभ्रुवमातरियोषिति॥सूनृतंम
गलेपिस्यात्प्रियसत्येवचस्यपि॥७३॥हरिर्दृशिस्त्रियांपुंसिहय
वर्णविशेषयोः॥अस्त्रियांस्यात्तृणेचाथहर्मितंक्षिसदग्धयोः॥
॥हरितास्त्रीचदूर्वायांहरिद्वर्णयुतेऽन्यवत्॥हसंत्यंगारधान्यो

चमल्लिकाशाकिनीभिदोः॥७५॥ हरीतः पक्षिभेदेस्यान्मुनिभेदेचकेतषे॥ हृषितंविस्मितेप्रीतेप्रहृतेहृष्टलोमनि॥७६॥ ॥तच्चतुः॥ ॥अवसितमृद्देज्ञातेप्यवसानगतेचवाच्यलिंगंस्यात्॥ अर्थपतिःपुल्लिंगोधनाधिनाथेचनरनाथे॥७७॥अवदातःसितेगौरेविशुद्धेप्यन्यलिंगकः॥अवगीतंतुनिर्वादेत्वसृग्गर्हितयोरपि॥७८॥अंतर्गतंविस्मृतेस्यान्मध्यप्राप्तेचवाच्यवत्॥अंगारितंतुदग्धेस्यात्पलाशकलिकोद्गमे॥७९॥हसंत्यांचलतामात्रेनदीभेदेचयोषिति॥अपावृतस्तूपिहितेस्वतंत्रेपिचवाच्यवत्॥८०॥अत्याहितंमहाभीतौजीवानपेक्षकर्मणि॥अभिनीतंत्रिषुन्याय्येसंस्कृतामर्षिणोरपि॥८१॥अभिजातःकुलीनेस्यान्न्याय्यपंडितयोस्त्रिषु॥अभियुक्तःपरैरुद्देतत्परेप्यभिधेयवत्॥८२॥अतिमुक्तस्तुनिःसंगेवासंत्यांतिनिशोपिच॥अवध्वस्तःपरित्यक्तेनिंदितेप्यवचूर्णिते॥८३॥अधिक्षिप्तःप्रणिहितेकुत्सितेभर्जितेत्रिषु॥अंशुमान्भास्करेशालपर्ण्यांमंशुमतीस्मृता॥८४॥भवेदपचितिःपूजाव्ययनिष्कृतिहानिषु॥अथानुमतिरूनेंदुपूर्णिमानुज्ञयोरपि॥८५॥अभिशस्तिःप्रार्थनापवादयोश्चत्रयस्त्रियाम्॥आयुष्मान्योगभेदेनावाच्यवच्चिरजीविनि॥८६॥उपाहितोऽनलोत्पातेपुमानारोपितेत्रिषु॥उपाकृतोध्वरदृतपशौनोपद्रुतेत्रिषु॥८७॥उदास्थितःप्रतीहारेप्रव्रज्यावसितेचरे॥स्यादुल्लिखितमुत्कीर्णेतनूकृतेचवाच्यवत्॥८८॥उद्गाहितमुदीर्णेस्याद्वृद्धग्राहितयोस्त्रिषु॥भवेदुपचितंदग्धेसमृद्धेवाप्यलिंगकम्॥८९॥उज्जृंभितंत्रिपूत्कृद्धेचेष्टायांतुनपुंसकम्॥उष्परक्तोव्यसनार्तेरदुग्रस्तेंदुसूर्ययोः॥९०॥उपसृतिःसंगमात्रेसेवायामपियोषिति॥ऋष्यप्रोक्ताशतावर्यांतिबलाशूकशिंबिषु॥९१॥ऐरावतोऽभ्रमातंगेनारंगेलकुचद्रुमे॥नागभेदेचपुंसिस्याद्विघ्नतद्भेदयोस्त्रियाम्॥९२॥नपुंसकंमहेंद्रस्यऋजुदीर्घशरासने॥

कलधौतंरूपवर्णेस्याद्रजतेचनपुंसकम्॥९३॥भवेत्कुहरितंहरी
बंपिकालापेरतध्वनौ॥कुमुद्वान्कुमुदप्रायदेशेस्याद्वाच्यलिं
गकः॥९४॥कुमुद्वतीकुमुदिन्यांकुशपत्न्यांचयोषिति॥कृष्णावृंता
पाटलायांमाषपर्ण्यांचयोषिति॥९५॥अथगंधवतीपृथ्वीपुराणि
द्यासमावृषु॥कराग्यांचगरुत्मांश्चपक्षिमात्रेरवगायिपे॥९६॥भ
वेद्गुहपतिःपुंसिगृहस्थेपिचमंत्रिणि॥चंद्रकांतस्तुपुंसिस्यान्मणि
भेदेचकेतवे॥९७॥चर्मण्वतीनदीभेदेकदलीपादपेस्त्रियाम्॥चि
त्रगुप्तस्तुपुंसिस्याद्यमेतस्यचलेखके॥९८॥दिवाभीतःकुंभिलेस्या
दुलूकेकुमुदाकरे॥दिवाकीर्तिस्तुपुंसिस्यान्नापितांतावसायिनोः
॥९९॥द्वीपवान्सिंधुनदयोर्द्वीपवत्यापगासुवोः॥दृषद्वती न
दीभेदेकात्यायन्यामपिस्त्रियाम्॥१००॥स्याद्धूमकेतुरुत्पातभेदे
वैश्वानरेपुमान्॥नंद्यावर्तःपुमान्वेश्मप्रभेदेभगवद्भमे॥१॥न
दीकांतःसमुद्रेस्यादिज्जलेसिंदुवारके॥नदीकांतास्त्रियांजंघा
काकजंघौषधावपि॥२॥नागदंतोहिपरदेगृहान्निर्गतदारुणि॥
नागदंतीतुकुंभायांश्रीहस्तिन्यामपिस्त्रियाम्॥३॥निष्काशितो
निर्गमितेऽप्याहितेऽधिकृतेपिच॥अथनिस्तुषितंत्यक्तेतण्डुलेह्री
नेलघूकृते॥४॥निराकृतिरनाकारेऽस्वाध्यायेवारणेभिषु॥प
रिगतंभिक्षुभाषेविस्मृतज्ञातचेष्टिते॥५॥अथप्रणिहितंन्यस्ते
प्राप्तेपिचसमाहिते॥अथपल्लुवितंलाक्षारक्तेसपल्लवेततौ॥६॥
भवेत्प्रणिहितंहृष्टेप्रतिस्खलितबद्ध्योः॥प्रतिक्षिप्तंवारितेस्या
त्प्रेषितेपंचकंत्रिषु॥७॥परिवर्तोविनिमयेकूर्मराजप्रवर्तने॥
परिष्कृतास्त्रीवारुण्यांस्यान्नेस्यादभिधेयवत्॥८॥प्रधूपिता
क्रीतितायांसूर्यगंतव्यदिश्यपि॥पंचगुप्तस्तुचार्वाकदर्शनैक
मठेपुमान्॥९॥प्रजापतिश्चदक्षादौमहीपालेविधातरि॥प्रति
पत्तिःप्रवृत्तौचप्रागल्भ्येगौरवेपिच॥१०॥संप्रासोचप्रबोधेचप
दप्राप्तौचयोषिति॥अथप्रव्रजितामांसीकुंडीरीतापसीचुच॥

११॥ प्रतिकृतिरथाचार्यो प्रतिनिधिप्रतीकारयोश्चस्त्री॥ पाशुपतो बकपुष्पेस्यात्पशुपत्यधिदेवतेचतद्भक्ते॥१२॥ पारिजातःसुरतरोपारिभद्रतरावपि॥ पारावतीगोपगतेनदीभिल्लुवलीफले॥१३॥ पारावतःकलरवेतथामर्कटतिंदुके॥ पुष्पदंतस्तुदिङ्नागभेदेधिष्ण्याधरांतरे॥१४॥ पुरस्कृतोऽभिशस्तारिग्रस्ताग्रेकृतपूजिते॥ भगवन्नाजिनेगोर्यांस्त्रियांपूज्येतुवाच्यवत्॥१५॥ अथभागवतीनागपुरीनद्योर्हरोपुमान्॥ रेगमातातुकुट्टिन्यांदक्षरोगांतरेस्त्रियाम्॥१६॥ लक्ष्मीपतिःपुमान्वासुदेवेनरपतावपि॥ व्यतीपातोमहोत्पातेयोगभेदापयोनयोः॥१७॥ वनस्पतिर्नाद्रुमात्रेविनापुष्पफलिद्रुमे॥ विनिपातोनिपातेस्याद्देवादिव्यसनेपुमान्॥१८॥ विजृंभितंतुचेष्टायांकुब्जेत्रिषुविकस्वरे॥ विवस्वान्त्रिषुधेसूर्येतन्नगर्यांविवस्वती॥१९॥ वैजयंतीगृहेशक्रध्वजप्रासादयोःपुमान्॥ वैजयंतीपताकायांजयंतीपादपेपुमान्॥२०॥ भवेच्छेतधृतिःपुंसिशक्रेचपरमेष्ठिनि॥ शक्रभदंतीसुदंत्यांस्यात्पुष्पदंतेभयोषिति॥२१॥ संमुदितंसमुत्कीर्णेप्यपनीतेचवाच्यवत्॥ संदागतिर्नाकघातनिर्वाणेषुसदीश्वरे॥२२॥ सेरस्वोश्वनदेचाब्धौनान्यवद्रसिकेस्त्रियाम्॥ वाणीरुक्मीरत्नवाग्देवीगोनदीषुनदीभिदि॥२३॥ मनुपत्न्यामपिसेत्यवतीव्यासस्यमातरि॥ नारदर्चीकयोःपत्न्यांस्त्रियांपुंसिनृपांतरे॥२४॥ समुद्गांतातुकार्पासीवृक्षादुरालभासुचः॥ समाहितःसमाधिस्थेप्युक्तसिद्धांतआहिते॥२५॥ निर्विवादीकृतेपिस्यात्प्रतिज्ञातेचवाच्यवत्॥ समाधातोवधेयुर्दैसंख्यावान्पंडितेपुमान्॥२६॥ संख्यायुक्तेऽन्यलिंगोऽथसंख्याभृतिःपुमान्मरवे॥ चंद्रेसुभाषितोबुद्धेपुमान्सूक्तेनपुंसकम्॥२७॥ सूर्यभक्तेसुहृद्बंधूकेपुंसित्रिषुर्कपूजके॥ सेनापतिःकार्तिकेयेप्यनीकाधिपतौपुमान्॥२८॥ हिमारातिःपुमान्वीतिहोत्रेकिरणमालिनि॥ हेमवत्यभयाःस्वर्णक्षीर्योःश्वेतवचोमयोः॥२९॥ ॥

॥ ॥ तपंच॥ ॥अंचलोकितोनालोकनाथेत्रिषुनिरीक्षिते॥अंपराजितईशाजेऽन्यतरेनाऽजितेत्रिषु॥३७॥ गिरिकर्णीजयादुर्गाश्यामपर्णीषुयोषिति॥उपधूपितआसन्नमरणेपरिधूपिते॥३८॥स्याद्गणाधिपतिःपुंसिशंकरेपिगजानने॥भवेत्पतिषन्पित्तोत्रिषुपुंसिविहंगमे॥३९॥ पृथ्वीपतिस्तक्षभूपालेऋषभारव्योषधौपुमान्॥मूर्द्धाभिषिक्तोभूपालेमंत्रिणिक्षत्रियेपिच॥३३॥ यादसांपतिरंभोधौपश्चिमाशापतावपि॥वंसंतदूतश्चैत्रेस्यात्पिकपंचमरागयोः॥३४॥ वंसंतदूतीपाटल्यामभियुक्तेच योषिति॥ ॥तषट्॥ ॥अर्द्धपारावतश्चिभकंठेत्तिरिपक्षिणि॥३५॥ ॥तसस्त॥ ॥संयुद्वनवनीतंस्याक्लीबंपीयूषचंद्रयोः॥ ॥इतितांतवर्गः॥ ॥थैकम्॥ ॥थंरक्षणेमंगलेचसाध्वसेचनपुंसकम्॥शिलोच्चयेपुमानेवकचित्तुभयरक्षके॥१॥ ॥थहि॥ ॥अंर्थोविषयार्थनयोर्धनकारणवस्तुषु॥अभिधेयेचशब्दानांनिवृत्तौचप्रयोजने॥२॥ अंस्थात्वालंबनास्थानयत्नापेक्षासुयोषिति॥कंथांमृन्मयभित्तौचतथाप्रावरणांतरे॥३॥ कंथःस्यादतिदुःस्थेपिनिष्ठाकेपिद्वयस्यच॥कंथेःस्त्रीपुंसयोर्वर्णकंबलेपुंसिबर्हिषि॥४॥ कोंथौनानेत्ररोगस्यभेदेचशटितेत्रिषु॥ग्रंथोग्रथनाधनयोःस्याच्छास्त्राक्षरसंचयोः॥५॥ग्रंथिस्तुग्रंथिपर्णेनाबंधेरुग्भेदपर्वणोः॥गोंथोश्लोकेसंस्कृतान्यभाषायांगेयवृत्तयोः॥६॥ तीर्थंशास्त्राध्वरक्षेत्रोपायनारीरजःसुच॥अवतारर्षिजुष्टांबुपात्रोपाध्यायमंत्रिषु॥७॥तुत्थमंजनभेदेस्यान्नीलसूक्ष्मेलयोस्त्रियाम्॥दुःस्थःस्याद्दुर्गतेमूर्खेदुःखेनतिष्ठतित्रिषु॥८॥प्रस्थोस्त्रियांमानभेदेसानावुन्नितवस्तुनि॥पीथौऽर्केऽग्नौजलेक्लीबंपृथुस्यान्मरुतित्रिषु॥९॥ त्वक्पर्ण्यांकृष्णाजारेऽस्त्रीपुमानग्नौनृपांतरे॥ग्रीथौऽस्त्रीहयघोणायांनाकत्यामधुगेत्रिषु॥१०॥

मंथः स्यात्पुंसि मंथाने साक्तवे च दिवाकरे ॥ यूथं तिर्यक्समूहे स्त्री पुष्पभेदे च योषिति ॥११॥ रथः पुमान्वयवे स्यंदने वेतसे पिच ॥ शरीरपंक्तौ गृहांगे च रूपकांतरवर्त्मनोः ॥१२॥ संस्थेश्वरेऽवस्थितेस्त्री स्थितौ साद्दश्यनाशयोः ॥ सार्थो वणिक्समूहे स्यादपि संघातमात्रके ॥१३॥ सिक्थो भक्तपुलाके नाम धूच्छिष्टेनपुंसकम् ॥ ॥ ॥ थत्रि ॥ ॥ अतिथिः कुशपुत्रे स्यात्पुमान्गंतुकेभिषु ॥१४॥ अश्वत्थः पिप्पलद्रोस्यादश्वत्थापूर्णिमातिथौ ॥ अन्वयौनिर्व्यथेसर्पेचारटापथ्ययोः स्त्रियाम् ॥१५॥ उन्माथः कूटयंत्रेस्यान्मारणेघातकेपुमान् ॥ उपस्थः शेफशिक्रोडेतथामदनमंदिरे ॥१६॥ उद्रथो रथकीलेस्यात्ताम्रचूडारव्यपक्षिणि ॥ क्षत्रवधुर्नाक्षत्रेकासे कायस्थः परमात्मनि ॥१७॥ नरजातिविशेषेना हरीतक्यांतुयोषिति ॥ कापथः कुत्सितपथेऽशौरेस्त्रीबमिष्यते ॥१८॥ गोग्रंथिर्नाकरीषेस्याद्गोष्ठगोजिद्धिकौषधौ ॥ दमथस्तुपुमान्दंडेदामेचपरिकीर्तितः ॥१९॥ निशीथस्तुपुमान्द्वेरात्रेस्याद्राविमात्रके ॥ निर्ग्रंथो नग्नकेपिस्यान्निःस्वबालिशयोरपि ॥२०॥ प्रथमस्यादूरीतक्यां हरपारिषदेपुमान् ॥ वरूथोरथगुप्तौस्यात्पुंवरूथंचर्मवेश्मनोः ॥२१॥ मन्मथः कामचिंतायां कपित्थेकुसुमायुधे ॥ वयस्थातुस्त्रियांब्राह्मीगुडूच्यामलकीषुच ॥२२॥ सूक्ष्मैलायांचकाकोल्यांपथ्यालीतरुणेभिषु ॥ चमथुःपुंसिचमनेगजस्यकरशीकरे ॥२३॥ विदथोयोगिकृतिनोः शमथः शांतिमंत्रिणोः ॥ षडुंथाशुचचायांस्त्री स्यात्करंजांतरेपुमान् ॥२४॥ समर्थस्तुहितेशक्तेसंबद्धेष्वन्यलिंगकः ॥ सिद्धार्थस्तुपुमान्शस्येसिद्धेचसितसर्षपे ॥२५॥ ॥ थच्चतुः ॥ ॥ अनीकस्थोरणगतेहस्तिशिक्षाविचक्षणे ॥ राजरक्षिणिचिन्हेचवीरमर्दनकेपिच ॥२६॥ अवेदितिकथार्थयाच्यश्रद्धेयनष्टयोः ॥ चतुष्पथंचतुर्मार्गसंगमेब्राह्मणेपिना

अथचित्ररथःसूर्यगंधर्वांतरयोःपुमान्॥दशमीस्थोनष्टवीर्यस्थ
विरेप्यन्यलिंगवत्॥२८॥प्राणनाथोयमेमास्यान्निष्टप्राणाधिपेमतः
॥वानप्रस्थोमधूकेपिस्यात्तृतीयाश्रमेपुमान्॥२९॥भवेदुदरथिः
पुंसिसमुद्रेचवियन्मणौ॥ ॥इतिथांतवर्गः॥ ॥९१४॥
दैकम्॥ ॥दःपुमानचलेदत्तेस्त्रियांशोथमदानयोः॥छेदो
पतापरक्षासूपुमांस्तूदातरिस्मृः॥१॥ ॥दर्हिः॥ अब्दः
संवत्सरेवारि वाहमुस्तकयोःपुमान्॥कंदोस्त्रीसूरणेशस्यमूलेज
लधरेपुमान्॥२॥अंदूःस्त्रियांस्यान्निगडेप्रभेदेभूषणस्यच॥कुंदो
माख्येस्त्रीसुकुंदघ्नमिनिस्यंतरेपुना॥३॥क्षोदःस्यात्पुंसिरजसि
येषणेचप्रकीर्तितः॥गदोव्यातरिविष्णोःस्यादामयेनायुधेगदा॥
४॥छदःपलाशेगरुतिग्रंथिपर्णतमालयोः॥छंदोवशेप्यभिप्राये
धीदापुत्रीमनीषयोः॥५॥नंदिर्धृतांगआनंदेस्त्रीनंदिकेश्वरेपु
मान्॥नदीसरितिशोणादोनानंदास्यादलिंजरे॥६॥गोयंतिथिवि
शेषेस्त्रीनिधिराजभिदोःपुमान्॥निंदास्यादपवादेपिकुत्सायाम
पियोषिति॥७॥पदंशब्देचवाक्येचव्यवसायमदेशयोः॥पादतच्चि
ह्नयोःस्थानत्राणयोरंकवस्तुनोः॥८॥श्लोकपादेपिचक्लीवेपुल्लिंगः
किरणेपुनः॥पादोबुध्नेतुरायांशेशैलप्रत्यंतपर्वते॥९॥चरणेच
मयूरेचवेदालतांतरेस्मृता॥भिक्षुकस्यामपिवंद्यांचविंदुर्दंतक्षतां
तरे॥१०॥भ्रूवोर्मध्येरूपकार्यभ्रुकुतोपृषतेपुमान्॥वेदितर्यन्यलिं
गःस्यात्भद्रंकल्याणशर्मणोः॥११॥मेदोद्वेधेविशेषेस्यादुपजा
पेविदारणे॥मदोरेतसिकस्तूर्यांगर्वेहर्षेमदानयोः॥१२॥मंदोऽ
तीक्ष्णेचमूर्खेचस्थेरेचाभाग्यरोगिणोः॥अल्पेचत्रिषुपुंसिस्याद्
स्त्रिजात्यंतरशनौ॥१३॥मृदुःस्यात्कोमलेतीक्ष्णेरदोदंतेविलेरव
नेः॥विदाज्ञानेचनिर्दिष्टामनीषायांचयोषिति॥१४॥वेदःश्रुतौच
दृत्तेचवेदिःस्यात्पंडितेपुमान्॥स्त्रियामंगुलिमुद्रायांस्यात्परि
स्कृतभूतले॥१५॥शादःस्यात्कर्दमेशष्पेस्वादुर्मेषेमनोज्ञयोः॥

सूदः सूक्थितः सूपकारे च व्यंजनांतरे ॥ १६ ॥ स्वेदस्तु स्वेदने घर्मे हृद्दूक्षीबंबुकचित्तयोः ॥ ॥ दन्तिः ॥ ॥ अंगदः कपिभेदेना केयूरेतिनपुंसकम् ॥ १७ ॥ अंगदायाम्यदिग्दंतिहस्तिन्यामपियोषिति ॥ अर्द्धेंदुरर्द्धचंद्रेस्याद्भल्लहस्तनरांकयोः ॥ १८ ॥ अर्द्धेंदुः स्यादतिप्रीतिस्त्रियोन्यंगुलियोजने ॥ अर्बुदोमांसकीलेस्यात्सुरुषेदशकोटिषु ॥ १९ ॥ महीधरविशेषेनाऽथास्पदंपदकृत्ययोः आमंदोवासुदेवेस्यात्तद्वाभेदेचयोषिति ॥ २० ॥ आक्रंदः क्रंदने ह्वानेमित्रदारुणयुद्धयोः ॥ भ्रातर्यपिचपुंसिस्यादामोदोगंधहर्षयोः ॥ २१ ॥ कुकुद्रूक्षीकुकुदोप्यस्त्रीदृषांकेराद्ध्वजेवरे ॥ क्षणदोगणकेरात्रौक्षणदाक्षणदंजले ॥ २२ ॥ कपर्दःखंडपरशौजटाजूटेवराटके ॥ कर्णोदुरुत्सिप्तिकायांकर्णपाल्यामपिस्त्रियाम् ॥ २३ ॥ क्रव्याद्रक्षसिपुंसिस्यान्मांसाशिन्यन्यलिंगकः ॥ कामदाकामधेनोस्त्रीकामदातरिवाच्यवत् ॥ २४ ॥ कुमुद्वच्चिषुस्यात्कुपणेकैरवेतुनपुंसकम् ॥ कुमुदंकैरवेरक्तपद्मेस्त्रीकुंभिकौषधौ ॥ २५ ॥ गंभार्योपुंसिदिङ्नागनागशारवामृगांतरे ॥ कुसीदंजीवनेवृद्धाकुसीदिचिषुकुसीदिके ॥ २६ ॥ कौमुदःस्यात्कार्तिकेचंद्रिकायांतुकौमुदी ॥ गोष्पदंगोपदभ्वभ्रेगवांचगतिगोचरे ॥ २७ ॥ गोविंदोवासुदेवेस्याद्बृहाध्यक्षेबृहस्पतौ ॥ गोनर्दमपिकैवर्त्तीमुस्तकेपुंसिसारसे ॥ २८ ॥ जलदोमुस्तकेमेघेजीवदोवैद्यविद्विषोः ॥ तरदस्त्रियांपूर्वेपिस्यात्कारंडेचविहंगमे ॥ २९ ॥ तोयदोमुस्तकेमेघेपुमानाज्येनपुंसकम् ॥ दरदस्त्रियांप्रपातेपिभयपर्वतयोरपि ॥ ३० ॥ दारदोविषभेदेस्यात्पारदेहिंगुलेपुमान् ॥ दायादस्तुभवेसुंसिसपिंडेतननयेपिच ॥ ३१ ॥ दृषद्निष्पेषणशिलापट्टप्रस्तरयोःपुमान् ॥ धनदस्तुकुबेरेस्यात्सुहृद्गोदानरिक्थिषु ॥ ३२ ॥ नलदंस्यात्सुष्यरसोशीरमांसीसुनद्योः ॥ नर्मदःकेलिसचिवेनर्मदासरिदंतरे ॥ ३३ ॥ निर्वादःस्याल्लोकवादेपरिनिष्ठितवादयोः ॥ निषादः

स्वरभेदेस्याच्चंडालेधावरांतरे॥३४॥प्रमदःसंमदेमत्तेस्त्रियासु
त्तमयोषिति॥प्रसादोऽनुग्रहेकाव्यगुणस्वास्थ्यप्रसत्तिषु॥३५॥
प्रणादस्तुपुमॉस्तारशब्देचश्रवणामये॥प्रासादोदेवनृपयोर्गृ
हेथवरदास्त्रियाम्॥३६॥कन्यायांवाच्यलिंगस्तुप्रसन्नेचसमर्द्द
के॥भसदस्त्रीभास्वरेयोनौमर्यादासीमनिस्थितौ॥३७॥माकंदः
सहकारेऽस्त्रीधात्रीनगरभेदयोः॥मुकुंदोनिधिभिद्विष्णुरत्नभेदेच
कुंदरोः॥३८॥मेनादस्तुपुमान्केकिमार्जारच्छगलेषुच॥विशदःपां
डरेवक्तेशरदस्त्रीवत्सरेस्मृतौ॥३९॥शारदोऽब्देस्त्रियांतोयपिप्प
लीसप्तपर्णयोः॥सस्येक्लीबंशरज्ञातनूतनाप्रत्तिभेत्रिषु॥४०॥ष
ड्बिंदुःस्यात्कीटभेदपुंडरीकाक्षयोःपुमान्॥संपत्भूतोगुणोत्क
र्षेहारभेदेपिचस्त्रियाम्॥४१॥संविद्स्त्रियांप्रतिज्ञायामाचारज्ञा
नसंगरे॥संभाषणेक्रियाकारेसकेतौनाग्नितोषणे॥४२॥संभेदः
स्फुटनेसंगेस्फुनंदारोचनोमयोः॥ ॥दचतुः॥ ॥अ
भिष्यंदोभिवृद्धौस्यादास्रावेक्षिगदेपिच॥४३॥अष्टापदोऽस्त्री
कनकेशारीणांफलकेपिच॥अष्टापदीचंद्रमल्यांशरभेमर्कटे
पुमान्॥४४॥अवबादस्तुनिंदायामाज्ञाविश्रंभयोरपि॥अभि
मर्दस्तुपुंसिस्यादवमर्देसंपरायेच॥४५॥एकपदंतत्कालेनपुं
सकंवर्त्मनिस्त्रीस्यात्॥कदुकंदःपुमान्शिग्रौशृंगवेरससोनयोः
॥४६॥कुरुविंदंरत्नभेदेमुस्ताकुल्माषयोःपुमान्॥अथकोकन
दंरक्तकुमुदेरक्तपंकजे॥४७॥चतुष्पदीतुपद्येनापशौचकरणो
त्तरे॥भवेज्जनपदोजानपदोपिजनदेशयोः॥४८॥तमोनुदस्तमी
दृकैनाप्रतिपद्स्त्रीतिथौमतौ॥परिवादोपवादेस्याद्दीर्णावाद
नवस्फुटि॥४९॥प्रियंवदःखेचरेनाप्रियवाचितुवाच्यवत्॥पी
ठमर्दोऽतिधृष्टेस्यान्नायकस्यप्रियेपिच॥५०॥पुटभेदोनदीव
केपत्तनातोद्ययोरपि॥महानादःकुंजरेस्याद्दर्षुकाब्देमहास्वने
॥५१॥मुचुकुंदोवृक्षभेदेमांधातृतनयेपिच॥मेघनादस्तुव

रुणेतनयेशरावणस्यच॥५२॥विशारदःपंडितेचधृष्टेविष्णुपदं तुरवे॥क्षीरोदेचस्त्रियांगंगारविसंक्रांतिभेदयोः॥५३॥शशबिंदुः पुमान्वासुदेवेराजांतरेपिच॥शतानंदोमुनेर्भेदेदेवकीनंदनेपि च॥५४॥शतह्रदास्त्रियांषज्जेसौदामिन्यांचकीर्तिता॥समर्या दःसमीपेनामर्यादासहितेत्रिषु॥५५॥ ॥दंपंच॥ ॥ भवेदुपनिषद्वेदेदांतविजनेस्त्रियाम्॥सहस्रपादःकारुंडे मार्तंडेयलपूरुषे॥५६॥ ॥इतिदांतवर्गः॥ ॥ धैकम्॥ ॥धोनाधर्मेकुबेरेचक्लीबंतुवसुनिस्मृतम्॥धो धाचब्रह्मणिख्यातोधातुःस्याद्धारकेपिच॥१॥धीर्ज्ञानेज्ञानभेदे पिधूःस्मृताधूननेस्त्रियाम्॥ ॥धृङ्॥ ॥अंहुंस मांशेरवंडेनाऽघ्रिर्नासरसिवारिधौ॥२॥अंधःस्यात्तिमिरेक्लीबं चक्षुर्हीनेभिधेयवत्॥आधिःपुमांश्चित्तपीडाप्रत्याशाबंधके षुच॥३॥व्यसनेचाप्यतिष्ठानेविन्दूमातपदीसयोः॥ऋन्दूंसंप न्नधान्येचसुसमृद्धेचवाच्यवत्॥४॥ऋद्धिस्तुरूयोषधीभेदे समृद्धावपियोषिति॥गंधःप्रतिवेश्यामोदलेशसंबंधगंधके॥ ५॥गाधःस्नानेचलिप्सायांगोधातलनिहाकयोः॥दधिक्षीरो त्तरावस्थाभावेश्रीवाससर्जयोः॥६॥दग्धंपुष्टेऽन्यलिंगंस्यान् स्त्रियतार्कदिशिचस्त्रियाम्॥दिग्धोविषाक्तबाणेस्यात्पुंसिलि ङ्गेऽन्यलिंगकः॥७॥दुग्धेमपूरितेक्षीरेदुग्धीक्षीरविकोषधौ॥ दोग्ध्रार्थोपजीविकवोवत्सगोपालयोःपुमान्॥८॥धन्धोबन्धे नयोर्दृत्तेबंधआधोचबंधने॥बंधुःस्यात्पुंसिबंधूकेमित्रेभ्रा तरिबांधवे॥९॥बाधादुःखेनिषेधेचबुधःसौम्येचपंडिते॥ बुन्धोजिनेलब्धवर्णेपुंसिस्याद्युधितेऽन्यवत्॥१०॥बोधिःपुंसि समाधेश्चभेदेपिप्पलपादपे॥मधुपुष्परसेक्षौरेमद्येनातुम धुद्रुमे॥११॥वसंतदैत्यभिक्षेभेस्याज्जीवत्यांतुयोषिति॥मि न्दूंचित्ताभिसंक्षेपेक्लीबमालस्यचित्तयोः॥१२॥मुग्धस्तुसुंदरे

मूढे मेधाबुद्धोक्तौपुमान्॥राधोमासांतरेराधाचित्रभेदेचधन्विनाम्॥१३॥गोपीविशाखयामलकीविष्णुकांतासुविद्धति॥लुब्धआकांक्षिणिव्याधेवधूःस्त्रीशारिवौषधौ॥१४॥लुषाशठीनवोढासुभार्यापृक्कांगनासुच॥व्याधिःकुष्ठेचरोगेनाव्याधोमृगयुदुष्टयोः॥१५॥तारामयेरवेचविधुनाकर्पूरेंदुहारिषु॥विद्धस्याद्वेधितेक्षिसेसदृशेबाधितेत्रिषु॥१६॥विधिर्नानियतौकालेविधानेपरमेष्ठिनि॥विधागजासनेरुद्रेप्रकारेवेतनेविधौ॥१७॥वृद्धोजीर्णेप्रवृद्धेज्ञेत्रिषुक्लीबंतुशोलजे॥वृद्धिस्तुवर्द्धनेयोगेष्यष्टवर्गौषधांतरे॥१८॥कालांतरेचाभ्युदयेसमृद्धावपियोषिति॥श्रद्धाऽदरेचकोक्षायांश्राद्धंश्रद्धान्वितेत्रिषु॥१९॥हव्यकव्यविधौक्लीबंशुद्धंस्यात्त्रिषुकेवले॥निर्दोषेचपवित्रेचसंधास्थितिप्रतिज्ञयोः॥२०॥स्पर्धासंघर्षणेपिस्यात्साम्येकर्मसमुन्नतौ॥संधिःपुमान्सुरुंगायांभगेसंघट्टनेपिच॥२१॥रूपकानांमुखाद्यंगेसावकाशेपिकीर्तितः॥स्कंधःस्यान्नृपसावंशेसंपरायसमूहयोः॥२२॥कायेतरुप्रकांडेचभद्रादौच्छंदसोभिदि॥साधुर्वाधुषिकेचारोसज्जनेचाभिधेयवत्॥२३॥सिद्धोनाव्यासदोभेदेयोगस्यदेवयोनेश्च॥त्रिषुनिष्पन्नेस्निग्धंस्नेहयुतेचिक्कणेपिस्यात्॥२४॥सिंधुर्नमश्चदेशाब्धिनदेनासरितिस्त्रियाम्॥सिद्धिःस्त्रीयोगनिष्पत्तिपादुकांतर्हरेदृढे॥२५॥स्कंधास्त्रीलेपनेमूर्व्यांस्नुहीगंगेष्टकामृते॥ ॥धन्निः॥ ॥अवधिःस्त्ववधानेस्यात्सीम्निकालेबिलेपुमान्॥२६॥अगाधमतलस्पर्शेत्रिषुश्वभ्रेनपुंसकम्॥अनद्वुत्सुरजातौचक्लीबंस्यात्संदितेत्रिषु॥२७॥आविद्धोवाच्यलिंगस्यात्कुटिलेचपराहते॥आबद्धोदृढबंधेस्यात्प्रेमालंकारयोर्द्वयोः॥२८॥उत्सेधस्तूच्छ्रयेनस्त्रीक्लीबंसन्नहनेपिच॥उपाधिर्धर्मचिंतायांकुटुंबव्याप्तेच्छलेऽपि॥२९॥विशेषणेपुंस्युपधिःपुंसिव्याजरथांगयोः॥कबंधोऽस्त्रीक्रियायुक्तव्यमूर्द्धकलेवरे॥३०॥क्लीबंजलेपुंस्युदरेवाहुरक्षोविशेषयोः॥दु

र्विधो वाच्यलिंगःस्याद्दुर्गतेपिरवलेपिच ॥ ३१॥ न्यग्रोधस्तरुपुमान्न्या
मवटयोश्चशमीतरौ॥ न्यग्रोधी तूपचित्रायांनिरोधोनाशरोधयोः
॥३२॥ निषधः कठिनेदेशेतद्राजेपर्वतांतरे॥ परिधिर्नार्ययज्ञियदुशा
खायामुपसूर्यके॥३३॥ प्रसिद्धोभूषितेरव्याते प्रणिधिर्माऽनुचरेच
रे॥ मागधी स्त्रीकणायूथ्योर्वाच्यवन्मगधोद्भवे॥३४॥ पुंसिवैश्या
क्षत्रियाजेशुकूजीरकबंदिनोः॥ विबधोवीवधश्चापिपर्याहारेऽ
ध्वभावयोः॥३५॥ विश्रब्धोऽनुद्भटेपिस्याद्गादविश्वस्तयोस्त्रिषु॥ वि
बुधोज्ञेसुरेवीरुत्तुलसीविटपयोःस्त्रियाम्॥३६॥ सन्नद्धोवर्मितेव्यू
ढेसंबाधःसंकटेभगे॥ सन्निधिःसन्निधानेपिपुमानिंद्रियगोचरे
॥३७॥ संसिद्धिःप्रकृतोसिद्धोमदोयायामपिस्त्रियाम्॥ संबोधो
बोधनेक्षेपेसमाधिर्नासमर्थने॥३८॥ ध्याननीवाकनियमेकाव्य
स्यचगुणांतरे॥ ॥धचतुः॥ ॥अवरोधस्तिरोधाने
राजदारेषुतद्गृहे॥३९॥ अवष्टब्धोविदूरेस्याद्गाढांतेचावलंबि
ते॥ अनुबंधस्तबंधेस्याद्धोषोत्पादेविनश्वरे॥४०॥ सुरव्यानुयायि
बालेचप्रकृतस्यानिवर्तने॥ अनुबंधीतुहिंक्कायांतृष्णायामपि
योषिति॥४१॥ अनिरुद्धउषानाथेपुंसिचाऽबंधनेऽन्यवत्॥ आ
शाबंधःसमाश्वासेपुंसिमर्कटजालके॥४२॥ इष्टगंधःसुगंधौ
स्यात्त्रिषुक्लीबंतुवालुके॥ इक्षुगंधाकोकिलाक्षेकोष्ट्यांकाशेच
गोक्षुरे॥४३॥ उपलब्धिर्मतौप्राप्तावपिज्ञानेचयोषिति॥ उग्र
गंधाजमोदायांवचायांछिक्कौषधौ॥४४॥ कालस्कंधस्तमालेस्या
न्निंदुकेजीवकद्रुमे॥ तीक्ष्णगंधावचायांराजिकयोःशोभांजने
पुमान्॥४५॥ तृणगोधाचित्रकोलेकृकलासेपियोषिति॥ परि
व्याधस्तुपुंसिस्याद्दंतसेचबुमोत्पले॥४६॥ ब्रह्मबंधुरधिक्षिप्ते
निर्देशेब्राह्मणस्यना॥ महौषधंतुशृंग्यांस्याद्भूषायांलशुनेपिच
॥४७॥ समुन्नद्धःसमुद्भूतेपंडितंमन्यगर्विते॥ ॥ध
पंच॥ ॥योजनेगंधाकस्तूर्यांसीतायांव्यासमात

षि॥४८॥ ॥इतिधांतवर्गः॥ ॥नेकम्॥ ॥
नःपुमान्सुगतेबंधेदूरंडेमस्ततेपिच॥ ॥नहिः॥ ॥
अग्निर्वैश्वानरेपिस्याच्चित्रकारव्योषधौपुमान्॥१॥अन्नंभक्तेच
भुक्तेस्यादिनःपत्यौनृपार्कयोः॥उन्नंक्लिन्नेचसुरतेरुत्नंसर्वेषु
कुक्षिषु॥२॥घनंस्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः॥नासुस्ता
ध्योघदार्ढ्येषुविस्तारेलोहमुद्गरे॥३॥स्निग्धेसांद्रेदृढेचाथचिन्हंल
क्ष्मपताकयोः॥चीनोदेशांशुकद्रोहिभेदेतंतौमृगांतरे॥४॥छन्नं
सुरहसिक्लीबंछादितेवाच्यलिंगवत्॥छिन्नंलुप्तेभिलिंगेस्याद्रु
ढ्यामपियोषिति॥५॥जनोलोकेमहर्लोकात्परलोकेचपामरे॥
जेनीसीमंतिनीबध्वोरुत्पत्तावोषधीभिदि॥६॥जन्हुःस्यात्पुंसिरा
जर्षिभेदेचमधुसूदने॥ज्यानिर्जीर्णेचहानौचतद्विन्यामपियोषि
ति॥७॥जिनोर्हतिचबुद्धेचपुंसिस्याज्जिस्वरेत्रिषु॥ज्योत्स्नाचंद्रा
तपेपिस्याज्योत्स्नायुक्तनिशिस्मृता॥८॥ज्योत्स्नीपटोलिकायांस्या-
ज्योत्स्नायुक्तनिशिस्त्रियाम्॥तनुःकायेत्वचिस्त्रीस्यात्स्निग्धस्थिर
लेहशे॥९॥दानंगजमदेत्यागेपालनच्छेदखंडिषु॥दानुर्दानवि
विक्रांतेदीनास्त्रीमूषिकेस्त्रियाम्॥१०॥धाच्यवदुर्गतेभीतेद्युम्न
वित्तेबलेपिच॥धनुःपुमान्पियालद्रोराशिभेदेशरासने॥११॥ध
नंसुगोधनेवित्तेधानाभृष्टयवेपिच॥धान्याकेभिनवोद्भिन्नेधेनी
नव्यांबुदेपुमान्॥१२॥नग्नोबंदिक्षपणयोःपुंसिस्त्रियांविवाससि
॥न्यूनंगर्त्तोनयोःपानंपीतिभाजनरक्षणे॥१३॥भानुर्नीकरणे
सूर्येभिन्नःस्यात्रिषुदारिते॥संगतेऽन्यवशुद्धेचमानश्चित्तोन्न
तोगृहे॥१४॥क्लीबंप्रमाणेप्रस्थादौमीनोराश्यंतरेझषे॥मुनिःपुं
सिवसिष्ठादौयंकसेननरोजिने॥१५॥मृत्स्नामृत्सानुयर्योःस्त्रीया
नंस्याद्वाहनेगतौ॥योनिःस्त्रीपुंसयोश्चस्यादाकरेस्मरमंदिरे॥
१६॥रत्नंस्वजातिश्रेष्ठेपिमणावपिनपुंसकम्॥रास्नाचस्याद्भुजं
गाक्ष्यांएलापर्ण्यामपिस्त्रियाम्॥१७॥लग्नेराश्युदयेक्लीबंसक्त

लज्जितयोस्त्रिषु॥ वस्त्रन्तत्वविक्रयेपुंसि वेतनेस्यान्नपुंसकम्॥
॥१८॥ वनंनपुंसकंनीरेनिवासालयकानने॥ वन्हिर्वैश्वानरेपिस्या
च्चित्रकारेऽौषधौपुमान्॥१९॥ वानंशुष्कफलेशुष्कस्यूतिकर्मक
देगतौ॥ विन्नंविचारितेलब्धेबुध्नोनामूलरुद्रयोः॥२०॥ श्वापुमा
न्कुक्कुरेस्यातःस्थानभेदेचवास्तुनः॥ शीनोमूर्खेचाजगरेश्येनः
पक्षिणिपांडुरे॥२१॥ स्नभ्रःस्यापेमरुसस्यविज्ञानेदर्शनेपुमान्॥
सानुरस्त्रीवनेप्रस्थेवात्यामार्गाग्रकोविदे॥२२॥ स्थानंसादृश्येऽव
काशेस्थितौदृष्टिक्षयेनरे॥ स्त्यानंस्निग्धेप्रतिध्वानेधनतालस्य
योरपि॥२३॥ स्नानंस्नानीयेऽभिषवेसूनंप्रसवपुष्पयोः॥ सूना
पुच्यांवधस्थानेगलशुंडिकयोस्त्रियाम्॥२४॥ सूनुःपुत्रेनुजेकेना
सूनुःकिरणसूर्ययोः॥ हनुर्हट्टविलासिन्यांसूनावज्ञेगदेस्त्रियां
॥२५॥ हृयोःकपोलावयवेहीनंगर्ह्येनयोस्त्रिषु॥ ॥न-
ञिः॥ ॥अंजनंकज्जलेचाक्षोसोवीरेचरसांजने॥२६॥ पुं
सिज्येष्ठादिग्गजयोरंजनावानरीभिदि॥ अंजनीलेप्यनार्यो-
चावनेप्रीतौचरक्षणे॥२७॥ अयनंपथिभानोरप्युदग्दक्षिणतो
गतौ॥ अपानंतुगुदेक्लीबंपुंसिस्यात्तस्यमारुते॥२८॥ असनंक्षे
पणेक्लीबंपुंसिस्याज्जीवकद्रुमे॥ अंगनंप्रांगनेयाने कामिन्या
मंगनामता॥२९॥ अर्जुनःककुभेपार्थेकार्तवीर्यमयूरयोः॥ मातु
रेकसुतेपिस्यात्पुंल्लिंगोधवलेऽन्यवत्॥३०॥ नपुंसकंतृणेनेत्रग
देचाप्यर्जुनीगवि॥ उषायांबाहुदानघांकुट्टिन्यामपिचक्वचित्
॥३१॥ अम्लानोमहासहायांनान्यलिंगस्तुनिर्मले॥ अशोघ्रो
तालमूल्यांस्यादशोग्रःसूरणेपिच॥३२॥ असिक्नीस्यादृष्टदंतः
पुरप्रेष्यानदीभिदोः॥ अशनिःस्त्रीपुंसयोस्याच्चंचलायांपचाव-
पि॥३३॥ अरत्निर्नासमकोष्ठततांगुलिकरेपिच॥ कफोणावध्य
थालीस्याद्दृश्यिकेभ्रमरेपुमान्॥३४॥ अर्थीपुमान्याचकेस्यात्
सेवकेचविवादिनि॥ अध्वानापथिसंस्थानेस्यादवस्कंदकाल-

योः॥३५॥अर्वातुरंगमेपुंसिकुत्सितेवाच्यलिंगकः॥आसनंद्विरदस्कंधेपीठेयात्रानिवर्तने॥३६॥आसनीविपणोस्थित्यामासनोनातुजीरके॥आदानंग्रहणेपिस्यादलंकारेचवाजिनाम्॥३७॥आपन्नःसंविपत्तौचप्राप्तेवाच्यवदीरितः॥आत्मापुंसिस्वभावेपिप्रयत्नमनसोरपि॥३८॥धृतावपिमनीषायांशरीरब्रह्मणोरपि॥आलानंकिरणांबंधस्तंभेरज्जौचनस्त्रियाम्॥३९॥ईशानंज्योतिषिक्लीबंपुल्लिंगःस्यान्निलोचने॥उत्तानमगभीरेस्यादूर्ध्वास्यशयितेत्रिषु॥४०॥उत्थानमुद्यमेतंत्रेपौरुषेपुस्तकेरणे॥प्रांगणोद्भवहर्षेषुमलरोगेपिनद्वयोः॥४१॥उद्यानंस्यान्निःसरणेवनभेदेप्रयोजने॥उद्दानोप्युदरावर्त्तेवायुभेदेभुजंगमे॥४२॥उन्हानमुद्भूतेवाच्यलिंगंचुल्यांनपुंसकम्॥ओदनंनस्त्रियांभक्तेबलायामोदनीस्त्रियाम्॥४३॥कमनःकामुकेकामेऽभिरूपेऽशोकपादपे॥कंपनंनद्वयोःकंपेकंप्रेस्यादभिधेयवत्॥४४॥कठिनंमपिनिष्ठुरेस्यात्तब्धेपित्रिषुनपुंसकंस्थाल्याम्॥कठिनीखदिरायामपिकठिनागुडशर्करायांच॥४५॥क्रंदनंरोदनेपिस्यादाह्वानेप्यथकल्पना॥करिणःसज्ज्ञनायोस्त्रीक्लीबंलुप्तेचकल्पने॥४६॥कर्तनंनद्वयोश्छेदेनारीणांसूत्रनिर्मितौ॥कर्मास्त्रीव्याप्यक्रिययोःकदनंमर्दपापयोः॥४७॥कांचनःकांचनारेस्याच्चंपकेनागकेसरे॥उदुंबरेचधत्तूरेहरिद्रायांचकांचनी॥४८॥क्लीबंजकेसरेहेम्निकामिनीभारुवंद्वयोः॥कामीतुकामुकेचक्रचाकेपारावतेपिच॥४९॥कानीनःकन्यकाजाततनयेव्यासकर्णयोः॥काकिनीपणपादेपिमानपादवराटके॥५०॥काननंविपिनेगेहेपरमेष्ठिसुखेपिच॥कुहनंमृत्तिकाभांडविशेषेकांचभाजने॥५१॥कुहनादंभचर्यायामीर्ष्यालौकुहनंत्रिषु॥कृतीस्यात्पंडितेयोग्येकेतनंतुनिमंत्रणे॥५२॥गृहेकेतोचकृत्येथकेशीकेशवतित्रिषु॥दैत्येनाचौरपुष्प्यांस्त्रीकोलीनंकुत्सजन्ययोः॥५३॥कुकर्मणिकुलीनत्वेयुद्वेपश्चद्विपक्षिणो

मारःस्याच्छुकेस्कंधेयुवराजेऽभ्यचारके॥३९॥ बालकेवरुणद्रोणा
नद्वयोर्जात्यकांचने॥ कुमारीशैलतनयानवमाल्योर्नदीभिदि॥
४०॥ सद्यःपराजिताकन्याजंबूद्वीपेषुचस्त्रियाम्॥ कुठारुर्नद्रुमे
केशेकुट्टारंकेवलेरते॥४१॥ कुबेरःस्यात्पुंसिनदीवृक्षेपुण्यजने
श्वरे॥ कूबरस्त्रिषुचारौनाकुब्जकेऽस्त्रीयुगंधरे॥४२॥ केसरंहिं
गुनिकुंकुमेकिंजल्केनस्त्रियांपुमान्॥ सिंहच्छटायांपुन्नागेबकुले
नागकेसरे॥४३॥ केदारोद्वीशिवक्षेत्रेभूमिभेदालवालयोः॥ के
नारःपुंसिनरकेशिरःकपोलसंज्ञिषु॥४४॥ कोदिरःपुंसिनकुले
शक्रगोपकशाक्रयोः॥ कोट्टारोनागरेकूपेपुष्करिण्याश्वपाटके
॥४५॥ खपुरःक्रमुकेभद्रमुस्तकेऽलसकेपिच॥ खर्परस्तस्करे
धूर्त्तेशिक्षाभाण्डकपालयोः॥४६॥ खर्जूरंरूक्षरालयोर्हृश्विके
नाद्रुमेद्वयोः॥ खदिरोशाकभेदेस्त्रीनाचंद्रेदंतधावने॥४७॥ख
ड्गाश्वमश्वलेशेस्यात्तथादंतक्षतांतरे॥ खिंखिरस्फुरिणाभेदे
खड्गांगेचारिधानके॥४८॥ गणेरुःकर्णिकारद्रोकरिणीवेश्ययोः
स्त्रियाम्॥ गर्गरोमीनभेदेस्त्रीमंथान्यामथगर्करः॥४९॥ गुहाग
हनदंभेषुनिकुंजेतुपुमानयम्॥ गांधारःपुंसिसिंदूरेरागदेशभ्र
भेदयोः॥५०॥ गायत्रीत्रिपदादेवीछंदोभित्खदिरेपुच॥ गोपुरं
हरिपूर्द्वारिकेवर्तीमुस्तकेपिच॥५१॥ घर्घरोनाचलद्वारिद्वारोल्
फनदांतरे॥ स्त्रीक्षुद्रघंट्यांवीणायाभेदेस्वरांतरेपिच॥५२॥च
मरंचामरेस्त्रीतुमंजरीमृगभेदयोः॥ चंदिरोऽनेकपेचंद्रेचत्व
रंस्थंडिलेंगने॥५३॥ चक्करःस्यंदनेवृक्षेचातुरीनेम्रगोचरे॥
चादुकारिनियंत्रोश्वत्रिषुदास्येतुचातुरी॥५४॥ चक्रगंडोच-
पुंसिस्याच्चामरंचामरापिच॥ दंडेचबालव्यजनेचिकुरस्तर
लागयोः॥५५॥ पक्षिवृक्षभिदोःकेशेगृहबभ्रोसरीसृपे॥ छिद

रच्छेदनद्रव्ये धूर्ते वैरिणिचत्रिषु॥ जठरोनस्त्रियांक्षीरेदुग्धकर्कटयोःस्त्रिषु॥५७॥ जर्जरंशैवलेशङ्खध्वजेत्रिषुजरातुरे॥ जंबीरःप्रस्थपृष्टेस्यात्पुंसिदंतशठद्रुमे॥५८॥ जलेंद्रःपुंसिवरुणेजंभलेचमहोदधौ॥ झर्झरःस्यात्कलियुगेवाद्यभांडेनदांतरे॥५९॥ झल्लरीझल्लरीचद्वेहुलुकेबालकुंतले॥ टट्टरीस्यान्मृषावादेलंपाटहवाद्ययोः॥६०॥ टंकारोविस्मयेपुंसिप्रसिद्धेसिंजिनीध्वनौ॥ टगरष्टंकणक्षारेहेलाविघ्नमगोचरे॥६१॥ नान्यवक्त्रेकराक्षेस्यात्डिंगरोडंगरेपिच॥ क्षेपेतमिस्रंतिमिरेकोपेस्त्रीतुतमस्तनौ॥६२॥ कृष्णपक्षनिशायांच त्वक्पत्रंतुवरांगके॥ स्त्रीकार्य्यांच तिमिरंध्वांतेनेत्रामयांतरे॥६३॥ तीवरोनांबुधौव्याधेतुंबुरीकुकुरस्त्रियाम्॥ धन्याकेपितुषारस्तुशीकरेशीतलेहिमे॥६४॥ तुवरस्तुकषायेस्यात्काक्ष्यादक्ष्योस्तुवर्यपि॥ तूवरोऽश्मश्रुपुरुषेप्रोदाश्वंगारकेपिच॥६५॥ पुरुषव्यंजनत्यक्तेस्यात्कषायरसेपिच॥ दहरोमूषिकायांचस्वल्पभ्रांतरिबालके॥६६॥ दंतुरस्तून्नतरदेतथोन्नतननेत्रिषु॥ दर्दरःपर्वतेपुंसित्रिषीषद्भग्नभाजने॥६७॥ दर्दुरस्तोयदेभेकेवाद्यभांडाद्रिभेदयोः॥ दर्दुरांचंडिकायांस्याद्भ्रामजालेनपुंसकम्॥६८॥ दंडारोवहलेमत्तवारणेशरयंत्रके॥ कुंभकारस्यचक्रेच द्वापारःसंशयेयुगे॥६९॥ दासेरोदासिकापत्येत्रिषुपुंसिक्रमेलके॥ दुर्धरःपुंसिनरकांतरेस्याद्दृषत्यौषधौ॥७०॥ दैत्यारिःपुंसिसामान्यदेवेचगरुडध्वजे॥ धूसरीकिन्नरीभेदेनारवरेत्रिषुपांडुरे॥७१॥ नरेंद्रस्तुमहीपालेविषवैद्येचपुंस्ययम्॥ नर्मरातुदरीभस्त्रासरलानिष्फलासुच॥७२॥ नागरेमुस्तकेशृंग्यांविदग्धेनगरोद्भवे॥ निकरोनिवहेसारेन्यायदेवधनेनिधौ॥७३॥ निर्झरस्तुसहस्रांशुतुरंगेतुषपाथके॥ निर्जरःस्यात्सुमान्देवेजरात्यक्तेचवाच्यवत्॥७४॥ निर्जरातुगुडूच्यांचनाडपर्ण्यामपिस्त्रियाम्॥ निकारःस्यात्परिभवेधान्यस्योत्क्षेपणे

पिच॥७५॥ निर्दरेनिर्झरेसारेऽन्यवत्तुकठिनेऽत्रये॥स्यान्नीवरो वणिजकेधारुव्येचपुमानयम्॥७६॥ प्रवरः संततौगोत्रेक्लीबं श्रेष्ठेतुवाच्यवत्॥प्रवरो हयसन्नाहेकुक्कुरेऽश्वतरेऽपिच॥७७॥पुंसित्रिषत्यंतस्वरेपवित्रंवर्षणेकुशे॥ताम्रेपयसिचक्लीबंमेध्येस्यादभिधेयवत्॥७८॥ प्रदरोरोगभेदेस्याद्दारेशरभंगयोः॥प्रकरःस्यात्पुमान्संघेविकीर्णेकुसुमादिषु॥७९॥नपुंसकंजोंगकेस्त्रीनाट्यांगेचत्वराबलौ॥पंकारःशैवलेसेतौसोपानेजलकुंजके॥८०॥ प्रस्तरोग्रावणिमणौप्रकारस्तुल्यभेदयोः॥पदारः पादधूलौस्यात्पादालिंदेपिपुंस्ययम्॥८१॥प्रसरःप्रणयेवेगेस्यात्याठीरस्तुमूलके॥देकारेवेणुसारेचवारिदेतितउन्यपि॥८२॥ स्याद्रंगेचातिकेपुंसिपामरःखलनीचयोः॥पांडुरंस्यान्मरुबकेवर्णेनातद्वतित्रिषु॥८३॥पार्परीभक्तसिक्थेस्यात्क्षीनाशोरजयक्ष्मणि॥जरादेपिकदंबस्यकेसरेचगदांतरे॥८४॥प्रांतरेविपिनेदूरशून्यवर्त्मनिकोटरे॥पिठरःस्थाल्यांनाक्लीबंमुस्तांमथानदंडयोः॥८५॥पिंजरोश्वांतरेक्लीबंस्वर्णेपीतेचवाच्यवत्॥पिंडारःक्षेपणेगोपेमहिषीरक्षकेद्रुमे॥८६॥पीवरःकच्छपेस्थूलेपुष्करंरवेंबुपद्मयोः॥तूर्यवक्त्रेखड्गफलेहस्तिहस्ताग्रयोरपि॥८७॥कुष्ठौषधेद्वीपतीर्थभेदयोश्चनपुंसकम्॥नारोगनागविहगनृपभेदेषुवारुणे॥८८॥ बंठरःस्थगिकारज्जोलांगूलेकुक्कुरस्यच॥करीरकोशेतालस्यपल्लवेचपयोधरे॥८९॥बंधुरंमुकुटेपुंसिस्त्रीचांगतैलकल्कयोः॥बंधूकेबधिरेहंसेत्रिषुस्याद्भग्नभग्नयोः॥९०॥ बंधुरापण्ययोषायांस्त्रियांभूम्निचसक्तुषु॥बंधुरःशोभनेनम्रेचरत्नारज्जुकक्षयोः॥९१॥भ्रमरःकासुकेभृंगेभ्रामरंमधुनिस्मृतम्॥पुंसिप्रस्तरभेदेथभास्करोऽग्नौप्रभाकरे॥९२॥भार्यारुःशैलभेदेस्यान्मृगभेदेचतत्रच॥क्रीडायापरभार्यायांपुत्रोयेनोपपादितः॥९३॥भृंगारीझिल्लिकायां

स्यात्कनकालोपुनःपुमान्॥ मत्सरामक्षिकायांस्यान्मात्सर्यंक्रोधयोःपुमान्॥९४॥असत्यपरसंपत्तौकृपणेचाभिधेयवत्॥ मधुराशतपुष्पायांमिश्रेयानगरीभिदोः॥९५॥मधुकर्कटिकामेदामधूलीयष्टिकासुचा॥क्लीबंवीर्येपुंसिरसेतद्वत्त्वादुप्रियेन्यवत्॥९६ मंदरस्तुपुमान्मंथशैलेमंदारपादपे॥वाच्यवद्धलेमंदेमंदारःस्यात्सुरद्रुमे॥९७॥पारिभद्रेकर्पूरेचमंदारोहस्तिधूर्तयोः॥ मंदिरंनगरेऽगारेक्लीबंनामकरालये॥९८॥मंथरःकोशफलयोर्वोधमंथानयोःपुमान्॥कुसुंभ्यानद्वयोर्मंदेपृथौबकेभिधेयवत्॥९९॥मकरोयादसोभेदेनिधिराशिप्रभेदयोः॥मयूरोबर्हिचूडायामपामार्केशिरंडिनि॥२००॥महेंद्रःपर्वतेशक्रेमधुद्रोऽलोचकासुके॥मंदुराबाजिशालायांशयनीयार्थवस्तुनि॥१॥ मसूरोमसुराबानावेश्याग्रंथिप्रभेदयोः॥मसूरीपापरोगेस्यादुपधानेपुनःपुमान्॥२॥मर्मरोवस्त्रभेदेचशुष्कपर्णध्वनौतथा॥पुंसिस्त्रियांपुनःप्रोक्तामर्मरीपीतदारुणि॥३॥मंजरीतिलकद्रुमुक्तयोर्वल्लरीद्वयोः॥मकुरःस्यान्मुकुलवद्दर्पणेबकुलद्रुमे॥४॥कुलालदंडेमार्जारोव्यालेऽर्कपार्श्वपार्श्विके॥मार्जारोतीरवद्वाशेमिहिरःसूर्यवृद्धयोः॥५॥मुद्गरंमल्लिकाभेदेपुंसिलोष्टादिभेदने॥मुदिरःकामुकेमेघेमुहिरःकाममूर्खयोः॥६॥मुर्मुरस्तुषवन्हौस्यान्मन्मथेरविवादिनि॥मृगारिःस्यात्पुंसिकंठीरवशार्दूलयोरपि॥७॥रुधिरोंगारकेपुंसिक्लीबंतुकुंकुमासृजोः॥ बदराबृष्टिकार्पास्योरेलापर्ण्यांस्त्रियांपुमान्॥८॥कार्पासस्यास्थिबदरीकोलेक्लीबंतुतत्फले॥बचरःकुक्कुटेपुंसिशठेचबशिरःपुमान्॥९॥किणिहीहस्तिपिप्पल्योःक्लीबेऽखिलवणेस्मृतः॥बर्बरःपामरेकेशेचक्रलेनीवृदंतरे॥१०॥फंजिकायांपुमान्शाकभेदपुष्पभिदोःस्त्रियाम्॥बर्करःपरिहासेस्याच्छागेपुंवपशावपि॥११॥बल्लुरंशार्दूलक्षेत्रेगृहनौषधयोरपि॥बल्लूरा

त्रिषु संशुष्कमांसभृकरमांसयोः॥१२॥ **वार्दरं** कृष्णलाबीजदक्षिणावर्तशंखयोः॥ वीरेकाकचिंचायांभारत्यांचनपुंसकम्॥१३॥ **वागुर** स्नुगतांतेकेमुमुक्षोवातवेष्टके॥ विशारदेपिशाणेपिनिर्नयेवारकेपिच॥१४॥ **वासर** स्कपुमान्नागप्रभेदेदिनयोरपि॥ **वासरा** वासितायांस्याद्वासतेयस्युविस्रियाम्॥१५॥ **विष्टरः** कुशमुष्टौस्यादासनेपिमहीरुहे॥ **विस्तरो** वाक्प्रपंचेस्याद्विस्तारेप्रणयेपिच॥१६॥ **विदुरो** नागरेधीरेकौरवाणांचमंत्रिणि॥ **विधुरं** स्यात्परिश्लेषेनष्टयोर्विकलेत्रिषु॥१७॥ रसालायांस्त्रीविदारोज्जलोक्षासाजिदारणे॥ **विदारी** शालपर्ण्योचरोगभेदेक्षुगंधयोः॥१८॥ **विवरं** दूषणेगर्तेविसरः प्रसरेव्रजे॥ **विस्तारो** विस्तृतौस्तंबेविकारोविकृतौरुजि॥१९॥ **विहारो** भ्रमणेस्कंधेलीलायांस्कगतालये॥ **शबरो** म्लेच्छभेदेचपानीयेशंकरेपिच॥२०॥ **शंबरं** सलिलेपुंसिमृगदैत्यविशेषयोः॥ **शंबरी** चारुपर्ण्यांस्याच्छंवरीयामिनीस्त्रियोः॥२१॥ **शर्करा** खंडविकृतावुपलाकर्पुरांशयोः॥ शर्करान्वितदेशेपिरुग्भेदेशकलेपिच॥२२॥ **शष्करी** च्छंदसोभेदेनदीमेखलयोरपि॥ **शणीरं** शोणमध्यस्थेपुलिनेदर्दरीतटे॥२३॥ **श्वशुरः** पूज्येस्त्रीआत्म्यांशारीरं देहजेदृषे॥ **शार्करः** स्याद्दुग्धफेनेशर्करान्वितदेशयोः॥२४॥ **शांकरस्कबलीवर्दे** छंदोभेदेनपुंसकम्॥ **शार्वरं** त्वंधतमसेधातुकेभेद्यलिंगकम्॥२५॥ **शालारं** स्याद्वृत्तिनरवेसोपानेपक्षिपंजरे॥ **शाबरी** भूकशिंब्यांस्यात्पुंसिपापापराधयोः॥२६॥ रोभेचशांकरिः पुंसिकार्तिकेयेगणाधिपे॥ **शिरवरो** ऽस्त्रीद्रुमाग्राद्रिशृंगेपुलककक्ष्ययोः॥२७॥ पक्वदाडिमबीजाभमाणिक्यशकलाग्रयोः॥ **शिशिरो** नाहिमेनस्त्रीऋतुभेदेजडेत्रिषु॥२८॥ **शिलिंध्रं** कंदलीपुष्पेकबरेनाम्नषांतरे॥ द्वुभेदेस्त्रीतुविहगीभेदगंधपदीमृदोः॥२९॥ **शीकरः** शरलेवातस्रुतांबुकणयोः पुमान्॥ **शुक्तिरं** शादिवाद्येविवरेपिनपुंसकम्॥३०॥ मूषिकेनास्त्रियांगर्ते

वन्हौरंध्रान्वितेत्रिषु॥ शृंगारः स्करतेनाढ्यरसेचगजमंडने॥३१॥नपुं सकंलवंगेपिनागसंभवचूर्णयोः॥ संबरोदैत्यहरिणमत्स्यशैलजि नांतरे॥३२॥नपुंसकंतुसलिलबोड्डघृतविशेषयोः॥ संकरोऽग्निच टत्कारेसंमार्जन्यचपूजिते॥३३॥नचदूषितकन्यायांसंकरीपुनरु च्यते॥ संस्कारःप्रतियत्नेनुभवेमानसकर्मणि॥३४॥ संस्तरःप्रस्त रेयज्ञेसंगरोयुधिचापदि॥ क्रियाकारेविषेचांगीकारेक्लीबंशमीफ ले॥३५॥ संभारःसंभृतौसंघेसामुद्रंदेहलक्षणे॥ समुद्रजेऽन्यलिं गोऽथसावित्रःशंकरेवसौ॥३६॥सावित्रीसत्यवत्पत्न्यांब्रह्मपत्नु मयोरपि॥ सिंदूरस्तरुभेदेस्यात्सिंदूरंरक्तचूर्णके॥३७॥सिंदूरी रोचनीरक्तचेलिकाधातकीषुच॥ सुनासस्फुनीस्तन्येसपोडकल विंकयोः॥३८॥ सुंदरीतनुभिन्नारीभिदोःस्त्रीरुचिरेऽन्यवत्॥ सैरं ध्रीपरवेश्मस्थशिल्पकृत्स्ववशास्त्रियाम्॥३९॥वर्णसंकरसंभूतस्त्री महल्लिकयोरपि॥ सौवीरंकांजिकेस्रोतोंजनेचबदरीफले॥४०॥सा तुनीवृत्तिहारिद्रंहरिद्रारंजितेत्रिषु॥ नानीपद्मेहिंडीरःफेनचा र्तीकुपूरुषे॥४१॥ ॥रत्नतुः॥ ॥अरुष्करोव्रण कृतिभिषुभल्लातकेपुमान्॥ भवेदभिमरोयुद्धेबधेस्ववलसाधने॥ ४२॥अनुत्तरंत्रिषुश्रेष्ठेप्रतिजस्यविवर्जिते॥ अलंकारस्तुहारादा वुपमादावलंकृतौ॥४३॥अवहारःपुमांश्चोरेद्यूतयुद्धादिविभ्रमे॥ निमंत्रणोपनेतव्यद्रव्येग्राह्यव्ययादसि॥४४॥अवतारोऽवतर णेपुष्करिण्यादितीर्थयोः॥ अवस्करोपिवर्चस्केगुत्थेऽथावसरः पुमान्॥४५॥प्रस्तावेमंत्रभेदेचवर्षणेचापिकीर्तितः॥ उपलादावु कूपारः कूर्मराजेमहोदधौ॥४६॥असिपत्रःखड्गकोशेपुमानिक्षौ चनारके॥ भवेदश्वतरोनागांतरेवेगसरेपिच॥४७ अभिहारो ऽभियोगेचचौर्येसन्नहनेपिच॥४८॥अग्निहोत्रोग्निहविषोरर्थ चंद्रोनरक्षते॥४९॥गरुहस्तेबाणभेदेकृष्णाग्निहृतिस्त्रियाम् ॥ आडंबरस्तूर्यपक्ष्मसंरंभेगजगर्जिते॥४९॥आत्मवीरःप्राण

यतिश्यालकेचविदूषके॥ इंदीवरंकुवलयेशतावर्योतुयोषिति॥५०
उदुंबरस्तुदेहल्यांवृक्षभेदेचपंडके॥कुष्ठभेदेपिचपुमांस्तास्रातु
स्यान्नपुंसकम्॥५१॥उपक्करंसमीपेस्यादेकांतेपिनपुंसकम्॥
उद्गुरस्त्रिषूत्तुंगेकरालोत्कटदंतयोः॥५२॥उपकारश्चोपकृतौ
विकीर्णकुसुमादिषु॥औदुंबरःश्राद्धदेवेरोगभेदेनपुंसके॥५३
॥अथकर्मकरोभृत्येचेतनाजीविनित्रिषु॥कीनाशेपुंसिमूर्च्छायां
बिंबिकायामपिस्त्रियाम्॥५४॥कलिकारस्तुधूम्यादेकरंजेपीत
मस्तके॥कर्णिकारःपुमानारवधद्रोचद्रुमोत्पले॥५५॥कर्णपूरः
शिरीषेस्यान्मीलोत्पलवसंतयोः॥करवीरःकृपाणेस्याद्दैत्यभेदो
श्वमारयोः॥५६॥करवीर्यदितिश्रेष्ठगवीपुत्रवतीषुच॥कदंभ
राप्रसारण्यांरोहिण्यांगजयोषिति॥५७॥कलंबिकायांगोलायां
वर्षाभूसूर्वयोरपि॥कादंबरस्तुदध्यग्रेमद्यभेदेनपुंसकम्॥५८
॥स्त्रीचारुणीपरभृताभारतीशारिकासुच॥कालंजरोयोगिचक्रे
मेलकेभैरवेगिरौ॥५९॥कुंभकारीकुलथ्यांचपुल्लिंगोघटकारके
॥कृष्णासाराशिंशपायांपुंसिस्तुत्यांमृगांतरे॥६०॥गिरिसारःपु
मांल्लोहेरंगेमलयपर्वते॥घनसारस्तुकर्पूरेदक्षिणावर्तपारदे॥
६१॥चराचरंवाच्यलिंगमिंगेजगतिनद्वयोः॥चर्मकारःपादुक
तिस्त्रियांचर्मकषोषधौ॥६२॥अथचक्रधरोऽजेऽहीनाम्निषुग्राम
जालिनि॥चित्रादीरोविधौभालमंकितंयेनतत्रच॥६३॥घंटाक
र्णोपहारायहतच्छागास्त्रबिंदुषु॥तालपत्रंतुतादंकेरंडायांताल
पथ्यपि॥६४॥तुंगभद्रानदीभेदेस्त्रियांपुंसिनदोत्कटे॥तुंडिकेरी
तुकार्पास्यांबिंबिकायामपिस्त्रियाम्॥६५॥तुलाधारस्तुलाराशौ
पुंसिवाणिजकेत्रिषु॥अथतोयधरोमुस्तासुनिषण्णेषधीघनौ
॥६६॥दंडयात्रादिग्विजयेसंपानवरयात्रयोः॥अथोदेशपुरेदे
शेपूरेपिस्यान्नपुंसकम्॥६७॥दंडधारःपुमान्पृथ्वीनाथेप्रेताधि
पेपिच॥दिगंबरःस्यात्सपणेनग्नेतमसिशंकरे॥६८॥दुरोदरं

द्यूतभेदे द्यूतकृत्पणयोः पुमान्॥ देहयात्रा यमपुरीगमनेभोजने पिच॥६९॥ हैमातुरोजरासंधवारणाननयोः पुमान्॥ धराधरो हरौशैले धाराधरोसिमेघयोः॥७०॥ धारांकुरस्तनाशीरे शीक रेपियनोपले॥ धार्तराष्ट्रोऽसितास्यांघ्रिहंसकोरवसर्पयोः॥७१ धुंधुमारः शक्रगोपेगृहधूमेपदालिके॥ धुरंधरो धवद्वैनावाच्य लिंगस्तुधूर्वहे॥७२॥ धृतराष्ट्रः सराज्ञिस्यान्नागक्षत्रियभेदयोः धृतराष्ट्रीहंसपत्न्यांनभश्चरोविहंगमे॥७३॥ विद्याधरे धनवाते निशाचरस्तुरक्षसि॥ फेरुपेचकसर्पेषुपांशुलायांनिशाचरी॥ ७४॥ निषद्वरस्तुजंबालेनिशायांतुनिषद्वरा॥ नीलांबरः प्रलंब घ्नेकोणपेचशनैश्चरे॥७५॥ भवेत्परिकरःसंघेपर्यंकपरिवारयोः ॥प्रगादगात्रिकाबंधेसमाचारविवेकयोः॥७६॥ अथपक्षचरश्चं द्रेपृथक्चारिगजेपिच॥ भवेत्प्रतिसरोमंत्रभेदेमाल्येचकंकणे॥ ७७॥ व्रवाशुद्धोचमूपृष्ठेपुंसिनस्त्रीतुमंडने॥ आरक्षेकरसूत्रेचनि योज्येत्स्वन्यलिंगकः॥७८॥ भवेत्परिसरोमृत्यौविधावपिचपुंस्य यम्॥ परंपरोमृगभेदेमयौत्रेतनयस्यच॥७९॥ परंपरापरिपा ट्यांहिंसासंतानयोरपि॥ पयोधरःकोषकारेनालिकेरस्तनेपिच ॥८०॥ कशेरुन्मेघयोःपुंसिप्रभाकरोऽग्निसूर्ययोः॥ प्रतीहारोद्वा रिद्वाःस्थेद्वाःस्थितायांतुयोषिति॥८१॥ परिवारःपरिजनेखड्गको षेपरिच्छदे॥ पारावारःसमुद्रेनातटद्वयेनपुंसकम्॥८२॥ पात्रटी रस्तुपुल्लिंगोमुक्तव्यापारमंत्रिणि॥ लोहकांस्यरजत्पात्रेसिंयाणेपा वकेपिच॥८३॥ पारिभद्रस्तुमंदारेनिंबद्वीपेदेवदारुणि॥ पीतांबरस्तु शैलूषेपुंसिकेदभसूदने॥८४॥ पीतसारोमलयजेगोमेदकम णावपि॥ पूर्णपात्रेवस्तुपूर्णपात्रेवर्द्धापकेपिच॥८५॥ बलभ द्रात्रायमाणाकुमार्योःपुंसिसीरिणि॥ ब्रह्मपुत्रःक्षेत्रभेदेनदभे देचपुंस्ययम्॥८६॥ बकनक्रस्तुपिशुनेतथैवशुकपक्षिणि॥ बा र्वदीरोरंगभात्रास्थंकुरेगणिकासुते॥८७॥ वारकीरस्तुपुंसि

स्याद्वारग्राहिणिवाडवे॥ यूकायांरोलरोधिन्यांनीराजनहयेपिच॥
८८॥ बिंदुतंत्रःपुमाँश्छागरिफलकेचतुरंगके॥वीरभद्रोऽश्वमेधा
श्वेवीरश्रेष्ठेचवारिणे॥८९॥स्याद्वीरतरंवीरणेवीरश्रेष्ठेशवेचना
॥महावीरस्तुगरुडेशूरेसिंहमरवाह्वये॥९०॥वज्रेश्वेततुरंगेच
संचानविहगेपिच॥महामात्रःसमृद्धेचामात्येहस्तिपकाधिपे॥
९१॥मणिच्छिद्रातुमेदायामृषभाख्यौषधेपिच॥महेश्वरोमहा
देवेकथितोधीश्वरेपिच॥९२॥मृगनेत्रारात्रिभेदेविशेषेयोषित
स्तथा॥रथकारस्तुमाहिष्यांकारणीजेचतत्क्षणि॥९३॥रागसूत्रं
तुलासूत्रेपट्टसूत्रेनपुंसकम्॥लंबोदरःस्याद्दानेगणानामधि
पेपिहि॥९४॥लक्ष्मीपुत्रःस्तुपुङ्गिंगःकामदेवेतुरंगमे॥व्यवहा
रोद्रुभेदेस्यान्यासेपिचगणस्थितौ॥९५॥अथव्यर्तिकरःपुंसिव्य
सनव्यतिषंगयोः॥वातपुत्रोमहाधूर्तेभीमसेनेहनूमति॥९६॥
विश्वंभरोच्युतेशक्रेपुंसिविश्वंभरामुवि॥विश्वकद्रुस्त्रियुरवलेखा
नारवेदभुनोःपुमान्॥९७॥विभावरीनिशाराज्योःकुट्टन्यांचकयो
षिति॥विवादवरुत्रगुंठ्यांचविभाकरोग्निसूर्ययोः॥९८॥वीतिहो
त्रोऽनलेऽर्केचशतपत्रःशिरवंडिनि॥दार्वाघाटेसारसेचकमलेतुन
पुंसकम्॥९९॥शतावरीतुशट्यांस्यादिंदीवर्यामपिस्त्रियाम्॥शि
शुमारोबुसंभूतंजंतौतारात्मकाच्युते॥३००॥भवेत्सहचरोश्लिष्ट्यां
हयोरनुचरेभिषु॥समुद्गारुःपुमान्ग्राहेसेतुबद्धेतिमिंगिले॥१॥
संग्रहारोगतौबुद्धेस्थिरदंष्ट्रोसुजंगमे॥विराहाकृतिविष्णोच-
कुसुमारोमृदौभिषु॥२॥पुंसिपुंड्राभिधानेक्षौसूत्रधारःशचीप
तौ॥नानाघंतरसंचारिपात्रभेदयोः॥३॥ ॥रपं
च॥ ॥तमालपत्रंतापिच्छेनिलकेपत्रकेपिच॥तालीश
पत्रंभूम्यामलकीतालीशयोःस्मृतम्॥४॥स्यात्पांशुचामरःपुं-
सिदूर्वांचिततटीभुवि॥बर्हीपकेप्रशंसायांपुरोडाशेधूलिगुच्छके
॥५॥स्यात्पादश्चतुरश्छागेसेकतेपिप्पलेपिच॥करकेपरदोषे

कमवक्त्रपुरुषेपिच॥६॥पीतकाचेरमित्येतत्कुंकुमेपित्तलेपिच॥
स्याद्राजबदरेरक्तमेलकेलवणेपिच॥७॥बस्त्रोकसारेद्रुपरे
कुबेरनलिनीपुरोः॥विप्रतीसारउद्दिष्टःकौरुत्येनुशयेरुषि॥८॥
भवेत्समभिहारस्तुपौनःपुन्यभृशार्थयोः॥सर्वतोभद्रइत्युक्तःका
व्यचित्रेगृहांतरे॥९॥निबेनासर्वतोभद्रागंभारीनटयोषितोः॥
॥ ॥इतिरांतवर्गः॥ ॥१८५॥लेकम्॥ ॥लःश
केलातुदानेस्यादग्रहणेपिनिगद्यते॥लीश्लेषणेचचपलेरलोधर
ण्यांनिशापतौ॥१॥ ॥लहिः॥ ॥अम्लोरसस्यभेदे
स्यादम्लीचांगेरिकोषधौ॥अलिःस्त्रीपुष्पलिह्योःपुंस्यालिर्घिशदा
शये॥२॥विषुस्त्रियांवयस्यायांसेतौपंक्तौचकीर्तिता॥आलुर्गलंति
कायांस्त्रीक्लीबेमूलेचभेलके॥३॥इलाकलत्रेसोम्यस्यधरित्र्यांगवि
वाचिच॥ओल्लस्तुभूरणेपुंसिस्यादार्द्रेवाच्यलिंगकः॥४॥कलास्या
न्मूलरेद्रव्यशिल्पादावंशमात्रके॥षोडशांशेचचंद्रस्यकलनाकल
मानयोः॥५॥कलंशुकेत्रिषुजीर्णेनाल्योक्तमधुरध्वनौ॥कलिः
स्त्रीकलिकायांन्नाभूराजिकलहेयुगे॥६॥कालोमृत्योमहाकाले
समयेयमकृष्णयोः॥कालातुकृष्णात्रिवृतामंजिष्ठानीलिकासुच
॥७॥कालीगोर्योक्षारकीटेकालिकामातृभेदयोः॥कीलोलेशेह्र
योःशस्त्रज्वालाकफोणिशंकुषु॥८॥कुलंजनपदेगोत्रेसजातीय
गणेषपि॥भवनेचतनोक्लीबंकंटकार्योषधौकुली॥९॥अथकू
लंतटेस्तूपेसैन्यपृष्ठतडागयोः॥कोलंकोलिफलेक्लीबेपिण्डी
चध्वयोःस्त्रियाम्॥१०॥नाकंपालेशनौचित्रेवराहेलंगभेलके॥रव
लंभूस्थानकल्केषुनीचक्रूराधमेत्रिषु॥११॥रवल्लोपस्त्रभेदेस्या
द्वर्तेचर्मणिचातके॥रवल्लीतुहस्तपादावमर्दनाव्यकुजिस्त्रियाम्
॥१२॥रिवलमप्रहतेक्लीबंसारसंक्षिप्तवेधसोः॥रुलःसर्जरसेकं
ठेरुलःस्याद्देक्षवेषुमान्॥१३॥रुल्लीतुरुटिकारोगभिदोःस्त्रुख्यां
रुल्लीस्मृता॥लोलागोदावरीसरय्योःकुनटीदुर्गयोःस्त्रियां॥१४॥

पञ्जनेमंडलेचालिंजरेबालरवेलने॥चल्लालक्ष्मीपुमान्कंपेकं पंनेत्वभिधेयवत्॥१५॥चिल्लाःपुमान्क्लिन्ननेत्रेक्लिन्नाक्षेप्यभिधेयवत्॥आततायिनितल्लोक्तश्चिल्लीस्यात्स्कंदवास्तुके॥१६॥चुल्ली चितायामुन्नानेचोल्लःकूर्पासकेपुमान्॥नपुंसकंतुवसनेछल स्वलितशाठ्ययोः॥१७॥छल्लीवीरुधसंतानेवल्कलेकुरुकमांतरे॥ जलंगोकलनेनीरेह्रीषेरेष्वन्यवज्जडे॥१८॥जालंगवाक्षआना येक्षारकेदंभहृदयोः॥जालोनीपद्मेजालीपद्मोलिकोषधोस्त्रिया म्॥१९॥झल्लास्यादातपस्योर्मौदुहितर्यपिचस्त्रियाम्॥झिल्लीची र्यांमरुचोर्यत्यांमुहूर्तनांशकके॥२०॥तलंस्वरूपेनृधोस्त्रीक्लीबं ज्यौघातवारणे॥काननेकार्यबीजेचपुंसितालमहीरुहे॥२१॥च पेटेचत्सरोतंधीघातेसव्येनपाणिना॥तल्लीतरुण्यांतल्लुस्तुजला धारांतरेपुमान्॥२२॥तालुःकरतलेंगुष्ठमध्यमाभ्यांचसंमिते॥जी तकालक्रियामानेकरास्फालेद्रुमांतरे॥२३॥वाद्यभांडेचकांसस्य त्सरौतालीजटौषधौ॥क्लीबंतुहरितालेस्यात्तुलासादृश्यमानयोः ॥२४॥गृहाणांदारुबंधायपीठिकायामपीष्यते॥शशोपलशतेभां डेतुलंस्याद्रुह्मदारुणि॥२५॥आकाशेथपिचौनस्त्रीदलमुत्सेधरवं डयोः॥शस्त्रीच्छदेप्यवद्रव्येपत्रेप्यथदुलिःस्त्रियाम्॥२६॥कमठ्यां नासुनीदोलामील्यांयानांतरेपिच॥नलःपोटगलेराज्ञिपितृदेवे कपीश्वरे॥२७॥कमलेपिकुनट्यांचक्रमेणक्लीबयोषितोः॥नाला ननापद्मदंडेनालीशाककदंबके॥२८॥नीलंतुनीलीरक्तेनानि ध्यद्विवर्णांतरे॥नीलीरुग्भेदनीलिन्योःपलंसुम्नानमांसयोः॥ २९॥पल्ल्यन्यग्रामकुट्टिन्योःपल्लःस्थूलकुसूलके॥पालिःकर्णल ताग्रेःश्रीपंक्तावंकप्रभेदयोः॥३०॥शाखादिदेयस्त्रीपाली यूकास श्वश्रुयोषितोः॥पिल्लःपुमान्क्लिन्ननेत्रेक्लिन्नाक्षेपुनरन्यवत्॥३१॥ पीलुःपुमान्यसूनेस्यात्परमाणौमतंगजे॥अस्थिरवंडेचतालस्य कांडपादप्रभेदयोः॥३२॥पुलःस्यात्पुलकेपुंसिविपुलेप्यन्यलिंग

कः॥ फलेजातीफलेसस्येहेत्वर्थेव्युष्टिलाभयोः॥३३॥स्त्रिफलायांच
कक्कोलेप्रियंगोतुफलीस्मृता॥फालःपुंसिमहादेवेफालिंदीभेदने
पिच॥३४॥क्लीबंसीरोपकरणेस्त्रियुकार्पासवाससि॥बलिर्दैत्यप्रभे
देचकरचामरदंडयोः॥३५॥उपहारेपुमान्स्त्रीतुजरयाश्लथचर्म
णि॥गृहदारुप्रभेदेचजठरावयवेपिच॥३६॥बल्लंगंधरसेरूपेस्था
मनिस्थौल्यसैन्ययोः॥पुंक्लीबन्हलायुधेदैत्येप्रभेदेवायसेपिच॥३७॥
बल्लयुक्तेऽन्यलिंगःस्याद्बाल्केतुयोषिति॥बल्लीस्याद्द्राक्षमो दा
यांघ्रतत्वामपियोषिति॥३८॥बालोनाकुंतलेश्वस्यकरिणश्चापि
बालधौ॥नालिकेरेहरिद्रायांमल्लिकाभिद्यपिस्त्रियाम्॥३९॥बा
ल्यलिंगोर्भकेसूर्वेह्रीबेरेषुन्नपुंसकम्॥अलंकारांतरेभीरौबाली
बालानुदिस्त्रियोः॥४०॥वेलाकालेचसीमायामध्योःकूलविकार
योः॥अकृष्टमरणेशंगेईश्वरस्यचभोजने॥४१॥भल्लुःस्यात्पुंसिभ
ल्लूकेशास्त्रभेदेतुनद्वयोः॥भल्लातक्यांस्त्रियांभल्लीभालंतेजोल
लाटयोः॥४२॥भेलःपूर्वेसुनोपुंसिभीरावज्ञेचवाच्यवत्॥मलो
ऽस्त्रीपापविट्किट्टेकृपणेत्वभिधेयवत्॥४३॥मल्लुःपात्रेकपोले
चमत्स्यभेदेबलीयसि॥मालःक्षेत्रेस्त्रियांपृक्कास्त्रजोर्जास्यंतरेपु
मान्॥४४॥मालुःपत्रलतानार्योःस्त्रियांमूलंशिफाद्वयोः॥मूल
वित्तेतिकेचानामेलास्यान्मेलकेमसी॥४५॥मौलिःकिरीटेधम्मि
ल्लेचूडायामनपुंसकम्॥नाशोकद्रोस्त्रियांभूमौलीलाकेलिवि
लासयोः॥४६॥शृंगारभावचेष्टायांलोलःस्याद्बाल्यलिंगकः॥स
तृष्णेचंचलेलोलाजिह्वाकमलयोस्त्रियाम्॥४७॥व्यालोदुष्टग
जेसर्पेश्वापदेऽन्यवत्खले॥विलंछिद्रेगुहायांचपुमानुत्रैः
श्लोहये॥४८॥शल्लकशल्लेपुंसिमृगसेव्रेभिदोर्विधौ॥शा
लुःकषायद्रव्येस्याच्चोरकारव्योषधौपुमान्॥४९॥शालिरुक्क
लमादौचगंधमार्जारकेपुमान्॥शाल्मलुस्कंधशाखायांगृह
गेहैकदेशयोः॥५०॥नाम्नषेशिलमुंछेस्याद्वृंदूपद्यांशिलीमता

स्तंभशीर्षेशिलाशिल्योशिलातुप्रस्तरेमता॥५१॥तथामनःशिला यांचद्वारार्थस्थितद्वारुणि॥शीलंस्वभावेसद्वृत्तेशुद्धोयोगांतरे सिते॥५२॥नपुंसकंतुरजतेभूलोऽस्त्रीरोगआयुधे॥मृत्यकेत नयोगेषुशूलास्यात्पण्ययोषिति॥५३॥शूलोभूभृतिशैलंतु शैलेयेतार्क्षशैलके॥सालःपादपमात्रेस्यात्प्राकारेसर्जपादपे ॥५४॥स्थालंभाजनभेदेऽपिस्थालीस्यात्तादलेरवयोः॥स्थूलं कूटेऽथनिष्प्रज्ञेपीवरेप्यन्यलिंगकः॥५५॥हालोहलेपुमान्हाला मदिरायांचयोषिति॥हेलास्त्रियामवज्ञायांविलासेवरयोषिता म्॥५६॥ ॥लत्रिः॥ ॥अनलोवस्त्रभेदेऽग्ना वनिलोवस्त्रवातयोः॥अर्गलाविष्वकक्षोरुदंडेऽतरकपाटयोः ॥५७॥अरालःकुटिलेसर्जरसेसमददंतिनि॥अंगुलीकरशा खायांकर्णिकायांगजस्यच॥५८॥अचलावस्त्रधायांस्याद्च लःशैलकीलयोः॥अमलंलक्ष्मकेक्लीबंलक्ष्म्यांस्त्रीनिर्मलेत्रिषु ॥५९॥अंजलिस्तूपमान्हस्तसंपुटेकुडवेपिच॥अवेलस्त्व पलापेस्यादवेलापूगचर्चिते॥६०॥आभोगेनद्योःकुक्षौचा न्यलिंगंभद्रयामके॥इस्त्वलातारकाभेदेनाभेदेदैत्यमर्त्ययोः॥ ६१॥उत्पलीतुषचर्पट्यांक्लीबंकुष्ठमूलयोः॥उपलःप्रस्तरेर त्नेशर्करायांतुयोषिति॥६२॥उज्ज्वलोद्वीसभृंगारविशदेषुवि काशिनि॥उत्कुलंकरणेस्त्रीणामुत्तालेपिविकस्वरे॥६३॥उत्ता लउत्कटश्रेष्ठविकरालेषुवंगमे॥कमलंसलिलेताम्रे जलजे क्लीबभेषजे॥६४॥नगभेदेतुकमलःकमलाश्रीवरस्त्रियोः ॥कपिलारेणुकायांचशिशपागोविशेषयोः॥६५॥पुंडरीकंक रिण्यांस्त्रीवर्णभेदेभिलिंगकम्॥नानलेवासुदेवेचसुनिभेदे चकुक्कुरे॥६६॥कंबलोनागराजेस्यात्सास्त्रीप्रावारयोरपि॥क मायवस्त्रसंगेसलिलेतुनपुंसकम्॥६७॥करालोदंतुरेतुंगे भीषणेचाभिधेयवत्॥ससर्जरसतैलेनाक्लीबंरूक्षणकुठेरके ६८

कदलेत्रिषुकपालेषुपरागेनवांकुरे॥ कलध्वनौ कदली तुमृग
पुत्रभेदयोः॥ ६१॥ कदला कदलीपृथ्व्यां कदली कदलीपुनः॥
रंभावृक्षेऽथ कदलीपताकामृगभेदयोः॥ ७०॥ कदलाडिंबिका
यांचशाल्मलीभूरुहेपिच॥ कपालोऽस्त्रीशिरोस्थिन्यास्फुटादेः
शकलेव्रजे॥ ७१॥ कठीलातुहयोद्रोणीप्रभेदेनाकमेलके॥ क
लोलःपुंसिहर्षेस्यादुल्लोलेवैरिणोरपि॥ ७२॥ कामलारोगभेदे
वानानामरुवसंतयोः॥ कासुकेवाच्यलिंगोथ कालोलंनरकांतरे
॥ ७३॥ नाकुलालेद्रोणकाकेविषभेदेतुनस्त्रियाम्॥ काहला
वाद्यभांडस्यभेदेचाप्सरसांभिदि॥ ७४॥ काहलीतुतरुण्यांस्यात्
काहलश्चरणायुधे॥ शब्दमात्रेपिपुल्लिंगस्त्रियुशब्देभृशेरवले॥
७५॥ किट्टालःपुंसिताम्रस्यकलशेलोहगूथके॥ कीलालंरुधि
रेतोयेकुशलःशिक्षितेत्रिषु॥ ७६॥ क्षेमेचसुकृतेचापिपर्यासो
चनपुंसकम्॥ कुवलंचोत्पलेमुक्ताफलेपिबदराफले॥ ७७॥ कु
ल्मलोमुकुलेपुंसिनर्हयोनरकांतरे॥ कुटिलातगरेपाठांस्त्रीषु
ग्नेवाच्यलिंगकः॥ ७८॥ कुंतलश्चयकेबालेजवेपुंभूलिनीधृति॥
कुलालःकुक्कुभेकुंभकारेस्त्रीसंजनांतरे॥ ७९॥ कुंभिलःशाल
मीनेचचोरेश्लोकार्थचौरयोः॥ कुद्दालःस्यात्सुमाभूमिदारणेषु
गपत्रके॥ ८०॥ कुचेलाविद्रुपण्यांस्त्रीवाच्यवस्तुकुवाससि॥ कु
लूलंशंकुसंकीर्णश्वभ्रेनातुतुषानले॥ ८१॥ कुंडलंकर्णभूषायां
पाशेपिवलयेपिच॥ कांचनद्रुमुदुच्योःस्त्रीकेवलःकुहनेपुमान्॥
८२॥ नपुंसकंतुनिर्णीतेवाच्यवत्त्वैकमुख्ययोः॥ केवलोज्ञानभे
देथकोमलंमृदुलेजले॥ ८३॥ कोहलोवाद्यभेदेस्यानाट्यशा
स्त्रप्रवक्तरि॥ ग्रंथिलस्तुकरीरद्रोविकंकततरौपुमान्॥ ८४॥
सग्रंथोत्रिषुगंधोलीभद्रशाल्योश्चयोषिति॥ गरलंतृणमूलेच
विषेमानेनपुंसकम्॥ ८५॥ गोपालोनृपगोपेशेगोकुलेसुसले
हले॥ गोरिलस्तुपुमान्लोहचूर्णेस्याद्गौरसर्षपे॥ ८६॥ चपलः

पारदेमीनेचोरकेप्रस्तरांतरे॥ चपलाकमलाविद्युत्तुंश्वलीपि प्पलीषुच॥८७॥ नपुंसकंतुशीघ्रेस्याद्व्यक्तरंचले॥ चत्वा लोहोमकुंडेस्यात्पुंसिदर्भेपिदृश्यते॥८८॥ चंद्रिलःपुंसिवास्तू कशाकेभर्गेचनापिते॥ चंचलाचतडिल्लक्ष्म्योश्चंचलःकामुके निले॥८९॥ चूडालातूच्चदायांस्त्रीचूडावतिचवाच्यवत्॥ छ गलंनीलवस्त्रेनाच्छागेस्त्रीवृद्धदारके॥९०॥ जंबालःशैवले पंकेजगलोमदनद्रुमे॥ भेदकेपिष्टमद्येचपुंसिधूर्तेऽभिधेयव त्॥९१॥ जटिलापिप्पलीमांस्योर्जदायुक्तेतुवाच्यवत्॥ जंग लंनिर्जनस्थानेत्रिलिंग्यांपिशितेस्त्रियाम्॥९२॥ जंभलःपुंसिजं बीरेबुद्बुदेवांतरेपिच॥ जंबूलस्तुपुमान्जंबूविटपेऽकचच्छ दे॥९३॥ जांगलीविषविद्यायांजांगलंजालिनीफले॥ जांग लीभूकशिंब्यांस्त्रीजांगलोनाकपिंजले॥९४॥ तरलंचंचले पिड्डेभास्करेपित्रिलिंगकम्॥ हारमध्यमणौपुंसियवागूसुरयोः स्त्रियाम्॥९५॥ तंडुलःस्याद्विडंगेचधान्यादिनिकरेपुमान्॥ त मालस्तिलकेरवृक्षेतापिच्छेवरुणद्रुमे॥९६॥ तांबूलीनागवल्यां स्त्रीऋसुकेतुनपुंसकम्॥ तातलोरुजिपाकेचलोहकूटेमनो जवे॥९७॥ तुमुलःकलिवृक्षेनाकीबंतुरणसंकुले॥ तैतिलो गंडकेपुंसिक्लीबंतुकरणांतरे॥९८॥ दुकूलंश्लक्ष्णवस्त्रेस्यात् क्षौमेचधवलागवि॥ वृषश्रेष्ठेपुमान्वाच्यलिंगःक्षुद्रेचसुंदरे ॥९९॥ नकुलीकुक्कुटीमांस्योःपशुपांडवयोःपुमान्॥ नाकुली कुक्कुटाकंदेरास्नायांचधिकेस्त्रियाम्॥१००॥ नाभीलंवंक्षणेना र्याःकुक्षिगर्भोडयोरपि॥ निचूलस्तुनिचोलेस्यादिज्जलारव्य महीरुहे॥१॥ निर्मलेस्यात्तुनिर्माल्येचाभ्रकेचनपुंसकम्॥ म लहीनेऽन्यलिंगंचनिस्तलंवर्तुलेचले॥२॥ निष्कलंतुकलाशू न्येनष्टवीर्येचवाच्यवत्॥ नेपालीतुनवमालीकुनटीसुमहा स्फुच॥३॥ पललंतिलचूर्णेचपंकेमांसेनपुंसकम्॥ नाराक्षसे

ऽथपटलंपिटकेचपरिच्छदे॥४॥छदिर्दंत्योगतिलकेक्लीबंव्रजे पुनर्नवा॥प्रतलंपातालभेदेततांगुलिकरेपुमान्॥५॥पटोलं वस्त्रभेदेनोषधौज्योत्स्न्यांतुयोषिति॥प्रवालोऽस्त्रीकिसलये-वीणादंडेचविद्रुमे॥६॥पांचालीपुत्रिकागीत्योःस्त्रियांपुंभूम्नि नीदृति॥पांशुलःपुंस्यलेशंभोःखट्वांगेरुग्यसतीशुचोः॥७॥पाक लंकुष्ठभेषज्येपुंसिस्यात्कुंजरेज्वरे॥पाचालंपाचनेनाऽग्नौवाध नद्रव्यवातयोः॥८॥पाटलापाटलोस्त्रीस्यादस्यपुष्पेपुनर्नना ॥आशुधान्येपुमान्श्वेतरक्तवर्णेपिवाच्यवत्॥९॥पातालंना गलोकेस्याद्धिवरेवडवानले॥पातालीवायुरायांस्यान्नारीपात्र प्रभेदयोः॥१०॥पिप्पलंसलिलेवस्त्रछेदभेदेचनातरौ॥निरंशु केपक्षिभेदेकणायांपिप्पलीस्मृता॥११॥पिचुलोझवुकेपिस्या दिज्जलेजलवायसे॥पिंगलोनागभिद्रुद्रचंडांशुपारिपार्श्विके॥ १२॥निधिभेदेकपावग्नोपुंसिस्यात्कपिलेऽन्यवत्॥स्त्रियांपेश्यापि शेषेचकरिण्यांकुसुदस्यच॥१३॥पित्तलातोयपिप्पल्यांकन्य वत्पित्तसंयुते॥क्लीबंतुतेजसद्रव्येपिच्छलोविज्जिनेऽन्यवत्॥ ॥१४॥स्त्रीपोतिकाशिंशपयोःशाल्मलीसिंधुभेदयोः॥पुङ्गुलः सुंदराकारेभिषुपुंस्यात्प्रभेदयोः॥१५॥पेशलोरुचिरेदक्षेफेनि लोऽरिष्टपादपे॥नासफेनेत्रिषुक्लीबंकोलीमदनयोःफले॥१६ बुद्बुलानालिकायांस्यादेलायांगधियोषिति॥कृत्तिकास्त्रियांभू म्निविहायसिनपुंसकम्॥१७॥पुंस्यग्नेःकृष्णपक्षेचवाच्यवत्त्रा ज्यकृष्णयोः॥बरलाबारलाचापिगंधोलीहंसकांतयोः॥१८॥ बार्दलंदुर्दिनेमेघेनंदायांबार्दलःस्मृतः॥मंगलासितदूर्वायां मुषायांपुंसिभूमिजे॥१९॥नपुंसकंतुकल्याणेसर्वार्थरक्षणेपि च॥मंडलंपरिधौकोटेदेशेहादशराजके॥२०॥क्लीबेऽथनिचये-बिंबेत्रिषुपुंसितुकुक्कुरे॥मंजुलंत्रिषुमंजोनाजलरंकोनपुंसक म्॥२१॥जलांचलेनिकुंजेचमहिलाफलिनीस्त्रियोः॥मातुलो

ग्रीहिभिन्नातृभ्रात्रोश्वमदनद्रुमे॥२२॥ धुस्तूरे माचलो वंदिचौरे चयाहरोगयोः॥ मुसलेस्यादयोग्रेतुपुंनपुंसकयोःस्त्रियाम्॥२३॥ तालमूल्यामारुपर्णीगृहगोधिकयोरपि॥ मृणालंनलदेक्लीबंस्त्रीनपुंसकयोर्बिसे॥२४॥ मेरवलारवङ्गबंधेस्यात्कांचीशैलनितंबयोः॥ यमलंयुगलेक्लीबेयमलीचोदिकाद्वये॥२५॥ रसालो रसनाद्रूर्वाविदारीमार्जितासुच॥ रसालंसिल्हकेबोलेरसालश्चेक्षुचूतयोः॥२६॥ रामिलोरमणेकामेलांगुलंपुच्छशेफसोः॥ लांगलीतोयपिप्पल्यांक्लीबंतुकुसुमांतरे॥२७॥ गोदारणेतृणराजगृहदारुविशेषयोः॥ लोहलः शृंखलाचार्येऽव्यक्तवाजिनिचक्षिषु॥२८॥ वंजुलःपुंसितिनिशेवेतसाशोकयोरपि॥ वंदालोयुद्धभेदेचनौकायांचरवनिम्नके॥२९॥ वातूलःपुंसियात्यायांवाच्यवन्मारुतासहे॥ वामिलोदांभिकेवामेस्त्रिषुस्याद्धूमलास्त्रियाम्॥३०॥ शातलायांशुचौभेदेनिर्मलेत्वभिधेयवत्॥ विपुलःपृथुलेगाधेमेरुपश्चिमभूधरे॥३१॥ विडुलस्तुमानंबुवेतसेवेतसेपिच॥ विडालोनेत्रपिंडेस्याद्दूषदंशकयोःपुमान्॥३२॥ विशालालिंद्रवारुण्यामुज्जयिन्यांतुयोषिति॥ मृगपक्षिभिदोःपुंसिपृथुलेत्वभिधेयवत्॥३३॥ वृषलोगृंजनेशूद्रेचंद्रयुतेचराजनि॥ शकलंतरिखंडेस्याद्वागवस्तुनिवल्कले॥३४॥ शंबलोऽस्त्रीसंबलवल्कलपाथेयमत्सरे॥ शयालुःस्यादजगरेनिद्राशीलेचकुक्कुरे॥३५॥ श्रद्दालुर्दोहदिन्यांस्त्रीश्रद्धायुक्तेतुवाच्यवत्॥ श्यामलःपिप्पलेकृष्णेशार्दूलोराक्षसांतरे॥३६॥ व्याघ्रेचपशुभेदेचसत्तमेतूत्तरस्थितः॥ शाल्मलिस्तरुभेदेस्याद्वीपभेदेपिचद्वयोः॥३७॥ श्रीफलःपुंसिमालूरेधात्रीनीलिकयोःस्त्रियाम्॥ शीवलंस्यात्रशैवालेशैलेयेचनपुंसकम्॥३८॥ शीतलंपुष्पकाशीशेशैलजेमलयोद्भवे॥ पुमानासनपर्ण्यांस्याच्छिशिरेवाच्यलिंगकम्॥३९॥ शृगालोवंचकेदैत्यभेदेनाडमरेस्त्रियाम्॥ शृंखलापुंस्क

दीवरम्बंधेचनिगडेत्रिषु॥४०॥शैवलंपद्मकाष्ठेस्याच्छेवालेपि पुमानयम्॥शौष्कलःशुष्कमांसस्यपणकेपिशिताशिनि॥४१॥षे डालीतेलमानेचसरसीकासुकस्त्रियोः॥सरलःपद्मकाष्ठेनाःथो दारावृक्षयोस्त्रिषु॥४२॥संकुलंत्रिषुविस्पष्टवाचिव्याप्तेःथससं ला॥वनमालीचमेकषायुंजासुपाटलौस्त्रियाम्॥४३॥सेधिलातुसुरंगायांनदीमंदिरयोःस्त्रियाम्॥सिधालामत्स्यविक्रयीवाच्य वत्तुकिलासिनि॥४४॥सुवेलःप्रणतेशांतेत्रिषुनापर्वतांतरे॥स्फ लंलोट्टालिकाबंधनागलोकप्रभेदयोः॥४५॥हिंगुलोवर्णकद्रव्ये नाभंदाक्यातुहिंगुली॥हेमलःस्वर्णकारेस्यात्स्फटिकलासेशिलां तरे॥४६॥ ॥लचतुः॥ ॥अक्षमालाःक्षसू त्रेस्यादरुंधत्यामपिस्त्रियाम्॥अंकपालीपरीरंभेधात्रीवेदिकयोः स्त्रियाम्॥४७॥अथाःतिबलःप्रबलेत्रिषुस्त्रीतोषधीभिदि॥उदु रवलेगुग्गुलौस्यादुदूरवलेपिनद्वयोः॥४८॥एकाष्ठीलावनतिक्ति कौषधौपुंसिबकपुष्पे॥कलकलउक्तःकोलाहलेतथासर्जनिर्यो से॥४९॥अथकर्मफलंकर्मरंगकर्मविपाकयोः॥कंदरालःपुमा नार्दभांडेप्यूक्षतरावपि॥५०॥कमंडलुःस्यात्करकेनस्त्रीनाप्यूक्षपा दपे॥कुतूहलंकौतुकेस्यात्प्रशस्तेपिचदृश्यते॥५१॥खतमाल स्तुपुंसिगोधूमेपिचबलाहके॥गंडशैलोलवादेस्याच्चूतस्थूलो पलेगिरे॥५२॥गंधफल्यपिगुंद्रायांचंपकस्यचकोरके॥चक्रवा लोःद्विपेदेस्याच्चक्रवालंतुमंडले॥५३॥जलोजलंस्तोयारिनि र्गमेशैवलेपिच॥दलामलंमरुबकेदमनेपिनपुंसकम्॥५४॥ ध्वनिनालातुवीणायांवेणुकाहलयोरपि॥स्यात्परिमलोःति मदीतिमनोहरगंधयोश्चापि॥५५॥सुरतोपमर्दिकसच्छरीरर ागादिसौरभेपुंसि॥अथपोटगलःपुंसिनलेचकाशमत्स्ययोः॥ ५६॥भवेद्बुद्बुदफलोनीपेनाःमलक्यांतुयोषिति॥भस्मतूलंश्म शानकूटेपांशुवर्षेहिमेपिच॥५७॥भद्रकालीतुगंधोल्यांकात्यायन

न्यामपिस्त्रियाम्॥ महाकालोमहादेवेकिंपाकेप्रथमांतरे॥५८॥भ
वेन्महत्कलौमत्तेभमदाव्यक्तवाचिनोः॥ महाबलंसीसकेतिबला
थोस्त्रीबलोत्कटे॥५९॥विलिंगंमणिमालातुहारेदंतक्षतांतरे॥
महानीलोभृंगराजेमणिनागविशेषयोः॥६०॥मुक्ताफलेतुकर्पू
रेमौक्तिकेकलवलीफले॥स्यान्मृत्फलाकदल्यांमहाकालफलेपुमा
न्॥६१॥भवेद्बदरफलोवेणोर्मांसीकुटजयोरपि॥रजस्वलापुष्प
वत्यांस्त्रियांस्यात्सौरभेपुमान्॥६२॥वातकेलिःकलालापेषड्दंत
क्षतेपुमान्॥अथवायुफलेशक्रकार्मुकेकरकेपिच॥६३॥भवेद्वि
चकिलोमल्लीप्रभेदेमदनेपुमान्॥वृहन्नलागुडाकेशेमहापोद
गलेपुमान्॥६४॥सदाफलःस्कंधफलेनारिकेलेपुदुंबरे॥सिनी
वालीतुदृष्टेंदुकलामादुर्गयोस्त्रियाम्॥६५॥अथसौवर्चलंसर्ज
क्षारेचलवणांतरे॥हस्तिमल्लोऽभ्रमातंगेशंखनागेविनायके॥
६६॥हरितालंधातुभेदेस्त्रीदूर्वाकाशरेवयोः॥हलाहलोब्रह्म
सर्पेअंजनायांविषेस्त्रियाम्॥६७॥ ॥लपंच॥ ॥
आरक्षतीबलआख्यातःकन्यापालकयज्वनोः॥उद्दंडपालःपुं
सिस्यात्सर्वमत्स्यप्रभेदयोः॥६८॥एककुंडलआख्यातोबलभद्रे
धनाधिपे॥कृपीटपालउद्दिष्टःकेलितातसमुद्रयोः॥६९॥स्यात्
पांडुकंबलःश्वेतप्रावारग्रावभेदयोः॥भवेत्स्फुरततालीतु दू
तिकायांशिरःस्रजि॥७०॥ ॥इतिलांतवर्गः॥ ॥
२०२३॥ ॥वैकम्॥ ॥वः सांत्वनेचवातेचवरुणेचनि
गद्यते॥वेप्रचेतसिजानीयादिवार्थेचतदव्ययम्॥१॥स्वःस्यात्पुं
स्यात्मनिज्ञातेत्रिष्वात्मीयेधनेस्त्रियाम्॥ ॥वह्निः॥ ॥
अविर्नाथेरवौमेषेशैलेमूषिककंबले॥२॥अभ्रंःपुंजातिसेदेच
तुरगेचपुमानयम्॥ऊर्ध्वंस्यादुच्छ्रितेतुंगेचोपरिष्टादपिस्मृतम्
॥३॥क्षवःक्षतेराजिकायांकविर्वाल्मीकिशुक्रयोः॥सरोकाव्यपु
रेपुंसिरक्षीनेस्यात्तुयोषिति॥४॥कणवंपापेमुनौपुंसिकिण्वंबी

जेचशीधुनः॥ पापेक्लीबंनपुंसकेशंढेऽन्यवदविक्रमे॥५॥स्यात्सुग्री वाकंधरायांतल्लिरायांचयोषिति॥चार्वीतुशोभनाबुद्ध्योर्ज्योत्स्ना धनदभार्ययोः॥६॥छविःशोभारुचोर्योषिज्जवोवेगजवौसमौ॥पुंस्ति गस्कभवेद्वेगेचोंडुपुष्पेजवास्मृता॥७॥जीवःप्राणिनिवृत्तोचवृक्ष भेदेबृहस्पतौ॥जीवाजीवंतिकामोर्वीघचाशिंजितभूमिषु॥८॥ नस्त्रीतुजीवितेतत्वंस्वरूपेपरमात्मनि॥स्याद्दूर्वितनृत्यंचद्रवः प्राद्रवनर्मणोः॥९॥रसेषिचददावौतुघनवन्हौवनेष्वपि॥हंहर हस्यकलहेतथामिथुनयुग्मयोः॥१०॥दार्वीदारुहरिद्रायांतथागो जिह्विकौषधौ॥द्यौःस्त्रीस्वर्गेचगमनेदिवंक्लीबंतयोःस्मृतम्॥११॥ देवोमेघेसुरेराज्ञिस्यान्नपुंसकमिंद्रिये॥देवीसुताभिषेकाख्यांते जनीपृक्कयोरपि॥१२॥ध्वःपुमान्ध्वंधूर्तेचस्त्रीवृक्षांतरेपिच॥ध्रु वःशंकोहरेविष्णोवदेचोत्तानपादजे॥१३॥वस्कयोगभिदोःपुंसि क्लीबंनिश्चिततर्कयोः॥स्त्रीमूर्वाख्योःशालपर्ण्योर्गीतिस्तुकभेदयो स्त्रिषु॥१४॥संततेशाश्वतेचाथनवनव्येषुमान्कृतौ॥नीवीपरि षणेस्त्रीणांकटीवसनबंधने॥१५॥पक्वंपरिणतेपिस्याद्विनाशाऽ भिमुखेत्रिषु॥पूवःस्यात्पुवनेभेदेभकेऽवोम्बपचेपयौ॥१६॥जड काकेचकुलकेप्रवणेपर्कटीद्रुमे॥कारंडवारव्यधिहगेशब्देप्रतिग तोपुमान्॥१७॥कैवर्त्तीमुस्तकेगंधतृणेपिस्यान्नपुंसकम्॥क्लीबं कक्षांतरेचक्रोपांतेपक्षगणेपिच॥१८॥प्राध्वंतुप्रणतेचातिदूर वर्त्मनिबंधने॥पृथ्वीभूमौमहत्यांचत्वक्स्त्र्यांकृष्णाजीरके॥१९॥ भवःक्षेमेशसंसारेसत्तायांप्राप्तिजन्मनोः॥भावःसत्तास्वभावाभि प्रायचेष्टास्वजन्मसु॥२०॥क्रियालीलापदार्थेषुविभूतिषुधजंतुषु ॥रत्यादौचाथरेवास्यान्नीत्योरत्यांनदीभिदि॥२१॥लवोलेशेविना शेचछेदनेरामनंदने॥लट्वाकरंजभेदेस्यात्फलेपाथेरवर्गतरे॥ २२॥लघ्वीलाघवयुक्तायांप्रभेदेस्यंदनस्यच॥विश्वात्तिविषा यांस्त्रीजगतिस्यान्नपुंसकम्॥२३॥ननाशक्त्योःपुंसिदेवप्रभेदेष

सिलेऽस्त्रिषु॥ बिल्वंफलेश्रीफलंनाशवःस्यात्कुणपेपुमान्॥२४॥न पुंसकंतुपानीयेशिवभूर्जेनृपेपुमान्॥शिवोमोक्षेमहादेवेकी लकग्रहयोगयोः॥२५॥वालुकेगुग्गुलौवेदेपुंडलीकद्रुमेपुमान्॥स्फ रवंक्षेमजलेक्लीबंशिवाहरीतकीमलोषधौ॥२६॥अमयामलकीगौरी फेरुसक्तुत्फलास्फच्॥शिवस्तुभूर्जपत्रेस्यात्तथोदारमहीपतौ॥२७ शस्त्वंताम्रेयज्ञकर्मण्याचारेजलसन्निधौ॥सत्त्वंगुणेपिशाचादौ बस्तेद्रव्यस्वभावयोः॥२८॥आत्मतेव्यवसायास्त्रिषुस्त्रीतुजंतु षु॥सवोयज्ञेचसंधानेसांत्वंदाक्षिण्यसाम्नोः॥२९॥स्रुवोदृयोर्होम पात्रेशल्लकीमूर्वयोःस्त्रियाम्॥हवआज्ञाध्वराह्वानेहस्तोन्यस्रु रवर्वयोस्त्रिषु॥३०॥ ॥वन्त्रि॥ ॥अक्षीवंवशिरे शिग्रोनामत्तेषुनरन्यवत्॥अभावोमरणेसत्वेआहवोयुद्धय ज्ञयोः॥३१॥आर्तवंस्त्रीरजेपुष्पेक्लीबंस्याद्दतुजेत्रिषु॥आश्रवो गीकृतोक्लेशेनान्यवद्वचनस्थिते॥३२॥उद्भवोयादवभिदिमहे चक्रतुपावके॥उत्सवोमहउत्सेकेइच्छाप्रसवकोपयोः॥३३॥का रवीमथुरादीप्यत्वक्पत्रीकृष्णजीरके॥किंतवस्तुपुमान्मत्तेवंच केकनकाह्वये॥३४॥केशवोऽजेचपुन्नागेपुंसिकेशवतित्रिषु॥के तवंतुछलेद्यूतेकैरवःकितवेरिपौ॥३५॥नपुंसकंचकुसुदेचंद्रिका यांतुकैरवी॥गांडीवोगांडिवभ्राऽस्त्रीकार्मुकेऽर्जुनकार्मुके॥३६ ॥गालवस्तुमुनौलोध्रेतांडवोऽस्त्रीत्रणांतरे॥भवेद्रुद्रतनृत्येच त्रिदिवासरिदंतरे॥३७॥पुंसिस्वर्गेदीक्षिविनाधिषणेऽन्नेतदस्त्रि यास्॥निष्पावःभूपपवनेराजमेषेकडंगके॥३८॥पवनेशिंबिका यांन्यानिर्विकल्पेऽन्यलिंगकः॥निन्हवःपुंसिनिह्नताबविश्वासा पलापयोः॥३९॥पल्लवोऽस्त्रीकिसलयेविटपेधिस्तरेवने॥शृंगा रेऽत्करागेस्त्रीप्रभावःशांतितेजसोः॥४०॥पंचत्वंपंचानांभावे प्राणानामत्ययेपिच॥प्रभवोजन्ममूलेस्याज्जन्महेतोपराक्रमे॥ ४१॥ज्ञानस्यचादिमस्थानेप्रसवोगर्भमोचने॥उत्पादेस्यादपत्ये-

पिफलेचकुरुक्षमेपिच॥४२॥प्रसेवःपुंसिवीर्णांगेस्तूतेचपार्थिवोनृपे पार्थिवीतुसीतायांपृथिव्यांविकृतौत्रिषु॥४३॥पुंगवःस्याद्बलीवर्दे प्रभेदेप्यौषधस्यच॥उत्तरस्थःपुनःश्रेष्ठेफेरवोजंबुकेस्त्रपे॥४४॥बल्लवःसूपकारेस्यात्भीमसेनेचगोदुहि॥बोधबोबंधुरुक्षुद्दोर्भार्गवोगजधन्विनोः॥४५॥शक्रेपरशुरामेचभार्गवीपार्वतीश्रियोः॥भूर्वीयांभैरवःपुंसिशंकरेभीषणेत्रिषु॥४६॥माधवोऽजेमधोरार्थेमाधवेनास्त्रियांमिसौ॥मधुशर्करावासंतिकुट्टनीमदिरासुच॥४७॥गोमहिष्यादिसंपत्तौयादवःपुंसिकेशवे॥राजीवंनलिनेनातुभेदेहरिणमीनयोः॥४८॥राघवोब्धर्महामीनभेदेचरघुवंशजे॥रौरवोनरकेघोरेवडवाह्निजयोषिति॥४९॥अश्वायांकुलटास्यांचनारीजात्यंतरेपिच॥वाडुवंकरणेस्त्रीणांघोटकोघेनपुंसकम्॥५०॥पातालेनस्त्रियांपुंसिब्राह्मणेवडवानले॥विभवोरेमोक्षैश्वर्येविद्वोविदुतौधिषि॥५१॥विभावःस्यात्परिचयेरसस्योद्दीपनादिषु॥शात्रवंभावसंहत्योःशत्रूणांशात्रवोद्विषि॥५२॥षाडवोनागरसयोःसचिवोमंत्रिचेटयोः॥सहायेसंभवोहेतावुत्पत्तौमेलकेपिच॥५३॥आधारानतिरिक्तत्वेप्याधेयस्यनिगद्यते॥स्कंधोवासुदेवस्यहयेशारवामृगेश्वरे॥५४॥स्कंधकारवेल्लेस्यात्कृष्णजीरकजीरयोः॥सैंधवोऽस्त्रीमणिमंथेनाश्वेसिंधुभवेत्रिषु॥५५॥ ॥वचतुः॥ ॥अनुभावःप्रभावेस्यान्निश्चयेभावबोधके॥भवेदभिषवःस्नानेमद्यसंधानयज्ञयोः॥५६॥अपन्हवस्तुपुंलिंगःस्मृतःस्नेहापलापयोः॥आदीनवःपुमान्दोषेपरिक्लिष्टदुरंतयोः॥५७॥उपप्लवःसैंहिकेयेविप्लवोत्पातयोरपि॥कुशीलवस्तुवास्त्रीकोनटयाचकयोरपि॥५८॥जलबिल्वःकर्कटेस्यात्पंचांगेजलचत्वरे॥जीवंजीवश्चकोरेस्याद्द्रुभभेदेपिपुंस्ययम्॥५९॥धामार्गवस्तुपुंसिस्यादपामार्गेचयोषकः॥पारिप्लवश्चाकुलेस्याच्चंचलेचपराभवः॥६०॥तिरस्कारेविनाशेचपुंसिपारशवःपुमान्॥

परस्त्रीतनयेशस्त्रेहिजाच्छूद्रासुतेपिच॥६१॥पुंदग्रीवस्तुपुंल्लिंगो गर्गरीतास्त्रकुंभयोः॥बलदेवोबलेवातेत्रायमाणौषधौस्त्रियाम्॥६२ रेतिदैत्यस्तृनृपतेर्भेदेचगरुडध्वजे॥रोहिताश्वश्चिचाभानो हरिश्चंद्र नृपात्मजे॥६३॥अथशीतशिवक्लीबंशेलेयमणिमंथयोः॥पुंसिस क्तुफलाढक्षेतथामधुरिकौषधौ॥६४॥सहदेवाबलादंडोत्पलयोः शालिभेषधौ॥सहदेवीतुसर्पाक्ष्यांपुंसिस्यात्तांडवेपुनः॥६५॥ ॥ इतिपंच॥ ॥आशितंभवमन्नाद्येतृसावप्याशितंभवा॥ ॥इतिवांतवर्गः॥ ॥शहिः॥ ॥अंशः प्रभाकिरणयोर्नाशौतृष्णादिशोःस्त्रियाम्॥आशकर्धान्यांतरेशाग्रे पीशालांगलदंडके॥७॥ईशःप्रभौमहादेवेकाशीवाराणसीपुरे॥ नस्त्रियांतृणभेदेस्यात्कीशोदिगंबरेकपौ॥२॥कुशीफालेकुशार ब्जांघ्रिपापिष्ठमत्तयोः॥योक्करामसकतद्वीपेनादर्भेस्त्रीकुशंज लै॥३॥केशःस्यात्पुंसिवरुणेन्हीबेरेकुंतलेपिच॥कोशोदुःखेपिको षेपिव्यवसायेपिदृश्यते॥४॥कोशोस्त्रीकुड्मलेपात्रेदिव्येरवडुग पिधानके॥जातिकोशेर्थसंघातेपेश्यांशब्दादिसंग्रहे॥५॥दर्शस्तुस्या दृष्टाभास्यागभेदावलोकने॥दंशःकीटविशेषेचवर्मदंशनयोः प्रमान्॥६॥दशावस्थादीपवर्त्योर्वस्त्रांतेभूम्नियोषिति॥दृक्स्त्रि यांदर्शनेनेत्रेबुद्धौचक्षिषुवीक्षके॥७॥नाशःपलायनेपिस्यान्निध नानुपलंभयोः॥निशादारुहरिद्रयांस्यात्रियामाहरिद्रयोः॥८॥ पक्षःपृंगादिदेवाजेनाऽन्यंपक्षदर्शने॥पाशःकेशादिपूर्वस्या त्तालंधेकर्णपूर्वकः॥९॥स्कंधेचस्तसामर्थ्यान्मृगपक्ष्यादिबंधने ॥पांशुर्धूलौचसस्यार्थेचिरसंचितगोमये॥१०॥पेशीस्तूपक्वकलि केमांस्यांरवडुपिधानके॥मांसपिंड्यामंडभेदेराशिमेषादिपुंज नयोः॥११॥पुंसिवंशःकुलेवेणौपृष्ठावयवबर्गयोः॥वशाबंध्यास्त नयोःस्त्रीगवीकरेणीषुच॥१२॥शिवायत्तेक्लीबमायत्तत्वेचेच्छा प्रभुत्वयोः॥विट्पुंसिमनुजेवैश्येवेशोवेश्यागृहेगृहे॥१३॥

नेपथ्येचशशोबोलेलोभेनृपशमेदयोः॥स्पर्शोरुजायांदानेचस्प
र्शनेस्पर्शकेपिच॥१४॥स्पर्शःस्यात्संपरायेचप्रणिधावपिपुंस्ययम्
॥ ॥शब्दिः॥ ॥आदर्शोदर्पणेदीकाप्रतिपुस्तकयो
रपि॥१५॥उड्डीशोग्रंथभेदेस्यादुड्डीशश्चंद्रिकापतौ॥उपांशुजप
भेदेस्यादुपांशुर्विजनेऽव्ययम्॥१६॥कपिशास्त्रिषुश्यावेस्त्रीमाध
व्यांसिल्हकेपुमान्॥ककशःकाशमर्देक्षुकांपिल्येषपयसोपुमान्
॥१७॥त्रिषुसाहसिकेक्रूरेदृढमस्तृणनिर्दये॥कीनाशःकर्षकक्ष
द्रोपांशुघातिषुवाच्यवत्॥१८॥यमेनाकुलिशोनस्त्रीदंभोलोना
ङ्गषांतरे॥गिरीशोऽद्रिपतौषाचस्यनिशंकरयोःपुमान्॥१९॥तुंगी
शस्तुपुमान्गोरीवल्लभेहिमदीधितौ॥दुःस्पर्शोधन्वयासेनाकंटका
र्योस्त्रियांत्रिषु॥२०॥खरस्पर्शेथनिस्त्रिंशःखड्गेनानिर्दयेत्रिषु॥
निर्देशस्तुपुमान्श्रीशेवेतनेमूर्च्छनेपिच॥२१॥निवेशःपुंसिविन्या
सेशिविरोह्याहयोरपि॥निर्देशःशासनेपिस्यात्कथनोपांतयोरपि
॥२२॥नीकाशोनिश्चयेतुल्येपलाशेछदनेमतम्॥शटीकिंशुककु
रक्षःस्तुपुंसिस्याद्धरितेत्रिषु॥२३॥प्रकाशस्तुस्फुटेख्यातःप्रहासा
तपयोरपि॥प्रदेशोदेशमात्रेस्यात्तर्जन्यंकुष्ठसम्मिते॥२४॥भिन्ना
वपिचपिंगाक्षीनालिकायांनपुंसकम्॥जात्यस्वर्णेपुमान्पक्षीपतौ
मत्स्यांतरेपिच॥२५॥बालिशश्चशिशौमूर्खेभूकेशःशेवलेवटे॥
भूकेशयवलुजेपिस्याल्लोमशोमुनिमेषयोः॥२६॥लोमान्वितेस्त्रि
यांफाकजंयामांसीवचासुच॥भूकशिंशिंशपाहेदाकाशीशेशाकि
नीक्षिदि॥२७॥विवशस्त्रिषुवश्यात्मारिष्टदुष्टधियोरपि॥विकाशः
पुंसिविजनेप्रकाशेसदृशंसमे॥२८॥उचितेचाऽथसंवेशःस्त्रीप-
स्त्रीरतबंधयोः॥खरवाशोव्रुणेराजतिनिशेक्रूरवभोजने॥२९॥
हनाशोनिर्दयेचाशारहितेपिक्रनेपिच॥ ॥शब्दतुः
॥ ॥अपदेशःपुमाँल्लक्ष्येनिमित्तव्याजयोरपि॥३०॥अप
पभ्रंशस्तुपतनेभाषाभेदापशब्दयोः॥आभ्रयासःपुमान्बन्धे

योः॥ ऋषानागबलायांस्त्रीतापमस्यारवीपुमा॥१२॥नर्षोऽस्त्रिप्रो
दन्ययोस्त्रिदृकांतोवाधिरुचोस्त्रियाम्॥तुषोधान्यत्वग्भक्षट्टोस्तृषा
लिप्सातृषोःस्त्रियाम्॥१३॥तृट्तृलिप्सायामुदन्यायांस्मरपुन्नामकि
स्त्रियाम्॥दक्षस्त्रिषुपटौपुंसितास्त्रेचूडेप्रजापतौ॥१४॥मुनिभेदे
हरद्वेषेदुमभेदेस्त्रियांक्षुवि॥दोषःस्याद्दूषणेपापेदोषारात्रौभुजेपि
च॥१५॥ध्वांक्षोमत्स्यात्खगेकाकेनर्कोदेभिक्षुकेपिच॥ध्वांक्षीकक्को
लिकायांस्यान्नुक्षंकात्तृणेपिच॥१६॥क्लीबेऽथपुंसिमहिषेनिरुष्ट
पुनरन्यवत्॥पुक्षोजटीगर्दभांडहीपभित्कुंजराश्वने॥१७॥पक्षोमा
सार्द्धकेपार्श्वगृहेसाध्यविरोधयोः॥केशादेःपरतोदृदेवलेसखिस
हाययोः॥१८॥तुल्लीरंप्रेषतन्त्रेचराजकुंजरपार्श्वयोः॥प्रेक्षानृत्ये
क्षणेबुद्धेप्रेषःक्लेशेचमर्दने॥१९॥उन्मानेप्रेषणेपोषोमासेतत्पूर्णि
मातिथौ॥स्त्रियांभिक्षाभृतोयाञ्चासेगाभिक्षितवस्तुषु॥२०॥माषो
द्वीत्यंतरेमूर्खेमानत्वग्दोषभेदयोः॥मिषंव्याजेस्पर्धनेनामेषोराश्यं
तरेस्त्रियाम्॥२१॥भैषज्यभिदिमोक्षस्तुक्लिपादलिमोचने॥यक्षोयु
ग्यकमात्रेचगुह्यकाधीश्वरेपिच॥२२॥रक्षाजतुरक्षणयोरक्षस्त
प्रेम्णयचिक्कणे॥लक्षानपुंसिसंख्यायांक्लीबंव्याजशरव्ययोः॥२३॥
वर्षोऽस्त्रीभारतादोचजंबूद्वीपाब्दहर्षेषु॥प्रावृट्कालेस्त्रियांभू
म्निविदूरस्त्रीव्यापनविष्ठयोः॥२४॥विषंतुगरलेतोयेऽतिविषायांच
योषिति॥वृषोधर्मबलीवर्देशृंग्यांपुंराशिभेदयोः॥२५॥श्रेष्ठेस्यादु
त्तरस्थभ्रव्यासमूषिकशक्रले॥तथावास्तुस्थानभेदेपुमानेषप्रकी
र्तितः॥२६॥वृषामूषिकपर्ण्योश्चयतीनामासने वृषी॥व्योषंस्या
त्त्रिकटुद्रव्येकरिभेदेपुमानयम्॥२७॥शार्ङ्गिःशोर्षेविलेस्त्रीस्यात्
क्लेषःसंकर्षणेवधे॥अनंतेनाभ्रसादेनस्तनिर्मोल्यार्पणेस्त्रियाम्
॥२८॥इपयुक्तेतरेनस्त्रीशोषोयक्ष्मणिशोषणे॥ ॥ष
ष्ठिः॥ ॥अध्यक्षोऽधिकृतेपुंसिस्यात्त्वक्षेऽग्निधेयवत्॥२९॥अभीषुःप्रग्रहेरश्मौनाकर्षोद्यूतइंद्रिये॥पाशकेशारिफ

लके कोदंडाभ्यासवस्त्रनि॥ ३०॥आकर्षणेपिपुंसिस्यादाभिषंपुन्नंपुंसकम्॥ भोग्यवस्त्रनिसंभोगेप्युत्कोचेपललेपिच॥३१॥उष्णीषंतुशिरोवेष्टेकिरीटेलक्षणांतरे॥उत्प्रेक्षानवधानेपिकाव्यालंकरणांतरे॥३२॥कल्माषंकिल्बिषेक्लीबंपुंसिस्यान्नरकांतरे॥कल्माषोयातुधानेचकृष्णपांडवकृष्णयोः॥३३॥कलुषंत्वाविलेपापेकिल्बिषंपापरोगयोः॥अपराधेपिकुत्साषंकोजिकेयावकेपुमान्॥३४॥गंडूषोमूरवपूर्तीभिपुष्करप्रसृतोन्मिते॥गवाक्षीशक्रवारुण्यांगवाक्षोजालकेकपौ॥३५॥गोरक्षोनागरंगेस्याद्गवांचपरिरक्षके॥जिगीषाजेतुमिच्छायांव्यवसायप्रकर्षयोः॥३६॥तवीषीशक्रकन्यायांपुंसिस्वर्गेमहोदधौ॥तावीषीचंद्रकन्यायांनास्वर्गोबुधिकांचने॥३७॥नहुषोनागभेदेस्यात्सोमवंशनृपेपिच॥निकषःशाणफलकेनिकषायातुमातरि॥३८॥निमेषनिमिषौकालप्रभेदेऽक्षिनिमीलने॥परुषंकर्बुरेरुक्षेनिष्ठुरोक्तौचवाच्यवत्॥३९॥प्रदोषःसमयेदोषेप्रत्यूषोहर्सुरवेवसौ॥पीयूषंसस्यदिवसाधिक्षीरेतथामृते॥४०॥पुरुषःपूरुषेसांख्यज्ञेचपुन्नागपादपे॥पौरुषंपुरुषस्यस्याद्वीवेकर्मणितेजसि॥४१॥ऊर्ध्वविस्तृतदोःपाणिनृमानेत्वभिधेयवत्॥महिषीकृताभिषेकासेरिभ्योरोषधीभिदि॥४२॥मारीषःशाकभिद्यार्षेनाट्योक्त्यापुंसियोषिति॥दक्षोबायांमृगाक्षीतुविशालामृगनेत्रयोः॥४३॥रक्ताक्षःकासरेक्रूरेपारावतचकोरयोः॥रोहिषंकवृणेक्लीबंपुंसिस्याद्धरिणांतरे॥४४॥विश्लेषोविधुरेयोगेशुश्रूषास्यादुपासने॥कथनेश्रोतुमिच्छायांशेलूषोनटबिल्वयोः४५॥संघर्षस्तुपुमानधृष्टौस्पर्धायांचप्रभंजने॥समीक्षातुस्त्रियांतत्त्वेब्रह्मण्यपिनिभालने॥४६॥ ॥षच्चतुः॥ ॥अनुकर्षोरथाधःस्थदारुण्यप्यवकर्षणे॥अंबरीषंरणेभ्राष्ट्रेक्लीबंपुंसिनृपांतरे॥४७॥नरकस्यप्रभेदेचकिशोरेभास्करेपिच॥आक्षानकेऽनुतापेचानिमिषोमत्स्यदेवयोः॥४८॥अनुतर्षःसुरापानपा

तृष्णाऽभिलाषयोः॥ अहिर्हिङ्गुरुडेशक्रेमयूरेनकुलेपुमान्॥ ४९॥अलंबुषाप्रहसेचछर्दनेराक्षसांतरे॥अलंबुषातुमुंडीर्यांस्वर्गवारांगनांनरे॥ ५०॥अथकिंपुरुषोलोकभेदकिन्नरयोःपुमान्॥देवदृक्षःसप्तपर्णेमंदारादिषुगुग्गुलौ॥ ५१॥नंदिघोषोर्जुनरथेघोषेबंदिजनस्यच॥परिवेषस्तुपुंलिंगःपरिधौपरिवेषणे॥ ५२॥परिघोघोनिनादेस्यादवाच्येजलदध्वनौ॥पलंकषागोक्षुरकेरास्नाशुंगुलुकिंशुके॥ ५३॥मुंडीरीलक्षयोश्चस्त्रीराक्षसेतुपलंकषः॥वीरवृक्षस्तुभल्लातकुभद्रुमयोःपुमान्॥ ५४॥भूतवृक्षस्तुशारबोदद्रुमेभ्योनाकपादपे॥महाघोषातुकर्कोटशृंग्यांपुंस्यतियोषणे॥ ५५॥क्लीबंहृद्येराजवृक्षःस्तवर्णालिपियालयोः॥वातरूषस्तुवानूलोत्कटयोःशक्रकार्मुके॥ ५६॥विशालाक्षोहरेतार्क्ष्येनासुनेत्रेऽभिधेयवत्॥सकदाक्षोवराक्षेभाकटाक्षसहितेत्रिषु॥ ५७॥ ॥

इतिषांतवर्गः॥ ॥सह्रिः॥ ॥कंसोस्त्रीतेजसद्रव्येकांस्येमानेसुरेतुना॥कासूर्धिकलवाचिस्यात्तथाशस्त्रायुधेस्त्रियाम्॥१॥गुच्छःस्यात्स्तबकेस्तंबेहारभिद्बुधिपर्णयोः॥गोसोबोलोषसोश्वासदृक्पक्षिभिदोःपुमान्॥२॥त्रासोभयेमणेर्दोषेदासीबाणाशुजिष्ययोः॥दासोभृत्येचशूद्रेचज्ञातात्मनिचधीवरे॥३॥नासातुनासिकायांचदारोर्ध्वदारुणिस्त्रियाम्॥प्रसूरश्वाजनन्योश्चकंदलीवीरुधोस्त्रियाम्॥४॥वस्रःर्मोदेवभेदाग्निभायोश्चवकराजसः॥क्लीबेवृन्दौषधेऽप्येचरेरलमधुरेत्रिषु॥५॥भासःपुंसिप्रभायांस्याद्विशेषेविहगस्यच॥भाःप्रभावेमयूरेस्त्रीमाश्चद्रमासयोःपुमान्॥६॥मांसंस्यादामिषेक्लीबंकक्कोलीजटयोःस्त्रियाम्॥मिसिःस्त्रीमधुरामांस्योःशतपुष्पाजमोदयोः॥७॥मृत्साकाक्ष्यांश्रेष्ठमृदिरसोगंधरसेजले॥शृंगारादौविषेवीर्येतिक्तादौद्रवरागयोः॥८॥देहधातुप्रभेदेचपारदस्यादयोःपुमान्॥स्त्रियांतुरसनापाठाशल्लकीकंगुभूमिषु॥९॥रासःकोलाहलेध्वानेभाषाभृंखलकेपिच॥

क्रीडाभेदेचगोपानांवत्सःपुत्रादिवर्षयोः॥१०॥तर्णकेनोरभिकीबंव्यासोनाविस्तृतेमुनौ॥शंसावचसिवांछायांहंसःस्यान्मानसौकसि॥११॥निर्लोभनृपविष्णवर्केपरमात्मनिमत्सरे॥योगिभेदेमंत्रभेदेशरीरमरुदंतरे॥१२॥तुरंगमप्रभेदेपिहिंसाचौर्यादिघातयोः॥ ॥सत्रिः॥ ॥अलसाहंसपद्मानापादरोगद्रुभेदयोः॥१३॥क्रियामंदेत्रिषथाऽर्विर्मयूरवशिरव्योर्नना॥अदःपरस्मिन्नत्रस्यादभ्यासोऽभ्यसनेऽतिके॥१४॥आगोऽपराधेपापेस्यादाश्वासःपुंसिमिश्रितौ॥आरब्धायिकापरिच्छेदेचाशीर्देवेमरुद्भुजाम्॥१५॥हितस्याशंसनेस्त्रीस्यादिश्वासःकार्मुकेपुमान्॥त्रिषुस्यात्क्षेपकेचेषोरुच्छ्वासःप्राणनेपिच॥१६॥आरब्धायिकापरिच्छेदेप्याश्वासेपिपुमानयम्॥उत्तंसःकर्णपूरेपिशिरिवरेपिचनस्त्रियाम्॥१७॥उषःप्रत्यूषसिक्लीबंपितृप्रस्थांचयोषिति॥उरोवक्षसिचश्रेष्ठेवृंनःपापापराधयोः॥१८॥ओजोदीप्तावविष्टंभेप्रकाशबलयोरपि॥ओकआश्रयमात्रेचमंदिरेचनपुंसकम्॥१९॥कीकसःकृमिजातौस्यात्पुंसिकुत्स्येनपुंसकम्॥चमसोयज्ञपात्रस्यभेदेस्त्रीपिष्टकेस्त्रियाम्॥२०॥छंदःपद्येचवेदेचस्वेराचाराभिलाषयोः॥ज्यायोरश्मेतिप्रशस्तेज्योतिरग्नौदिवाकरे॥२१॥पुमान्नपुंसकंदृष्टौस्यान्नक्षत्रप्रकाशयोः॥तरोबलेचरोगेचतपोलोकांतरेपिच॥२२॥चांद्रायणादौधर्मेचपुमान्शिशिरमाघयोः॥तमोध्वांतेगुणेशोकेक्लीबंबालाविधुंतुदे॥२३॥तामसीनिशिदुर्गायांतामसोमुजगेरवले॥तेजोदीप्तौप्रभावेचस्यात्पराक्रमरेतसोः॥२४॥धनुःपियालेनानस्त्रीराशिभेदेशरासने॥धनुर्धरेत्रिषुनभःक्लीबंव्योम्निपुमान्यने॥२५॥घ्राणश्रावणवर्षासुबिसततंतौपतद्ग्रहे॥पनसःकंटकिफलेकंटकेषानरांतरे॥२६॥स्त्रियांरोगप्रभेदेस्यात्पयःस्यात्क्षीरनीरयोः॥पायसस्तुक्लीबपुंसोःश्रीवासपरमान्नयोः॥२७॥पुक्कसीकलिकानीत्योःपुक्कसःश्वाप

चेऽधमे ॥ बीभत्सौ नार्जुनेक्रूरघृणात्मविकृतौत्रिषु ॥ २८ ॥ भूयां स्त्रियु बहुतरेपुनरर्थेत्वदोऽव्ययम् ॥ मनश्चित्तेमनीषायां महउत्सवतेजसोः ॥ २९ ॥ मानसंसरसिस्वांतेरभसो हर्षवेगयोः ॥ रहस्तवेरतेगुह्येरजःक्लीबंगुणांतरे ॥ ३० ॥ आर्तवेचपरागेचरेणुमात्रेचदृश्यते ॥ राक्षसोयातुधानेस्याच्चंडायांराक्षसीस्मृता ॥ ३१ ॥ रेपाःस्यादधमेक्रूरेकृपणेप्यभिधेयवत् ॥ रेतःशुक्रेपारदेचरोदश्चरोदसीतिच ॥ ३२ ॥ दिविभूमौपृथक्स्यात्सहोक्त्याप्येतयोस्तथा ॥ लालसोत्सुक्यतृष्णातिरेकयाञ्चासुचद्वयोः ॥ ३३ ॥ वयःपक्षिणिबाल्यादौयौवनेचनपुंसकम् ॥ वर्चोनपुंसकंरूपेविष्ठायामपितेजसि ॥ ३४ ॥ पुंसिचंद्रस्यतनयेबर्हिःपुंसिहुताशने ॥ नस्त्रीकुशेवपुःक्लीबंतनौ शस्त्राकृतावपि ॥ ३५ ॥ वतंसस्तुपुमान्कर्णपूरशेखरयोरपि ॥ वाहसोजलनिर्याणेशयालौसूनिषण्णके ॥ ३६ ॥ वायसोगुरुदृक्षेच श्रीवासधांक्षयोःपुमान् ॥ काकोदुंबरिकायांचकाकमाच्यांचवायसी ॥ ३७ ॥ विद्वानात्मनिदिप्राज्ञेपंडितेचाभिधेयवत् ॥ विलासोहावभेदेस्यात्क्रीलायामपिपुंस्ययम् ॥ ३८ ॥ वितंसोबंधनोपायेमृगाणांपक्षिणामपि ॥ तेषामपिचविश्वासहेतोःप्रावरणेपिच ॥ ३९ ॥ वेधाःपुंसिऋषीकेशेबुधेचपरमेष्ठिनि ॥ शिरःप्रधानेसेनाग्रेशिखरेमस्तकेपिच ॥ ४० ॥ श्रीवासोवृकधूपेपिपंकजेमधुसूदने ॥ श्रेयोमुक्तौशुभेधर्मेऽतिप्रशस्तेचवाच्यवत् ॥ ४१ ॥ श्रेयसीकरिपिप्पल्यामभयापाठयोरपि ॥ सहोबलेज्योतिषिचपुंसिहेमंतमार्गयोः ॥ ४२ ॥ सरसीविश्वकासारेसरोनीरतडागयोः ॥ स्यात्समासस्तुपुंलिंगःसंक्षेपेचसमर्थने ॥ ४३ ॥ सारसःपक्षिभेदेहोःक्लीबंतुसरसीरुहे ॥ साहसंतुबलात्कारकृतकार्येदमेपिच ॥ ४४ ॥ स्फरसस्फत्रिपुत्वादेपर्णाशेतुनपुंसकम् ॥ स्त्रीरास्नानागमात्रोश्चस्रोतोऽबुवेगइंद्रिये ॥ ४५ ॥ हविर्होतव्यमात्रेचसर्पिष्यपिनपुंसकम् ॥ ॥ स चतुः ॥ ॥ अधिवासोनिवासेस्यात्संस्कारेधूपनादिभिः ॥

॥४६॥ अवध्वंसः परित्यागेनिंदनेप्यवचूर्णने॥ अवतंसो नस्त्रियंस्या
त्कर्णपूरेचशेखरे॥४७॥ अगोकाःपुंसिशरभेपक्षिपंचास्ययोरपि॥
उदर्चिरुल्लभेवाच्यलिंगःपुंसिहुताशने॥४८॥ कलहंसस्तुकादंबे
राजहंसेनृपोत्तमे॥ कनीयानल्पियूनिस्यादल्पल्पानुजयोस्त्रियु॥४९॥
कुंभीनसःक्रूरसर्पेस्त्रियांलवणमातरि॥ भवेद्धुनरसःसांद्रेनिर्या
सेमोरटेंबुनि॥५०॥ कर्पूरेपीलुपर्ण्यांचसम्यक्सिंदूरसेपिच॥ चंद्रहा
सोदशग्रीवकरवालेऽसिमात्रके॥५१॥ जटायुःपुंसिसंपातेःकनी
यसिचगुग्गुलौ॥ अथतामरसंपद्मेताम्रकांचनयोरपि॥५२॥ त्रिस्रो
ताजन्हुकन्यायांस्रोतस्त्वल्पेस्त्रियाम्॥ दिवोकाश्चदिवोकाश्चपुं
सिदेवेचचातके॥५३॥ दीर्घायुःशाल्मलीवृक्षवायसेजीवकद्रुमे
॥मार्कंडेयेचपुंसिस्याच्चिरजीविनिवाच्यवत्॥५४॥ नगोकाःपुंसि
शरभेपक्षिपंचास्ययोरपि॥ निश्रेयसंतुकल्याणमोक्षयोःशंकरेपु
मान्॥५५॥ नीलांजसाप्सरोभेदेसरिद्भेदेचविद्युति॥ प्रचेताःपा
शिनिमुनौनाम्निकृष्टत्वदिभिषु॥५६॥ पुमर्वस्कर्नामुनिभिद्यजेद्वित्वे
तुभांतरे॥ पौर्णमासःपुमान्यज्ञभेदेस्त्रीपूर्णमातिथौ॥५७॥ महा
रसःस्यात्खर्जूरेकोशकारकशेरुणोः॥ मलीमसस्तुमलिनेपुष्प
काशीसलोहयोः॥५८॥ भवेन्मधुरसाद्राक्षामूर्विकादुग्धिकासुच
॥यमस्वसानुदुर्गायांयमुनायामपिस्त्रियाम्॥५९॥ यवीयानतु
जेपिस्यादतियूनिचवाच्यवत्॥ रासेरसस्तुगोक्षेस्याद्रासशृंग
योरपि॥६०॥ रससिंदूरसावासषडीजागरकेपिच॥ राजहंसस्तु
कादंबेकलहंसेनृपोत्तमे॥६१॥ वरीयान्योगभिक्षेष्ठवरिष्ठधनियू
निच॥ विहायाःशकुनेपुंसिगगनेपुन्नपुंसकम्॥६२॥ विभावसुः
पुमान्सूर्येहारभेदेचपावके॥ स्वःश्रेयसंचकल्याणेपरमात्मनिशा
मणि॥६३॥ अथसर्जरसोवाद्यभांडभेदेचधूपके॥ ससार्चिःपाव
केपुंसिक्रूरचक्षुषितुस्त्रिषु॥६४॥ साधीयानतिवादेस्यादतिसाधौ
चवाच्यवत्॥ सिंदूरसोरसेपुंसिधातुप्रभृतिषुस्त्रिषु॥६५॥ सुमनाः

पुष्पमालत्योः स्त्रियांनाधीरदेवयोः॥ रुमेधारुस्त्रियांज्योतिष्मत्यां
त्रिपुरुबुद्धिनि॥६६॥ ॥सपंच॥ ॥दिव्यचक्षुः
रुगंधस्यभेदेनांधेरुलोचने॥स्यान्नभश्चमसश्चंद्रेचित्रापूपेंद्रजा
लयोः॥६७॥हिंगुनिर्यासइत्येषनिंबेहिंगुरसेपिच॥ ॥
सषट्॥ ॥हिरण्यरेताःपुंसिस्याद्दिवाकरहविर्भुजोः॥६८
॥ ॥इतिसांतवर्गः॥ ॥हैकम्॥ ॥हः
शिवेसलिलेशून्येधारणेमंगलेपिच॥गगनेनकुलीशेचरक्तेनाकेचव
र्ष्मते॥१॥ ॥हहिः॥ ॥अहिर्हयासुरेसर्पेपुंसीहो
द्यमयांछयोः॥कुहूःस्त्रीकोकिलालापेनष्टेंदुकलदर्शयोः॥२॥ग्रहो
नुग्रहनिर्बंधग्रहणेषुरणोद्यमे॥सूर्यादौपूतनादोचसैंहिकेयोप
रागयोः॥३॥ग्राहोग्रहेऽवहारेचगुहःषाण्मातुरेयुहा॥सिंहपुच्छ्यां
चगर्तेचपर्वतादेश्चगह्वरे॥४॥गृहंगृहाश्रमेपुंभूम्निकलत्रेपिच
सद्मनि॥नाहरुबंधनेकूटेग्रोहोगजांघ्रिपर्वणोः॥५॥वाच्यव-
न्निपुणेतर्केवर्हेपिच्छेदलेस्त्रियाम्॥बहुस्याच्यादिसंरव्यासवि
पुलेप्यभिधेयवत्॥६॥महीनद्यंतरेभूमेमहउत्सवतेजसोः॥अ
थमोहोन्यलिंगःस्यादविद्यायांचमूर्च्छने॥७॥लोहोःस्त्रीशस्त्रके
लोहेजोंगकेसर्वतेजसे॥वहःस्याद्वृषभस्कंधेवाहेगंधवहेपिच॥
८॥वाहोभुजेपुमान्मानभेदान्वृषवायुषु॥व्रीहिःसामान्यधा
न्येस्याद्दासुधान्येतुपुंस्ययम्॥९॥व्यूहःस्याद्दलविन्यासेनिर्माणे
ऽंदतर्कयोः॥सहोबलेनस्त्रियांस्यात्स्त्रियांतुनरभेषजे॥१०॥हं
डोत्पलासुद्रुपर्णीकुमारीपृथिवीषुच॥सिंहःकंधारवेराशोसत्तमे
चोत्तरस्थितः॥११॥सिंहीतुकंदकार्यांस्याद्दार्तीकोवासकेपिच॥स्नु
हःस्यात्पुंसितेलादिरसद्रव्येचसौम्यदे॥१२॥ ॥हभिः
॥ ॥अत्यूहोनालिकायांस्त्रीकालकंठरवगेपुमान्॥आ
ग्रहोनुग्रहासक्तोराक्षसेग्रहणेपिच॥१३॥आरोहस्तवरोहेच
वरारोहाकदावपि॥आरोहणेगजारोहेदीर्घत्वेचसमुच्छ्रये॥१४

उत्साहस्तूद्यमेसूत्रे कटाहः कूर्मकर्परे॥ द्वीपस्यचप्रभेदेस्यात्तैला
देःपाकभाजने॥१५॥जायमानविषाणाग्रमहिषीशावकेपिच॥
कलहंयुद्धकालेनारवङ्गकोशेचमंडने॥१६॥दात्यूहेस्कपुमान्काल
कंठचातकपक्षिणोः॥निग्रहोभर्त्सनेपिस्यान्मर्यादायांचबंधने॥
१७॥निर्व्यूहःशिखरेद्वारेनिर्यासेनागदंतके॥निरूहोबस्तिभेदेस्या
द्गृहशून्येचनिश्चिते॥१८॥प्रग्राहस्कतुलासूत्रेषादिप्रग्रहेपिच॥
पटहोनासमारंभेआनकेपुन्नपुंसकम्॥१९॥प्रवहस्कबहिर्या
त्रामातरिश्वप्रभेदयोः॥प्रग्रहस्कतुलासूत्रेबंधेनियमनेभुजे॥२०
॥हयादिरश्मौरश्मौचस्कवर्णोलुमहीरुहे॥प्रचाहस्कप्रवृत्तौस्याद
पिस्त्रोतसिचारिणः॥२१॥वराहःसूकरेविष्णोमानभेदेऽद्रिमुस्तयोः
॥वाराहीमात्रभेदेस्याद्विष्वक्सेनप्रियौषधौ॥२२॥राजार्हेजौंग
केस्त्रीवंराजयोग्येभिधेयवत्॥विग्रहःकायविस्तारेविभागेतार
णेस्त्रियाम्॥२३॥विदेहःकायशून्येस्याज्जनकान्वयभूमिपे॥वै
देहीरोचनासीतावणिक्स्त्रीपिप्पलीषुच॥२४॥संग्रहोगृहदुर्गे
ग्रहसंक्षेपयोरपि॥स्कवहाशङ्क्येलापर्णीगोधापदीषुवीणा
याम्॥२५॥राक्षाशेफालिकयोःस्त्रीस्कवत्वेऽन्यलिंगःस्यात्॥
॥ ॥हचतुः॥ ॥अवग्रहोदृष्टिरोधेप्रतिबं
धेगजालिके॥२६॥अभिग्रहोऽभिग्रहणेऽभियोगेपिचगोरवे॥
अवरोहोवनतरणेप्यारोहेचलतोद्रुमे॥२७॥अश्वारोहाऽश्वगंधा
यांस्त्रियांत्रिषश्चवाहके॥उपनाहोव्रणालेपपिंडेवीणानिबंधने
॥२८॥उपग्रहपुमान्बंधामुपयोगेनुकूलने॥स्याद्गंधवाहानासा
यांपुल्लिंगोमातरिश्वनि॥२९॥तनूरुहंतुलोम्निस्यात्पतत्रेचनपुं
सकम्॥तमोपहःसहस्रांशुमृगांकाजिनवह्निषु॥३०॥प्रतिग्रहः
स्वीकरणेसेन्यपृष्ठेपतद्ग्रहे॥द्विजेभ्योविधिवद्देयेतद्ग्रहेचग्रहांत
रे॥३१॥परिग्रहःपरिजनेपत्न्यांस्वीकारमूलयोः॥शापेपरिबर्हो
राजयोग्यद्रव्यपरिच्छदे॥३२॥परीवाहोजलोच्छ्वासेमहीभृद्यो-

ग्यवस्कनि॥ पितामहो विरिंचे स्यात्तातस्यजनकेपिच॥ ३३॥ महास
हामाषपर्ण्यामम्लानेऽपिचयोषिति॥ ॥हपंच॥ ॥
प्रपितामह इत्येवंविधोपितृपितामहे॥ ३४॥ ॥इतिहांत
वर्गः॥ ॥अथाऽव्ययानिवक्ष्यंतेव्यक्तंपूर्वोदितैःक्रमैः
अकाराद्यंततान्याहुस्तत्स्यादव्ययमित्यतः॥१॥अशब्दःस्यादभावे
पिस्वल्पार्थप्रतिषेधयोः॥अनुकंपायांचतथाधारुदेवेत्वनन्वयः॥
२॥आःप्रगल्भ्यंस्मृतौवाक्येऽनुकंपायांसमुच्चये॥ईषदेचरुषोक्तौचा
पाकरणानुकंपयोः॥३॥ईषिषादेनुकंपायांलक्ष्म्यांपुनरनव्ययम्
॥उसंबंधनरोषोक्त्योरनुकंपानियोगयोः॥४॥पदपूरणेचपादपूर
णेऽपिचदृश्यते॥ऊवाक्यारंभरक्षाऽनुकंपास्वपिचदृश्यते॥५॥ऋ
शब्दोगर्हणेवाक्येदेवांबायांत्वनव्ययम्॥ॠवाक्यारंभरक्षायांव
क्षःस्मृत्योरनव्ययम्॥६॥देवांबायांदनोचापिभैरवेदनुजेगतौ॥
ऌकारोदेवमातायांशुचिकुंभेचकीर्तितः॥७॥ॡकारोदेवनार्योस्या
न्नार्यांत्वन्यपिमातरि॥एस्मृतावप्यसूयानुकंपामंत्रणहूतिषु॥८
एेशब्दोदृश्यतेहूतौस्मृत्यामंत्रणयोरपि॥ओसंबोधनआह्वानेस्म
रणेचानुकंपने॥९॥ओशब्दःकथितोहूतौतथासंबोधनेपिच॥स्त्री
तुविश्वंभरायांस्यात्तुमांस्तुनिस्वनेस्मृतः॥१०॥ ॥कैकम्॥ ॥
कुत्सापेचेषदर्थेचकुत्सायांचनिवारणे॥ ॥कहूः॥ ॥
धिग्भर्त्सनेचनिंदायां॥ ॥कत्रिः॥ ॥मनागप्यल्प
मंदयोः॥११॥हिरुकुशब्दोविनार्थेचमध्यार्थेपिचदृश्यते॥ ॥
गहूः॥ ॥अंगसंबोधनेहर्षेसंगमासूययोरपि॥१२॥ ॥
डुहूः॥ ॥आदरसीमायामभिव्याप्तौक्रियायोगेषुदर्थयोः
॥ ॥चेकम्॥ ॥चान्वाचयेसमाहारेऽन्योन्यार्थेसमुच्चये॥१३॥पक्षांतरेतथापादपूरणेपदधारणे॥ ॥
चहूः॥ ॥किंचारंभेचसाकल्येभाकूपूर्वेस्मिन्नवांतरे॥
१४॥अग्रेप्रभातेतीतेचदेशेदिक्कालयोरपि॥ ॥चत्रिः

तिर्यक्कुतिरोर्थेचकेचिद्वंगादोत्वनव्ययम्॥१५॥ननुचप्रश्नदुष्टोक्त्योः सम्यक्कृदप्रशंसयोः॥ ॥अहिः॥ ॥नञ्भावे निषेधेचस्वरूपार्थेप्यतिक्रमे॥१६॥ईषदर्थेचसादृश्येतद्धिरुक्तद न्ययोः॥ ॥ठहिः॥ ॥स्कुभृशंसनेपिस्यादत्यर्थेच निगद्यते॥१७॥ ॥ठन्निः॥ ॥अपक्षुनिरवद्येचशोभ नार्थेचदृश्यते॥ ॥णच्चतुः॥ ॥अंतरेणपदंधिग्वा द्विनामध्यार्थयोरपि॥१८॥ ॥तेकम्॥ ॥नुपादपू रणेभेदेसमुच्चयेवधारणे॥पक्षांतरेनियोगेचप्रशंसायांविनिग्रहे ॥१९॥ ॥तद्धिः॥ ॥अतिशब्दःप्रशंसायांप्रकर्षेलं घनेपिच॥नितांतासंप्रतिक्षेपेवाचकोप्येषदर्शितः॥२०॥अस्तस्या दभ्यनुज्ञानेऽप्यसूयापीडयोरपि॥प्रतिक्षेपेप्रशंसायांप्रकर्षेलक्षणे पिच॥२१॥असंप्रत्यर्थउद्दिष्टमिति हेतोप्रकाशने॥निदर्शनेप्रकारे स्यात्प्रकृत्यनुकर्षयोः॥२२॥समासोचप्रकरणेऽप्युतात्यर्थेधिक ल्पयोः॥समुच्चयेवितर्केचप्रश्नेचपादपूरणे॥२३॥उत्स्यात्प्रश्नेवित र्केचचेत्कुत्सितप्रशंसयोः॥पक्षांतरेप्यसाकल्येजातुशब्देविगर्हणे ॥२४॥कदाचिदर्थेपितथान्येऽविकल्पनिषेधयोः॥प्रतिप्रतिनिधावि स्थंभूतारव्यानाभिमुख्ययोः॥२५॥मात्रार्थमागवीप्सासकलक्षणप्र तिदानयोः॥बतामंत्रणसंतोषखेदानुक्रोशविस्मये॥२६॥स्वस्ति-स्यान्मंगलेपुण्येप्याशंसायामपिक्वचित्॥स्वित्प्रश्नेचवितर्केचतथे वपादपूरणे॥२७॥हंतवाक्यारंभखेदविषादेहर्षसंभ्रमे॥ ॥ तन्निः॥ ॥आराद्दूरेसमीपेचकृच्छ्रेलाभप्रवेदने॥२८॥ प्रश्नेहर्षेमंगलेचकिमुत्प्रश्नवितर्कयोः॥विकल्पेतिशयेपिस्यात्ताव न्मानेचधारणे॥२९॥संभ्रमेचपरिच्छेदेतथाकार्त्स्न्याधिकारयोः॥ पश्यतस्यात्प्रशंसायांविस्मयेचनिगद्यते॥३०॥पश्चात्प्रतीच्यांपर मेच्यधिकारेपिदृश्यते॥यद्भूत्प्रश्नेवितर्केचयावत्कार्त्स्न्येवधार णे॥३१॥प्रसंख्यायांपरिच्छेदेमानाधिकारसंभ्रमे॥पक्षांतरेचश

श्वत्स्यादात्मप्रश्नेचमंगले॥३२॥पुराकल्पेसदार्थेचपुनरर्थेचदृश्यते
॥सकृत्सहैवकारेस्यात्साक्षात्प्रत्यक्षतुल्ययोः॥३३॥ ॥त
कृतुः॥ ॥अहोबतानुकंपाश्चर्यखेदेसंबोधनेपिच॥पुरस्ता
त्प्रथमेभाव्यामग्रतोर्थपुरार्थयोः॥३४॥ ॥थह्निः॥ ॥
अथाथोसंशयेस्यातामधिकारेचमंगले॥विकल्पानंतरप्रश्नका-
त्स्न्यारंभसमुच्चये॥३५॥तथाभ्युपगमेपृष्टप्रतिवाक्येसमुच्चये॥
सदृशेनिश्चयेपिस्याद्यथातुल्यार्थमानयोः॥३६॥प्रशंसायांवृथा
वंध्येनिष्कारणे॥ ॥थन्निः॥ ॥अन्यथापुनः॥वि
तथेचापरार्थेचसर्वथा हेतुवादयोः॥३७॥ ॥दह्निः॥ ॥
उत्प्रकाशेविभागेचप्राबल्यास्वास्थ्यशक्तिषु॥प्राधान्येबंधनेभा
वेमोक्षेलाभोर्ध्वकर्मणोः॥३८॥यत्गर्हार्हेत्ववधृत्योर्यद्गर्हायि
कल्पयोः॥ ॥धह्निः॥ ॥अधिःस्यादधिकारेचा
पीश्वरेचनिगद्यते॥३९॥ ॥नेकम्॥ ॥नस्यान्निषे
धोपमयोर्निनिवेशभृशार्थयोः॥नित्यार्थेसंशयक्षेपकोशलोपर
मेषुच॥४०॥सामीप्याश्रयदानेषुमोक्षांतर्भावबंधने॥राश्यधो
भावविन्यासेनुवितर्कापमानयोः॥४१॥विकल्पानुनयातीतेप्रश्न
हेत्वपदेशयोः॥ ॥नह्निः॥ ॥अनुहीनेसहार्थे
ऽपश्चात्सादृश्ययोरपि॥४२॥लक्षणेत्थंभूताख्यानभागवीप्सास्व
नुक्रमे॥आयामेचसमीपेचकिन्नुप्रश्नवितर्कयोः॥४३॥चनविस्म
येसाकल्येनानुशब्दोविनिग्रहे॥अनुप्रश्नेपरकृतावधिकारेचसंज्ञ
मे॥४४॥आमंत्रणेप्यनुनयेप्रश्नानुज्ञावधारणे॥नानाशब्दोवि
नार्थेपितथानेकोभयार्थयोः॥४५॥स्थानेतुकरणार्थेस्याद्युक्त-
सादृश्ययोरपि॥ ॥पह्निः॥ ॥अपस्यादप
कृष्टार्थेवर्जनार्थवियोगयोः॥४६॥विपर्ययेचविकृतौचौर्येनिर्देश
हर्षयोः॥अपिसंभावनाप्रश्नशंकागर्हासमुच्चये॥४७॥तथायु
क्तपदार्थेपिकामकारक्रियासुच॥उपस्यादधिकार्थेचहीनार्थो

सन्नयोरपि॥४८॥ ॥अहिः॥ ॥अभीक्ष्णंभूतकथने चाभिसुख्याभिलाषयोः॥ ॥मैकम्॥ ॥माङ्वारणे विकल्पेचेत्स्यातीतेपादपूरणे॥४९॥स्यान्मंगलेपरकृता॥ ॥ महिः वर्मांतिकसहार्थयोः॥आम् ज्ञाननिश्चयस्मृत्योरुमूरोर्वंगीकृतावपि॥५०॥प्रश्नेपिस्यादूम्रुषोक्तौपृच्छायामोमुपक्रमे॥प्रणवेचाप्युपगमेचापाकृतोचमंगले॥५१॥कम्पादपूरणेतोयेमस्तकेचसुखेपिच॥किम्कुत्सायांचितर्केचनिषेधप्रश्नयोरपि॥५२॥किमुसंभावनायांस्यात्विमर्शेचापिदृश्यते॥नामकोपेस्युपगमेविस्मयेस्मरणेपिच॥५३॥संभाव्यकुत्साप्राकाश्यविकल्पेपिचदृश्यते॥शम्कल्याणेसुखेसमृतुशोभनार्थसमर्थयोः॥५४॥संगार्थेचप्रस्तुतार्थेसामिनिंदार्थयोर्मतम्॥हूमूरुषोक्तावनुनयेहुम्स्मृतावप्यपाकृतौ॥५५॥अर्थप्रश्नेऽथनुज्ञायांहूम्स्यात्प्रश्नवितर्कयोः॥ ॥मन्त्रिः॥ ॥ अलम्भूषणपर्याप्तिवारणेषुनिरर्थके॥५६॥शक्तावेवम्प्रकारेस्यादंगीकारेचधारणे॥अर्थप्रश्नेपरकृतासुपमापृच्छ्ययोरपि॥५७॥कथम्हर्षेचगर्हायांप्रकारार्थेचसंभ्रमे॥प्रश्नेसंभावनायांचकामम्चानुमतौस्मृतम्॥५८॥प्रकाशेचप्यसूयायांतथानुगमनेपिच॥जोषम्सुखेप्रशंसायांतूष्णींलंघनयोरपि॥५९॥नूनम्तुनिश्चितेतर्केस्मरणेवाक्यपूरणे॥परम्नियोगेक्षेमेचप्राध्वम्नर्मानुकूलयोः॥६०॥सत्यम्प्रश्नेऽप्युपगमे॥ ॥मन्त्रतुः॥ ॥अवश्यम्नित्यप्रयत्नयोः॥अभीक्ष्णम्मुहुरश्रांतेशीघ्रप्रकर्षयोरपि॥६१॥इदानीम्वाक्यभूषायांसंप्रत्यर्थेचदृश्यते॥तद्दिनम्दिनमध्येस्यात्तथैवप्रतिवासरे॥६२॥साम्प्रतंचाधुनार्थेस्यादुचितार्थेचदृश्यते॥ ॥यद्विः॥ ॥ अथिप्रश्नानुनययोस्तथासंबोधनेपिच॥६३॥अथेकोधविषादेचसंभ्रमेस्मरणेपिच॥दिष्ट्याहर्षेमंगलेचपश्यशब्दस्तुविस्म

ये॥६४॥ प्रशंसायामपितथा यत्रिः समयां
तिकमध्ययोः॥ ॥रेकम्॥ ॥प्रप्रकर्षेगताद्यर्थे
गहिः प्यरेप्राकृत्यसूययोः॥६५॥उर्यूरीचाप्यु भौशब्दौवि
स्तारेंगीकृतावपि॥दुर्निषेधेचदुष्टेचनिर्निर्णयनिषेधयोः॥६६॥प
रिस्यात्सर्वतोभावेवर्जनेव्याधिशेषयोः॥इत्थंभूताख्यानभागवी
प्सालिंगनलक्षणे॥६७॥दोषाख्यानेनिरसनेपूजाव्याप्त्योश्चभू
षणे॥पराविमोक्षप्राधान्यप्रातिलोम्येषुधर्षणे॥६८॥आभिमुख्ये
भृशार्थेचविक्रमेचगतौवधे॥पुरापुराणेनिकटेप्रबंधातीतभावि
षु॥६९॥स्वःप्रेत्यव्योम्निनाकेचा॥ ॥रात्रिः॥ ॥
प्यंतःस्वीकारमध्ययोः॥अंतरापिविनार्थेस्यान्मध्यार्थनिकटार्थ-
योः॥७०॥उरर्य्यूरर्य्यूररीचविस्तारेंगीकृतोत्रयम्॥नकिर्निषेधो
पमयोःप्रादुःप्राकाश्यइष्यते॥७१॥संभाव्येचप्रहर्षेचपुनरप्रथ
मेमतम्॥अधिकारेचभेदेचतथापक्षांतरेपिच॥७२॥ ॥
लहिः॥ ॥किलशब्दस्कचार्तायांसंभाव्यानुशयार्थयोः॥
खलुस्याद्वाक्यभूषायांजिज्ञासायांचसांत्वने॥७३॥द्वीप्सामाननि
षेधेषुपूरणेपादवाक्ययोः॥ ॥वैकम्॥ ॥वा-
स्याद्विकल्पोपमयोर्वितर्केपादपूरणे॥७४॥समुच्चयेचविभ्रंभेना
नार्थांतरयोरपि॥विनियोगेचतथैवपादपूरणे॥७५॥नि
श्चयेसहनेहेतावव्याप्तिविनियोगयोः॥ईषदर्थेपरिभवेशङ्कावि
लंबनेपिच॥७६॥विज्ञाने॥ ॥वहिः॥ ॥उथैवचो
पम्येनियोगेवाक्यपूरणे॥अवधारणेचचारनियोगेचविनिग्रहे
॥७७॥ ॥षहिः॥ ॥उषारात्रौनदंतेचदो
षारात्रौचतन्मुखे॥मंक्षुशीघ्रेभृशार्थेच॥ ॥षत्रिः॥ ॥
निकषांतिकमध्ययोः॥७८॥ ॥सैकम्॥ ॥स्क
पूजायांभृशार्थानुमतिरुच्छ्रसमृद्धिषु॥ ॥सहिः॥ ॥
आस्मरणेपाकरणेकोपसंतापयोरपि॥७९॥ईदुःखभावने

कोपेनिर्निर्बंधेचनिश्चये॥साकल्यातीतयोर्भोस्तुसंबोधनविषाद
योः॥८०॥ ॥सत्रिः॥ ॥अंजसाशब्दआख्यानस्तत्वतूर्णार्थयोरपि॥तिरोऽन्तर्धौनिर्यगर्थेनीचैस्वैराल्पयोर्मतम्॥
८१॥पुरोऽग्रेप्रथमेभूयोऽधिकारेचपुनःपुनः॥मिथोऽन्योन्येरहोर्थेचशनैःस्वैरेशनैश्चरे॥८२॥ ॥सचतुः॥ ॥अभितःशीघ्रसाकल्यसंमुखोभयतोंऽतिके॥अग्रतःप्रथमेचाग्रेपुरतःप्रथमाययोः॥८३॥पूर्वेद्युःप्रातःकालेस्यात्तथैवगतवासरे॥
॥ ॥हेकम्॥ ॥हूःस्यात्संबोधनेपादपूरणेचविनिग्रहे॥८४॥नियोगेचक्षिपायांस्यात्कुत्सायामपिदृश्यते॥ह्याविषादेचशोकेचकुत्सादुःखार्थयोरपि॥८५॥ह्यिपादपूरणेहेतोर्विशेषेत्ववधारणे॥प्रश्नहेत्वपदेशेचसंभ्रमासूययोरपि॥८६॥ह्यीदुःखहेतावारब्धानाविषादेविस्मयेपिच॥हेसंबोधनआक्षानेप्यसूयादौचदृश्यते॥८७॥हेसंबोधनआक्षाने हो होशब्दोतथैतयोः
॥ ॥हहिः॥ ॥अहप्रशंसाक्षिपयोर्नियोगेचविनिग्रहे॥८८॥अहोधिगर्थेशोकेचकरणार्थविषादयोः
॥संबोधनेप्रशंसायांविस्मयेपादपूरणे॥८९॥असूयायांवितर्केस्यादाहक्षेपनियोगयोः॥आहोप्रश्नेविचारेचसहसाकल्पइष्यते॥९०॥विद्यमानेचसादृश्ययोगपद्यसमृद्धिषु॥संबंधेचतथाहीहीशब्दोविस्मयहास्ययोः॥९१॥हेहेसंबोधनेद्वौतौहोहोशब्दस्तथैतयोः॥ ॥हन्निः॥ ॥अहहेत्यद्भुतेखेदेपरिक्लेशप्रकर्षयोः॥९२॥संबोधनेऽपिचोताहोप्रश्नविचारयोः॥ ॥इत्यव्ययानेकार्थवर्गः॥ ॥२३७८॥ ॥उत्पलिनीशब्दार्णवसंसारावर्तनामसाराख्यान्॥भार्गुरिवररुचिशाश्वतबोपालिनरंतिदेवहरकोषान्॥१॥अमरशंभोकहलायुधगोवर्धनरभसपालकृतकोषान्॥रुद्रामरदत्ताजयगंगाधरधर

णिकोषांश्च॥ हारावल्यभिधानंत्रिकांडशेषंचरत्नमालांच॥अपि च हुदोषंविश्वप्रकाशकोषंचसूरिचार्य॥३॥वाग्भटमाधवचाचस्पति धर्मव्याडिनारायणालारव्यान्॥अपिविश्वरूपविक्रमादित्यनामलिंगानिसूरिचार्य॥४॥कात्यायनचामनचंद्रगोमिरचितानि लिंगशास्त्राणि॥पाणिनिपदानुशासनपुराणकाव्यादिकंचसूनिरूप्य॥५॥षट्शतगाथाकोषप्रणयनविख्यातकोशलेनायम्॥मेदिनिकरेणकोषःप्राणकरसूनुनारचितः॥६॥ ॥

इतिमेदिनिकृतानेकार्थकोषःसमाप्तः॥ ॥शंभंभवतु॥ ॥

॥इतिमेदिनिकोशःसमाप्तः॥

॥अथएकाक्षरीकोशःप्रारभ्यते॥

श्रीगणेशायनमः॥ ॥अकारोवासुदेवःस्यादाकारस्तुपितामहः॥पूजायामपिमांगल्येआकारःपरिकीर्तितः॥१॥ इकारउच्यतेकामोलक्ष्मीरीकारउच्यते॥उकारःशंकरःप्रोक्त ऊकारश्चापिलक्षणे॥२॥रक्षणेचापिऊकारऊकारोब्रह्मणिस्मृतः॥ऋकारोवेदमातास्यात्ॠकारोदनुजप्रसूः॥३॥ऌकारोदेवजातीनांमातासद्भिःप्रकीर्तिता॥ॡकारःस्मर्यतेपूर्वैर्जननीशब्दकोविदैः॥४॥एकारउच्यतेविष्णुरैकारःस्यान्महेश्वरः॥ओकारस्तुभवेद्ब्रह्मौकारोनंतउच्यते॥५॥अंस्याच्चपरमंब्रह्मअःस्याच्चैवमहेश्वरः॥कःप्रजापतिरुद्दिष्टोकोकंवाय्वनलेषुच॥६॥कश्चात्मनिमयूरेचकःप्रकाशउदाहृतः॥कंशिरोजलमाख्यातंकंसुखंचप्रकीर्तितम्॥७॥पृथिव्यांखुःसमाख्यातःखुःशब्देपिप्रकीर्तितः॥खंविंद्रियेखवमाकाशेखवःस्वर्गेपिप्रकी

र्तितः॥८॥ सामान्येचतथाशून्येरवशब्दःपरिकीर्तितः॥ गोगणेशः समुद्दिष्टोगंधर्वोगःप्रकीर्तितः॥९॥ गंगीतंगाचगाथास्यात्गौश्चधेनुःसरस्वती॥ घाघंटाथसमाख्याताघोघनश्चप्रकीर्तितः॥ १०॥ घंटीशेहननेधर्मेघुर्घोणाघूर्ध्वनावपि॥ ङःकारोभैरवःख्यातोङःकारोविषयस्पृहा॥११॥ चश्चंद्रमाःसमाख्यातोभास्करेतस्करेमतः॥ निर्मलेछंसमाख्यातंतरलेछःप्रकीर्तितः॥१२॥ छेदकेछःसमाख्यातोविद्वद्भिःशब्दकोविदैः॥ जकारोगायनेप्रोक्तोजन्यनेजःप्रकीर्तितः॥१३॥ जेताजश्चप्रकथितःसूरिभिःशब्दशासने॥ रवौझकारःकथितोनष्टेझश्चोच्यतेबुधैः॥१४॥ झकारश्चतथावायौनेपथ्येससुदाहृतः॥ अकारोगायनेप्रोक्तोअकारोझर्झरध्वनौ॥१५॥ टोधरित्र्यांचकरकेटोध्वनौचप्रकीर्तितः॥ ठकारोजनतायांस्याद्ठोध्वनौचशठेपिच॥१६॥ ठोमहेशःसमाख्यातोठश्चशून्येप्रकीर्तितः॥ ढढध्वनौचठःप्रोक्तस्तथाचंद्रस्यमंडले॥१७॥ डकारःशंकरेत्रासेध्वनौभीमेनिरुच्यते॥ ढकारःकीर्तितोदक्षानिर्गुणेनिर्धनेमतः॥१८॥ णकारःसूकरेज्ञानेनिश्चयेनिर्णयेपिच॥ तकारःकीर्तितश्चौरेक्रोडपुच्छप्रकीर्तितः॥१९॥ शिलोच्चयेथकारःस्याथ्थकारोनयरक्षणे॥ दकारोभ्रेकलत्रेचछेदेदानेचदातरि॥२०॥ धंधनेसधनेधःस्याद्विधातरिमनावपि॥ धिषणाधीःसमाख्याताधूश्चेवंभारवित्तयोः॥२१॥ नेतानश्चसमाख्याताःस्तरणेनःप्रकीर्तितः॥ नकारःसोगतेबुद्धौरुक्तोवृक्षेप्रकीर्तितः॥२२॥ नशब्दःस्वागतेबंधौवृक्षेसूर्येचकीर्तितः॥ पःकुबेरःसमाख्यातःपश्चिमेचप्रकीर्तितः॥२३॥ पवनेपःसमाख्यातःपःस्यात्पानेचपातरि॥ फफेवातेफकारःस्यात्तथाऽह्वानेप्रकीर्तितः॥२४॥ फूत्कारेपिचफःप्रोक्तस्तथानिष्फलभाषणे॥ बकारोवरुणःप्रोक्तःकलशेबःफलेपिच॥२५॥ वृक्षस्थलेचबःप्रोक्तोगदायांससुदाहृतः॥ नक्षत्रेभंबुधाःप्राहुर्भवनेभःप्रकीर्तितः॥ २६॥ दीप्तिर्भास्या

ऋभूभूमिर्भीर्भयंकथितंबुधैः॥ मः शिवश्चंद्रमाचेधामा लक्ष्मीश्चप्र
कीर्तिता॥२७॥ माचमातरिमानेचबंधनेमः प्रकीर्तितः॥ यशोयः क
थितः प्राज्ञैर्यौवायुरितिशब्दितः॥२८॥ यानेयातरियस्त्यागेकथितः
शब्दवेदिभिः॥ रश्वरामेऽनिलेवन्हौभूमावपिधनेपिच॥२९॥ इंद्रि
येधनरोधेचरुभयेचप्रकीर्तितः॥ लोदासोद्यांलश्चभूमोभयेचा
ल्हादनेपिच॥३०॥ लोचातेलवणेचस्याल्लोदानेचप्रकीर्तितः॥
लःश्लेषेचाशयेचैवप्रलयेसाधनेपिलः॥३१॥ मानसेवरुणेचैवल-
कारःसांत्वनेपिच॥ विश्वपक्षीनिगदितोगगनंप्रतिकीर्तितं॥३२॥
शंसुखंशंकरःश्रेयःशाश्वसीम्निनिगद्यते॥ शयनेशूःसमाख्यातो
हिंसायांशूनिगद्यते॥३३॥ षःकीर्तितोबुधैःश्रेष्ठेषश्चगंभीरलोच
ने॥ उपसर्गेपरोक्षेचषकारःपरिकीर्तितः॥३४॥ सःकोपेवरणेसः
स्यात्तथाभूलिनिकीर्तितः॥ साचलक्ष्मीबुधैःप्रोक्तागोरीसाचसई
श्वरः॥३५॥ हूःकोपेवारणेहूश्चतथाभूलीप्रकीर्तितः॥ हिःपद्मावर
णेप्रोक्तोहिःस्याद्धेत्वधारणे॥३६॥ क्षःक्षेत्रेवक्षसिप्रोक्तोबुधैःक्षः
शब्दशासने॥ क्षिःक्षेत्रेक्षत्ररक्षेचनृसिंहेचप्रकीर्तितः॥३७॥ आ
गमेभ्योभिधानेभ्योधातुभ्यःशब्दशासनात्॥ एवमेकाक्षरंनामा
भिधानंकियतेमया॥ ३८॥ ॥७॥ ॥७॥

इत्येकाक्षरकोशःसमाप्तः

श्रीगणेशायनमः॥ ॥श्रीवज्रयोगिन्यैनमः॥ भुजगपतिविमुक्तस्वच्छनिर्मोकवल्लीविलसितमनुकुर्वन्यस्यगंगाप्रवाहः॥ शिरसिसरसभास्वन्मालतीदामलक्ष्मींलघयतिहिमगौरःसोस्तुवःसाध्यसिध्यै॥१॥ कल्पावसानसमयेस्थितयेकवीनांदेहांतरंकिमपियासुजतिप्रसन्ना॥ यस्याःप्रसादपरमाणुरपिप्रतिष्ठामभ्येतिकामपिनमामिसरस्वतींताम्॥२॥ निर्मत्सराःसुकृतिनःखलुयेविचिन्यकर्णेगुणस्यकणमप्यवतंसयंति॥ येषांमनोनरमतेपरदोषवादेतेकेचिदेवविरलाभुविसंचरंति॥३॥ मुक्तामयातिमधुरामस्तृणावदानछायाधिरागतरलामलसद्गुणश्रीः॥ साध्वीसतांभजतुकंठमसौप्रियेवहारावलीविरचितापुरुषोत्तमेन॥४॥ किन्नेवसंतिसुधियामभिधानकोशाःकिंनुप्रसिद्धविषयव्यवहारभाजः॥ गोष्ठीषुवादपरमोहफलास्तकेषांहारावलीनविदधातिविदग्धमानं॥५॥ एकंतमेवगणयंतिपरंविदग्धावाचांविदग्धिमनिमज्जतियस्यलोकः॥ गोष्ठीषुयःपरमशाब्दिकदुर्गमास्तदुर्बोधशब्दगतसंशयमुच्छिनत्ति॥६॥ आव्याधशब्दतःश्लोकैरर्थैरातलिनात्ततः॥ शब्दाःपादैर्विचोद्व्याःप्रागनेकार्थतस्ततः॥७॥ ॥विषमनयनशंकूचंद्रमौलिर्मगालीदृषभगतिगणेशोरेरिहाणोदृषांकः॥ त्रिपुरदहनभूलिस्थाणुरवद्गांगिहिंडिप्रियनमशितिकंठाभग्यंकल्माषकंठो॥१६॥८॥ शतधामाचतुष्पाणिःपृश्निगर्भोगदाग्रजः॥ गदीकोस्तुभवक्षाश्चपांचजन्यधरोच्युतः॥८॥ ९॥ वैनतेयःपक्षिसिंहःशाल्मलीहरिवाहनः॥ अमृताहरणस्तार्क्ष्योनागाशनरवगेश्वरो॥८॥१०॥ खगपतंगवियन्मणिभानवोहरिभगेननिदायकराद्रयः॥ किरणमालिविरोचनहेलयोदिनमणिस्तरणिश्चदिनप्रणीः॥१५॥११॥ श्रुतश्रवानुजःक्रोडोमंदश्छायासुतःशनिः॥ सप्तार्चिर्नीलवसनःपातंगिः

शिवस्य१६(८)विष्णोः८(९) गरुडस्य८(१०) सूर्यस्य१५(११)शनेश्चरस्य९(१२

क्रूरलोचनः॥ ९॥१२॥ दाक्षायणीपतिबलक्षगुपक्षजन्मतुंगीशराशि
मणिदर्शविपत्क्रधांगः॥ राजासमुद्रनवनीततमोनुदौमाग्लोरिंदु
रेणतिलकोहरिरोहिणीशौ॥१६॥१३॥महामृगःपुष्करदीर्घमारुतौ
विलोमजिह्मोजलकांक्षिसिंधुरौ॥हिपायिसूर्पश्रुतिकुंभिसामजा
हामदःपेचकिपद्मिपीलवः॥१४॥१४॥दर्वीकरोविषधरःश्वसनास
नोहिश्वकीफणाभरविषायुधदीर्घपृष्ठाः॥कुंभीनसाहिरसनोसम
कोलदंष्ट्रिगोकर्णकुंडलिलतारसनाविषास्यः॥१६॥१५॥ मयास्योप
कृतंपूर्वमयंचोपकरिष्यति॥इतियःक्रियतेसंधिःप्रतीहारःस
उच्यते॥१॥१६॥शेषमक्षरमादायप्रतिश्लोकंक्रमेणयत्॥अन्योन्य
पठ्यतेश्लोकःप्रतिमालेतिसामता॥१॥१७॥ नभश्वरोवायुदारु
र्वनदोगगनध्वजः॥व्योमधूमोजलमसिःरवतमालःपयोधरः॥
८॥१८॥हर्षादुत्सवकालेयदलंकालंबरादिकम्॥आकृष्यगृ
ह्यतेपूर्णपात्रंपूर्णानकंचतत्॥२॥१९॥स्मरतेकर्णदेशेषुयच्चदे
शीयभाषया॥दंपत्योर्जल्पितंमंदंमन्मनंतद्विदुर्बुधाः॥१॥२०॥
यद्दीयतेतुदेवेभ्योमनोराज्यस्यसिद्धये॥उपयाचितकंदिव्यदोह
दंतद्विदुर्बुधाः॥२॥२१॥नक्तंनिर्गत्ययत्किंचिच्छुभाशुभकरंवचः
॥श्रूयतेतद्विदुर्धीरादैवप्रश्नमुपश्रुतिम्॥२॥२२॥ दृङ्मूत्रकमि
त्याहुरिंद्रलुप्तंमनीषिणः॥ग्रीष्महासंवंशकफंवातलूतंमरुज्व
जं॥६॥२३॥दर्शंधनोगृहमणिःस्नेहाशःकज्जलध्वजः॥जटाज्वालो
दशाकर्षीकथितोबहुदृग्वभिः॥६॥२४॥गोमयच्छत्रिकामाहुर्दिलीरं
चशिलींध्रकम्॥ऊर्ध्वंगंचवशारोहंगोलासमपरेविदुः॥६॥२५॥हि
मवान्१हेमकूटश्च१निषधो१मेरु१रेवच॥चैत्रः१ कर्णीच१शृंगी१च

चंद्रमसः१६(१३)गजस्य१४(१४)सर्पस्य१६(१५)प्रत्युपकारार्थंकृतसमंजस१(१६)
अंत्याक्षरक्रमेणश्लोकपाठस्य॥१७)मेघस्य ८(१८) हर्षेवर्षाद्याकर्षणस्य२(१९)
दंपत्योःशनैःकथनस्य१(२०)इष्टार्थंदेवेभ्योदीयमानद्रव्यस्य२(२१)आकाशवाण्याः
२(२२)आकाशउड्डीयमानसूत्रस्य६(२३)प्रदीपस्य६(२४)गोमयच्छत्रिकायाः६(२५)

सतेतेवर्षपर्वताः॥२६॥ इतिश्लोकावधिः॥ ॥व्याधोमृगवधा
जीवोनिषादःपुल्कसःपूरुषः॥५॥बालवायजमिच्छंतिवैदूर्यमणिमुक्त
माः॥२७॥कालग्रंथिःसमाःसंवन्मासमानोयुगासकः॥५॥मासोवर्षा
शकःग्रामोवर्षीगःस्यादृगेणः॥५॥२८॥मदयोगविधानंतुव्यस्तारं
१करिणांविदुः॥पृष्ठवंशस्ययन्मांसंतत्सनं१तत्सचक्षते॥२९॥क
र्णवेधानिकाप्रोक्तानालिके१तिविषाणिनाम्॥प्रवेष्ट१मंतःस्वे-
दानांमदमांसंविदुर्बुधाः॥३०॥कुमारभृत्या१गर्भिण्याःपरिचर्यो
भिधीयते॥नवोदावस्त्रमानंदपट२मिच्छंतिसूरयः॥३१॥कर्णासु
तोमूलदेवोमूलभद्रःकुलांकुरः॥५॥ज्येष्ठामूलीयमिच्छंतिमास
माषादपूर्वजम्॥१॥३२॥नित्यकर्मसमाचारनिष्ठुरत्वैकदुंकता१
वीणानुबंधोधीमद्भिरुपनाहो२ऽभिधीयते॥३३॥स्यात्पालिकाकुंत
लिका२दध्यादिच्छेदनीतुया॥वैशारवोदधिचारःस्यात्तक्राटःकर
घर्षणः॥५॥३४॥स्यादाषादश्वोभोमोनवार्चिर्गगनोल्मुकः॥५॥पं
चार्चिश्चाश्वविष्ठाजोज्ञएकांगःप्रहर्षणः॥५॥३५॥दीदिविर्द्यौशार्चिः
स्याज्जीवःप्राक्फाल्गुनीभवः॥४॥काव्योदैत्यपुरोधाःस्यात्योऽ
शार्चिर्मेयाभवः॥४॥३६॥उपपूरोकचःकेतुराश्लेषाभवआह्निकः
॥५॥ज्योतीरथोग्रहोधारोध्रुवउत्तानपादजः॥४॥३७॥स्वर्भानुग्र
हकल्लोलंविदुरभ्रपिशाचकम्॥३॥वर्णापकोयाचनकोवस्फूर्जीदो
मुरवंपचः॥४॥३८॥जायमानविषाणाग्रेकटाह्नो१महिषीशिशोः॥छेदो
हस्तेनसस्यानांकटभंग१उदाहृतः॥३९॥जलव्राजंगमकुटीकावा
रीमूर्द्धकपरी॥४॥उष्णावारणमत्कूटश्चकांगंचपुटोदजे॥४॥४०॥मुनी

सससंवर्षपर्वतानांप्रत्येकमेकैकं(२६) व्याधस्य५वैदूर्यस्य१(२७)संवत्सरस्य५मास
स्य५(२८)करिणांमदयोगविधानस्य१गजपृष्ठमांसस्य१(२९)गजकर्णवेधिन्याः१गज
दंतमांसस्य१(३१)गर्भिणीपरिचर्यायाः१नवोदावस्त्रस्य१(३२)ग्रामप्रधानदेवताया:
४)ज्येष्ठमासस्य१(३३)नित्यकर्मशक्ततायाः१वैणानुबंधस्य२(३३)दध्यादिच्छेदिन्याः२द
धिमंथनदंडस्य४(३४)मंगलस्य४बुधस्य५(३५)हस्तनक्षत्रस्य४(३६)केतोः५ध्रुव
स्य४(३७)राहोः३याचकस्य४(३८)जातशृंगस्यमहिषीशिशोः१हस्तेनसस्यच्छेदस्य१(३९)ज
लव्रजायाः४कच्छपस्य४(४०)

नीचचिताकुट्यांपर्णादजसहोदजौ॥२॥कारोत्तरश्ववीनाहीग्रहिरंधूर्ज
लांबिका४।४१॥ जलकूपीजलाशीलीतलकंपुष्करिण्यपि॥४॥असन्ना
स्तमयःकश्चिदुपधूपित१रुच्यते॥४२॥तत्क्षणादित्यमुक्तांतुवदंत्यंगा
रिणींदिशम्॥अगारितं१पलाशानांकलिकानिर्गमोभवेत्॥४३॥गो
धारंरक्तचूर्णंतुसिंदूरंरक्तवालुकम्॥४॥कुसृत्याविभवान्वेषीषा
श्विकःसंधिजीविकः॥२॥४४॥अथश्वरोभवेच्चोरःकुसुमालःकुजंभलः
॥४॥प्रोक्तःकरिकुसंभस्तुनागकेसरचूर्णके॥२।४५॥वर्बरंवर्बरीकंच
वर्बरीत्यपिचेष्यते॥३॥अभावात्स्त्रीपरित्यागस्तुरगब्रह्मचर्यके१॥४६
यमिनांयद्व्रतंगोप्यंतत्स्वंजननतरंविदुः॥१॥स्यादाचामनकःप्रोक्तः कट
कोलपतद्ग्रहः॥४॥४७॥मेलामंदामसिमणिमसिधानीमसिप्रसूः५
वालोपरीतंतुविदुःपंचावटमुरस्कटे॥३॥४८॥नारीणांमंडलीनृत्यंतु
धाहल्लीषकंविदुः॥मारीचोयाजकगजोराजहस्तीमदोत्कटः४।४९॥अ
लंकाररूपवर्णंयत्तच्छृंगीकनकं१मतं॥रतिलक्षंनिधुवनंसंयोजन२
मितिस्मृतं॥५०॥जीमूतकुटकुट्टीरकुट्टाराःकंदराकरः॥४॥उद्देशोगंड
कूपस्तुपर्वतस्थाभिधीयते॥५१॥वासितायेनुकाचेववशाचकरिणी
१मता॥ब्रह्मायग्रभूःक्रतुपशुःसिंहविक्रांतवाजिनौ॥४॥५२॥समुद्रगा
निर्झरिणीतलोदाजंबालिनीशैवलिनीतरंगिणी॥विपाठकादंब
कपत्रवाहाःपत्रीरवगोवीरतरोस्त्रकंटकः॥७।५३॥वर्णदूतःस्वस्तिमुखोऽ

सुनिचिताकुट्याः२कूपस्य४(४१)पुष्करिण्याः४आसन्नास्तमयस्य१(४२)तत्क्ष
णादित्यमुक्तदिशः१पलाशकलिकायाः१(४३)॥सिंदूरस्य४पिशुनस्य२(४४)
दिवाचोरस्य२नागकेसरचूर्णस्य२(४५)बर्बरस्य३अभावात्स्त्रीपरित्यागस्य
१(४६)यतीनांगोप्यमैथुनस्य१पतद्ग्रहस्य४(४७)मसिधान्याः५वालकपरिधा
नरत्नस्य३(४८)स्त्रीनृत्यस्य१राजहस्तिनः४(४९)अलंकाररूपवर्णस्य१
मैथुनस्य३(५०)पर्वतस्य४पर्वतोच्चस्थलस्य१(५१)हस्तिन्याः४अश्वस्य
४(५२)नद्याःदृशस्य७(५३)

खोवाचिकहारकः॥४॥लेखोनिबध्यतेयेनतत्रकाचनकाभिधा॥१॥
५४॥क्षाराच्छंमाणिमंथंचविदुःसिंधूपलंबुधाः॥३॥पिशितंपललं
मांसंकव्यमामिषमुच्छ्रसं॥६॥५५॥पारावारमहाकच्छोमहीप्राची
रदारदो॥४॥जिव्हादरःकीकशास्यश्वेतुमत्तरुशायिनौ॥४॥५६॥इं
द्रक्रीडासरःप्राज्ञैर्नंदीसरइतिस्मृतम्॥५७॥धूमोर्णापतिरुद्दिष्टोय
मोमहिषवाहनः॥३॥५७॥पर्योधनोमेघकफोयनोफलोमेघास्थिबी
जोदकतोयडिंभाः॥६॥शंपाचिराप्राचपलाछटाप्राव्हादिन्यधीरा-
घनवल्लिकाच॥७॥५८॥पादालिंदीतरंडानौस्तरणिस्तारणिस्त
रिः॥६॥किलाटःशोधितक्षीरपिंडःसूरिभिरिष्यते॥५९॥कालाय
समयस्तीक्ष्णंगिरिसारंचशस्त्रकम्॥५॥हय्यंगवीनंसरजंमंथज
चकलंबुटं॥४॥६०॥एकशफांघ्रिकंबंधमाहुर्दामांचलंबुधाः॥वे
त्तास्त्रीपुंसयोश्चिन्हंसासुद्रिकाउदाहृतः॥६१॥तिंतिलीकाऽस्थि
भिर्द्यूतक्रीडायांचुंचुलिर्भवेत्॥चक्रालललाटगास्तिस्रोभस्मरेरवा
स्त्रिपुंड्रकम्॥३॥६२॥हालाकामालिकामंडाधीरास्यान्मदनीच
माध्वीच॥६॥आहुश्चषकंतुपानपात्रंपारीमप्यनुतर्षणंकवी
द्राः॥६६॥कुरुंभःकरकश्चैत्यसुरवःकमंडलुः४स्मृतः॥असहा
योनर्तकश्चतालावचर१इष्यते॥६४॥कथितःकौमुदीवृक्षोदीप
वृक्षःशिरवातरुः॥३॥कोजागरेतथासद्भिःकौमुदीचार२इष्यते६५

लिखनपत्रस्य ४ पत्रीबंधनस्य १ ५५४) सैंधवलवणस्य ३ मांसस्य ६
५५५) समुद्रस्य ४ पक्षिणः ४ ५५६) इंद्रक्रीडासरसः १ यमस्य ३५५७)
मेघप्रस्तरस्य ६ विद्युतः ७ ५५८) नोकायाः ६ शोधितक्षीरपिंडस्य
२ ५५९) लोहस्य ५ नवनीतस्य ४ ५६०) एकखुरयुक्तचरणबंधनस्य
३ स्त्रीपुरुषचिन्हकेतुः १ ५६१) अस्थिभिर्द्यूतक्रीडायाः २ ललाटस्थ
भस्मरेखायाः ३ ५६२) सुरायाः ६ पानपात्रस्य ४ ५६३) कमंडलोः ४ अ
सहायनर्तकस्य १ ५६४) दीपवृक्षस्य ३ कोजागरायाः २ ५६५)

समुद्गृहमित्याहुर्जलयंत्रनिकेतनं॥३॥प्रेतादिभिर्गृहीतोयः स आविष्टोऽभ्रमन्वहिः॥६६॥हिमभिंद्राग्निधूमश्वरबाष्पोरजनीजलं॥४॥येशिवायतनोत्सृष्टास्तेसंध्याबलयो३दृषाः॥६७॥विषाक्तास्त्रा हृतस्याहुःपशोर्मांसंतुगृंजनं॥१॥धूमिकाधूममहिर्षाहिमझंटिःकुहेलिका॥४।६८॥पोताच्छादनमाहुस्तुवरकमथवस्त्रकुट्टिमंकेचयः तंत्रविमुक्तंवासोनिष्प्रवाणिनिष्प्रवाणिंच॥६९॥महाघोषंकथारोहं हट्टंपण्याजिरं४विदुः॥बहुमानुषसंकीर्णंनिर्घटंचकरांगणम्॥२॥७० ॥शालभंजीदारुगर्भाकुरंटीदारुपुत्रिका॥४॥कादंबिनीनवोमेघःकालीस्यात्कालिका३पिच॥७१॥कोशध्वनिःकोशतालोदक्का विजयमर्दलः॥स्यान्निपत्तिःपटहोलंपापटह३इत्यपि॥७२॥कुकूलंकायकलनंततुत्रंदशनंविदुः॥शिरस्त्रंशीर्षरक्षंचशीर्षण्यं शीर्षकं४चततत्॥७३॥स्याज्जालिकालोहमयीजालत्राणांगरक्षिणी॥२॥पन्नंध्रीपादविरजाःकोशीपादरथा४भवेत्॥७४॥रुचकंलवणंक्षारंतीक्ष्णंजलरसं३विदुः॥ज्योतिर्बीजंचरवद्योतंध्यांतोन्मेषतमोमणिः॥४॥७५॥जलभूकरजलजिव्होजलकंटकवार्भटौ तथानक्रे॥५॥जलनकुलजालविडालोनीरारवुजलपूवावुद्रे॥५॥७६॥शिशुमारोजलकपिश्चपलांगोऽसिपुच्छकः॥ग्राहोजलकिराटश्चनक्राजो जलांदकः॥४।७७॥मृतकांतकश्चभीरुर्हृकधूर्तशयालुवंचकाभरु

जलयंत्रार्थगृहस्य २ प्रेतादिगृहीतस्य १(६६) हिमस्य ४ शिवालयोत्सृष्टदृषस्य ३(६७) विषाक्तास्त्राहतपशुमांसस्य १ कुहेलिकाया ४(३६) पोताच्छादनस्य ३ तंत्रविमुक्तवाससः १(६९) हट्टस्य ४ बहुनरसंकीर्णहट्टस्य २(७०) काष्ठपुत्तलिकायाः ४ नूतनमेघजालस्य ३(७१) दक्कायाः ४ पटहस्य ३(७२) वस्त्रांगरक्षिण्याः ४ शिरस्त्राणस्य ४(७३) लोहवर्मणः २ उपानहः ४(७४) क्षारलवणस्य ३ रवद्योतस्य ४(७५) नक्रस्य ५ ग्राहस्य ५(७६) शिशुमारस्य ४ ग्राहस्य ४(७७)

जः॥७॥शालामृगोस्थिभक्षोग्राममृगोमंडलः कपिलः॥५॥७८॥उ
ल्कामुखीशृगाल्यादीप्तजिह्वेतिसामता॥स्कंधवाहस्तुशंकुश्चशृं
गीगोरक्षधूम्रिलः॥५॥७९॥हरिबःकासरश्चैवरक्षःसरिभस्तथा॥
रोमशोबहुरोमाख्यादारुणश्चपृथूदरः॥४॥८०॥इडिकुस्तुषालवाख्या
वनच्छागोनिरोमशः ४॥वरणोधूम्रभूकःस्यादुष्टुःशूरवलस्तथा॥
८१॥चक्रमुखःसूचिरोमावराहःस्थूलनासिकः॥४॥कंठीरवस्तु
पारींद्रःकेसरीगजमाचलः॥४॥८२॥नेत्रपिंडोवृषाहारोमेनादः
कुंदम४स्मृतः॥गंधाखुर्गंधनकुलश्छुंछुःपुंवृषउच्यते॥८३॥द्रो
णोरिष्टोनालिजंघआत्मघोषस्तुमोदुलिः॥५॥गोभंडीरःपंककी
रोहापुत्रीराजभृदृका॥४॥८४॥गंगाचिल्लीतुदेवदृविश्वकाजल
कुक्कुटी॥४॥विट्सारिकातुकुणपीगोरादीगोकिराटिका॥४॥८५
मृगेंद्रचटकोधातिपक्षीग्राहकमारकौ॥कुलालंकुक्कुटंप्राहुःकु
क्कुभंकुहकस्वरं॥४॥८६॥कर्कराक्षःकलाटीनःरवंजलेरवस्तुरवं
जनः॥४॥प्रासादकुक्कुटोझल्लकंठोगृहकपोतकः॥३॥८७॥ध्वांक्ष
पुष्टःकलकंठोमधुकंठःकुहूस्वरः॥४॥श्येनपातीमत्स्यरंकःस्याज्जलम
द्गुर्मणीचकः॥४॥८८॥कलविंकश्चित्रपृष्ठोगृहनीडोवृषायणः॥४॥
बर्हिटाचित्रपादाचित्रनेत्राचसारिका॥४॥८९॥मयूरश्चटकोदक्षःकुक
वाकुर्निशाकरः॥४॥शतपत्रःसितापोगःप्रचलाकीत्वचंद्रकी॥४॥९०

शृगालस्य ७ शुनः ५(७८) उल्कामुखीशृगाल्याः १ शकटादिवाहक
वृषभस्य ५(७९) महिषस्य ४ मेषस्य ४(८०) वृहद्वानरस्य ४ उष्ट्रस्य
४(८१) वराहस्य ४ सिंहस्य ४(८२) बिडालस्य ४ छुंछुंदर्याः ४(८३) द
ग्धकाकस्य ५ हापुषाख्यपक्षिणः ४(८४) गंगाचिल्ल्याः ४ विट्सारिका-
यां ४(८५) श्येनस्य ४ वनकुक्कुटस्य ४(८६) खंजरीटस्य ४ कपोतस्य ३
(८७) कोकिलस्य ४ मत्स्यरंगस्य ४(८८) कलविंकस्य ४ सारिकायाः ४
(८९) ग्रामकुक्कुटस्य ४ मयूरस्य ४(९०)

किसलयमपितरुरागंविद्रुर्लतायाचकंप्रवालंच॥४॥कंटकसंज्ञास्तरुनखसिन्नाग्रदलसूचिपांकिलद्रुमराः॥६॥९१॥द्रोणीदलःसूचिपुष्पोजंबूलःकक्कचच्छदः॥४॥मंडलितिक्तफलाधात्रीवल्यांपंचरसाशिवा॥६॥९२॥सहस्रवीर्योविरजाभार्गवीमंडलीरुहा॥५॥प्रहर्षिणीनिशाक्षाचलसागंधपलाशिका॥४॥९३॥मृदुपुष्पःशूकतरुःशिरीषोविषनाशनः॥४॥वराहकालीकथितःसूर्यावर्त२स्तक्षशाद्धिकैः॥९४॥वज्रवल्यास्थिसंहारोहस्तिशुंडीवनालिका॥४॥वनतिक्तस्त्रियांग्रीष्मातिरीटःपक्षस्कंदरः॥३॥९५॥मधुपुष्पोमधूकश्चगुडपुष्पोमधुद्रुमः॥४॥वृत्तपुष्पःप्रावृषेण्योहरिद्रस्कंहलिप्रियः॥४॥९६॥एलात्वचिसुगंधाचपुटिकाचर्मसंभवा॥४॥कूष्मांडकःपुष्पफलोघनवासश्चवेष्टकः॥४॥९७॥वेषणःकासमर्दश्चपत्रोपस्कर३इत्यपि॥ओकोदशालीप्राचीरमोघोलिरवहालिका॥५॥९८॥कल्पवर्तःप्रातराशःप्रातर्भोजनेमिष्यते॥शृगालिकाचर्चिंबंचडमरंविद्रुवो४पिच॥९९॥स्कंधफलःस्वर्क्षुगंधश्चनारिकेलःपटोदकः॥४॥गुडदारुर्मधुत्वृणमसिपत्रोमहारसः॥४॥१००॥राजाक्षुलोमहाकंदोमूलकोहस्तिदंतकः॥४॥क्षुद्ररसातिक्तगुंजासरयाविदूपकर्टी॥४॥१॥क्षुद्रपाचचांगेरीक्षुद्राम्लाचाम्ललोणिका॥४॥प्राचीनामलकंरक्तंबदरामलकं३तथा॥४॥पिष्टसोरभमेकांगंश्रीखंडंमालयं४विदुः॥मृगनाभि

नूतनपल्लवस्य ४ इक्षुकंटकस्य ४(९७) केतकस्य ४ धात्र्याः ४(९२)दूर्वायाः ५ गंधपलासिकायाः ४(९३)शिरीषस्य ४ सूर्यावर्त्तस्य २(९४)अस्थिसंहारस्य ४ लोध्रस्य ३(९५) मधूकवृक्षस्य ४ कदंबस्य ४(९६)एलायाः ४ कूष्मांडस्य ४(९७) कासमर्दस्य ३ भित्तेः ५(९८) प्रातर्भोजनस्य २ भीत्यापलायनस्य ४(९९) नारिकेलस्य ४ इक्षोः ४(१००) मूलस्य ४ करंजस्य ४(१०१) आम्ललोणिकायाः ४ प्राचीनामलकस्य ३(१०२) श्रीखंडस्य ४(१०३)

मृगमदोगंधशेखर ३मित्यपि॥३॥सिताभ्रंतरु सारंच वेरकंरस केसरं॥४॥कालेयंवंशकंजोगंकालीयंवरचंदनं॥५॥४॥तृणसारामृत्स्फलारंभाचकदली४भवेत्॥ऊर्ध्वांसितःपरारुस्यात्तथाराजपटोलकः॥३।५॥कुंकुमंपीतकाचेरंधुसृणंकुसुमात्मकं।४॥अरकोजलकेशश्वकावारंशैवलं४विदुः॥६॥उन्मत्तःकाहलापुष्पोबृहत्पाटलिघांटिकौ॥४॥किंशुकःकरकःपर्णीलाक्षावृक्षःसुभीरवः॥४॥७॥अमंडपंचांगुलवर्धमानागंधर्वहस्तस्त्रिपुटीफल५श्च॥रेणुःसतीलस्तृणकेतुमृत्युर्बीजोकिलाटीचततःकपर्दी॥६॥८॥ कचमालोमरुहाहोधूमोमंभःशिखिध्वजः॥५॥शारवानगर१माहुस्तद्यदभ्यर्णंपुरांतरम्॥९॥आहुर्जलकरंकश्चजलजंसूचिकामुखं॥३॥उपजिह्विकोत्पादिकाचबदिरुद्देहिकादिवी॥५॥१०॥शुल्बमोदुंबरंरक्तंम्लेछास्यंताम्रकं५विदुः॥दुर्नामादीर्घकोषीस्यात्पंकंशुक्तिःसितालिका॥४॥११आकाशमूलीकृतृणंकुंभिकाजलवल्कलम्॥४॥शंबूकोजलदिंबःस्याद्दुश्चरःपंकमंडुकः॥४॥१२॥ आटीलकं१तर्णकानांस्थलीसुक्रीडनंमतम्॥यष्टिःशब्दवतीधीरैःखेखीरक१इतिस्मृता॥१३॥लेखवात्रयांकितंभालंत्रिपताकं१विदुर्बुधाः॥अर्धचंद्रंकर्करेटंविदुरंगुलितोरणम्॥३॥१४॥सिंडुजलंचगृहाम्लमवंतिसोमंतुषोदकंशुक्तं॥५॥नग्नाटकनिर्ग्रंथकभदंत

कस्तूर्याः ३ (१०३) कर्पूरस्य ४ अगुरुइतिख्यातस्य ५ (४) कदल्याः ४ पटोलस्य ३ (५) कुंकुमस्य ४ शैवलस्य ४ (६) धुस्तूरस्य ४ पलाशस्य ४ (७) एरंडस्य ५ वंशस्य ६ (८) धूमस्य ५ नगरांतिकपुरस्य १ (९) शंखस्य ३ उपजिह्विकायाः ५ (१०) ताम्रस्य ५ पंकशुक्तेः ४ (११) कुंभिकायाः ४ शंबूकस्य ४ (१२) तर्णकक्रीडनस्य १ शब्दवतीयष्ट्याः १ (१३) लेखवात्रयांकितभालस्य १ गलेहस्ताधानस्य ३ (१४) कांजिकस्य ५

दिगंबरकानग्ने॥५।१५॥ करणत्रंजलक्रीडाव्यातुक्षीकरपत्रिका ४
शराणांपत्ररचनापत्रणा १परिकीर्तिता॥१६॥ पंचभद्राहया १
स्तेयेपंचस्वंगेषुपुष्पिताः॥यश्चारकोसुद्रशुजांसस्याद्दुष्टभपालक
कः॥१॥१७॥निगालस्थोयआवर्तःसहिदेवमणिः१स्मृतः॥तथाव
क्षसिवाहस्थश्रीवृक्षक१उदाहृतः॥१८॥बंधःपलाशपत्राणांशी
र्षेपत्रपिशाचिका॥१॥ स्रवसंतक१शब्देनउच्यतेमदनोत्स
वः॥१९॥ कर्वटं१द्विशतग्राममध्येग्राममनोहरम्॥ तथाचतुःश
तग्राममध्येद्रोणमुखं१विदुः॥२०॥यद्यात्रामंगलंसामतद्प्रतिर
थं१विदुः॥शालाप्रासादशिखरेचंद्रशालेति१कीर्तिता२१॥ ॥
इत्यर्धश्लोकावधिः॥ ॥तलिनंतुच्छ२मित्याहुर्गृहाश्रागृ
हकच्छपः॥रथसंचारिपुरंसौधं१रथ्यापांशुकुली२भवेत्॥एकं
नटःस्यात्कथको२भंडश्चाटुपटुःस्मृतः॥मक्षिकाभस्मराली२स्या
त्पांशुरोदंशकः२स्मृतः॥२३॥ देवोद्यानंतुवैभ्राजं२दीपालीदी
पशृंखला॥२॥सुकुमारेपिसोमालं२विषमेस्थपुटं२विदुः॥२४
द्रुणाहःखड्गपिधानं२सारिणीचप्रणालिका॥२॥यज्ञस्थानंयज्ञ
वाट२स्तृणाधनपिशाचिका॥२॥२५॥स्मृताबाल्वंगिरिर्वारूः२स्कु

दिगंबरयोगिनः ५(१५) जलक्रीडायाः ४ शरपत्ररचनायाः १(१६) पं
चकल्याणघोटकस्य १ अश्वचारकस्य १(१७) अश्वगलोद्देशस्था
वर्तस्य १ अश्ववक्षःस्थावर्तस्य १(१८) पलाशपत्राणांशीर्षेबंधस्य १ म
दनोत्सवस्य २(१९) द्विशतग्राममध्यग्रामस्य १ चतुःशतग्राममध्यग्रा
मस्य १(२०) यात्राकालेसामवेदपाठस्य १ प्रासादशिखरस्थशाला
याः १(२१) तुच्छस्य २ पेषणशिलायाः २ सौधस्य १ राजमार्गस्य २
(२२) कथकस्य २ भंडस्य २ मक्षिकायाः २ दंशस्य २(२३) देवोद्यान
स्य २ दीपावल्याः २ सुकुमारस्य २ विषमस्य २(२४) खड्गपिधानस्य
२ जलनिर्गममार्गस्य २ यज्ञस्थानस्य २ लोमस्य २(२५) इर्वारोः २(२६)

टिरिर्वीरुशक्तिका॥२॥नाडाम्रस्तिमिषःसेदुः३कोमांसिकातुजालिका॥२॥२६॥पुंजातुकःफलेलांकु२स्तृणतांधनु२रिष्यते॥केरातोदीर्घदृक्षामाः३सिंघाणंकाचभाजनं॥२॥२७॥दर्वदोदंडवादी२स्यात्स्तेनःशंकिकवर्णकः॥२॥प्रारब्धिःकरिबंध२स्यात्कष्टस्थानंतुवारकम्॥२॥२८॥भोगावलीबंदिपाठः२सेतुःपूरणपिंडलो॥३॥देवद्रोणीदेवयात्रा२भूनाधोजिह्विका२मता॥२९॥पालिःसमुत्थितश्मश्रु२मरुंडोञ्चललादिका॥२॥राका१दृष्टरजाःकन्यापोदा१स्त्रीपुंसलक्षणा॥३०॥महत्तरोग्रामकूटो२मर्म्मरो१ऽव्यक्तनिःस्वनः॥शिवालयःपितृवनं२चिताकाष्ठमठीचितिः॥१॥३१॥कर्णवंशोभवेन्मंचः२श्रीग्रहःशकुनिप्रपा॥२॥तांबूलदोवागुलिकः२सुरभिःफाल्गुनानुजः॥२॥३२॥तांबूलरागोमसुर२स्तरुवारिःकृपाणकः॥२॥स्वागतंकुशलप्रश्न२सामीचीवंदनोमता॥३३॥संपुटःसंपुटो२ज्ञेयोहयस्कंधोहयच्छदा॥२॥पिंडारोमहिषीपाले२मसूरेचगभोलिकः॥२॥३४॥काहलीतरुणी२प्रोक्ताछुरालुकथितासुधा॥२॥कांपिल्लिकारोचनिका२कालिकाधस्करादिका॥२॥३५॥

स्फुटेः२नाडाम्रस्य३जालिकायाः२(२६)जीवन्नदृक्षस्य २धनुषः२बलवत्पुरुषस्य३काचभाजनस्य२(२७)दंडवादिनः२चौरस्य२गजबंधनस्तंभस्य२कष्टस्थानस्य२(२८)बंदिपाठस्य२सेतोः३देवयात्रायाः२उलूखलादिपंचभूनायाः२(२९)सम्मश्रुस्त्रियाः२ऊर्ध्वभ्रूस्त्रियाः२दृष्टरजः कन्यायाः१पुंसलक्षणायाः१(३०)महत्तरस्य२अव्यक्तशब्दस्य१श्मशानस्य२चितायाः३(३१)मंचस्य२पक्षिणःपानीयशालायाः२वसंतकालस्य२तांबूलदातुः२(३२)तांबूलरागस्य२खड्गस्य२कुशलप्रश्नस्य२स्वागतेः२(३३)संपुटस्य२हयस्कंधस्य२महिषीपालस्य२बृहन्मसूरस्य२(३४)तरुण्याः२लेपनद्रव्यस्य२रोचनिकायाः२वृश्चिकायाः२(३५)

कालिकाक्षीरकीटः२स्यालवंडपालस्करवांडिकः॥२॥पांशुरःपीठस
र्पी२स्यादुल्लोरोमशः२स्मृतः॥३६॥पूगपात्रेफरुवकं२कबंधोरुंड
२मुच्यते॥वृलिकास्यान्नवतिका२स्यानमालस्य२मुच्यते॥३७॥भा
जनेकमठंप्रोक्तंपुण्यश्लोकोनलो२मतः॥गौरवेभपतिपत्तिः२स्या-
द्धारिःपथिकसंहतिः॥२॥३८॥यामकिन्यपियामिरुत्री२हाफेकाचो
पपुष्पिका॥२॥वातपुत्रेविटधरो३निर्माल्यंनिर्मलं२मतं॥३९॥इंद्रा
सनेमतागुंजा२गुलुंचोगुच्छको२मतः॥भोगावासोवासगृहं२मेंठो
हस्तिपकः२स्मृतः॥४०॥मायुःपलाग्निःपललं३ज्वरःस्यादजीर्ण
मंत्रंधमिरामयश्च॥४॥तृष्टिश्चसोहित्यमुदंतिका३स्यात्क्षुत्क्षारि
काभोगपिशाचिका३च॥४१॥मोगोजलवरंटः२स्यात्कणाकुंभीरम
क्षिका॥२॥वहलंवार्बटःपोत३स्तरालुश्चाहिपुत्रकः॥२॥४२॥काह
लस्कमहानादो२मार्दंगंपत्तनं२विदुः॥स्यादरिष्टंनरिरथः२पात्रपा
लस्कलाधटः॥२॥४३॥काकिनीपणतुर्यांशो१ज्वलदंगारउल्मु
कम्॥१॥अयानंचस्वभावः२स्यान्मंजिकावारसुंदरी॥२॥४४॥नील
मणिर्मसारः२स्याद्गुंजापाठहिका२मता॥भार्यापाणिगृहीती२चटुकूलं

क्षीरकीटस्य २ मोदकस्य २ रंजनघोटकस्य २ बहुरोमयुक्तस्य २
(३६) पूगपत्रस्य २ कबंधस्य २ चित्रलेखिन्याः २ आलस्यस्य २(
३७) पात्रस्य २ नलराज्ञः २ गौरवस्य २ पथिकश्रेण्याः २ (३८) यामि
कस्त्रियाः २ जृंभायाः २ महाधूर्त्तस्य ३ निर्माल्यस्य २ (३९) गांजेतिप्र
सिद्धस्य २ गुलुंचस्य २ वासगृहस्य २ हस्तिपकस्य २ (४०) पित्तस्य
३ अंत्रस्य ४ तृष्टेः ३ क्षुधायाः ३ (४१) जलवसंतास्यव्रणस्य २ कुं
भीरमक्षिकायाः २ पोतस्य ३ नौकाजलोत्सारकस्य २ (४२) बृह
त्तटक्काया: २ मृदंगस्य २ अरिष्टस्य २ तुलाधटस्य २ (४३) पश्चात्तुर्यां
शस्य १ ज्वलदंगारस्य १ स्वभावस्य २ वेश्यायाः २ (४४) नीलमणेः
२ गुंजायाः २ भार्यायाः २ (४५)

क्षौम २मुच्यते॥४५॥ग्रंथस्यनिर्मितौशय्या १वधूटीवधुटीजनी॥
२॥वेंदिचोरोमांचलः२स्यात्कुंभिलःसंधिहारकः॥२॥४६॥अभ्रमु १
स्त्वभ्रनागस्यकुमुदस्यतुपिंगला॥१॥अनंगा १वामनस्यस्यादंजन
स्यांजनावति॥१॥४७॥कपिलापुंडरीकस्यानुपमा १क्षुप्रतीकस्य॥शेष
स्यताम्रकर्णी १चक्षुभ्रदंती १सार्वभौमस्य ४८॥सेवाचाटूक्तिरालोको
२मठोगंत्रीरथः२स्मृतः॥चिपिटोधान्यचमसः२रवानिकोलाजउच्यु
षैः॥४९॥अभ्यासोगुणनीयः२स्यान्नादिःपन्नशिरा२मता॥भौतोदेव
लकः ख्यातःखेटकंवस्फनंदके॥२॥५०॥पुरंदरातुस्फरला२कावेरी
चार्द्रजान्हवी॥२॥कौमुदःकार्तिकोमासः२सोभिकस्त्विंद्रजालि
कः॥२॥५१॥प्रहेलकंवाचनकं२वीप्सापन्नःसविस्मयः॥२॥कुटल
पटलंनीव्रं३वीथीगृहतटी२मता॥५२॥सर्वंवेशीनटःप्रोक्तो२मं
दाक्षेतुनटांतिका॥२॥मृत्फलीकुठिकः२प्रोक्तःशालूरोवृष्टिभूःपुवः
३॥५३॥स्वेदःसिम्रस्तनुरस३स्त्वक्सुषंतुस्वंगकुरः२॥नवोढानव
वारिका२दिकूरीनवयौवना॥५४॥सौवर्चलेचरुचकं२हिंगुलेरक्त
पारदम्॥२॥रक्तोपलंगैरिकेच २पारदेसूतकं २विदुः॥५५॥साभूकः

पट्टवस्त्रस्य २(४५) ग्रंथनिर्माणस्य १ नवीनस्नुषायाः २ वेंदिचोरस्य २
संधिहारकस्य २(४६) ऐरावतदिग्गजपत्न्याः १ कुमुददिग्गजपत्न्याः
१ वामनदिग्गजस्त्रियः १अंजनदिग्गजस्त्रियः १(४७) पुंडरीकदिग्गज
स्त्रियः १ क्षुप्रतीकदिग्गजस्त्रियः १ पुष्पदंतदिग्गजपत्न्याः १ सार्वभौम
दिग्गजपत्न्याः १(४८) सेवनस्य १ शकटस्य २ चिपिटस्य २ लाजानां ३
(४९) अभ्यासस्य २ पन्नगंगस्य २ भूतसेवकस्य २ धनहृद्दिजीवकस्य
२(५०) गंगायाः २ कावेर्याः २ कार्तिकमासस्य २ इंद्रजालिकस्य २(५१)
महेलिकायाः २ विस्मितस्य २ समूहस्य ३ वीथ्याः २(५२) नटस्य २ लज्जायाः
२ कुष्ठारव्योषधस्य २ श्लोकस्य १(५३) स्वेदस्य २ रोमांचस्य २ नवोढायाः २
नवयौवनायाः ३(५४) सौवर्चललवणस्य २ हिंगुलस्य २ गैरिकस्य २ पारदस्य २(५५)

कंबलः१व्रणस्तुकटकः२स्यादीर्ष्यायुक्तः३॥ कपटः पारिहार्यःस्या२दीर्ष्यालुः कुहनः२स्मृतः॥५६॥ऋणमोक्षेविगणनं२लग्नकेऋणमार्गणः॥२॥भिक्षाशित्वंतुपेशून्यं२मंडःपिच्छोधसंस्तथा॥५७॥धातुकेतुःक्षितिकणःस्यादास्फालेझलज्झला॥१३॥नष्टाप्तिसूत्रेलोप्तंस्याद्याप्ययानंशिबीरथः२॥५८॥मल्लयात्रामालुवीस्या२न्निर्भर्त्सनमलक्तकः॥२॥ कौशलिकाप्राभृतक२मट्टकंलासकं२विदुः॥५९॥स्वदोषाच्छादनंमक्ष२धूलीस्यान्मलकारिका॥२॥ वाताश्वोभूमिपक्षेःस्याद्वारुर्विजयकुंजरः॥२॥६०॥प्रभातेगोसगोसर्गा३वंजनीलेपकामिनी॥२॥उत्कटोगंडकुरूकमं२सिन्धुःसोमेधिकोमतः॥२॥६१॥हृषाकपिःशिरवीशुष्मा३भस्मपार्थटमर्घटम्॥३॥उष्ट्रवाहीमीरथोध्युष्ट्रो२गंत्रीलघ्वीद्विचेशरा३॥६२॥कृकणः कृमिरुद्दिष्टः२कृशत्कीटेऽन्यकारुका॥३॥भारवाहोभारिकःस्या२त्स्कंधचापीविहंगिका॥२॥६३॥उन्नतोऽजगरः२प्रोक्तोद्विमुखाहिरहीरणिः॥२॥पुरोटिःपुरसंस्कारे२हट्टीपुरतटी२मता॥६४॥मृणालिनीपुटकिनी२स्यासकोबुद्बुदो२भवेत्॥क

कंबलस्य २ व्रणस्य ३ कटकस्य २ ईर्ष्यायुक्तस्य २(५६) ऋणमोक्षस्य २ लग्नकस्य २ पैशून्यस्य २ मंडस्य २(५७) धूलेः २ आस्फालस्य २ चौरनीतद्रव्यस्यकिंचित्प्राप्तेः २ शिबीरथस्य २(५८) मल्लयात्रायाः २ निर्भर्त्सनस्य २ प्राभृतकस्य २ अट्टालिकायाः २(५९) स्वदोषाच्छादनस्य २ धुल्याः २ वाताश्वस्य २ विजयकुंजरस्य २(६०) प्रभातस्य ३ लेपकामिन्याः २ संजातमदस्य हस्तिनः २ सिन्धुस्य २(६१) अग्नेः ३ भस्मनः ३ उष्ट्रयुक्तरथस्य २ लघुरथस्य ३(६२) कृमेः २ विष्ठायाः २ भारवाहस्य २ वंशादिनिर्मितशिक्याधानस्य २(६३) अजगरसर्पस्य २ द्विमुखसर्पस्य २ पुरसंस्कारस्य २ क्षुद्रहट्टस्य २(६४) पुटकिन्याः २ बुद्बुदस्य २(६५)

लाची तु प्रकोष्ठः स्या २ हस्तपुच्छस्तु कन्युषं ॥ २ । ६५ ॥ उत्साहः सू
त्रतंतुः स्यात् पिंडीरो नीरसः २ स्मृतः ॥ हरिणत्वदयोः शीरुः २ संदे
शोक्तिस्तु वाचकं ॥ २ । ६६ ॥ शालाजिरो बर्हमानं २ कुसीदं तु कलंबि
का ॥ २ ॥ चर्वातलप्रहारः २ स्यात् कर्करं २ मुद्गरं विदुः ॥ ६७ ॥ गोष्ठागा
रेऽपि गंजः २ स्यान्मंत्रिता वेश्मनि दार्वटं ॥ २ ॥ मानग्रंथिर्भवेन्मंतु-
र्निष्कुटो गृहवाटिका ॥ २ । ६८ ॥ शेलस्य कटकेदंत २ स्तद्दिनं प्रतिघा
सरे ॥ २ ॥ सूत्रमेव सूत्रतंतुः २ कुशराऽपि तिलोदने ॥ २ । ६९ ॥ स्यादा
सवोपि कुरसः २ सरकं मद्यभाजने ॥ २ ॥ निश्चुक्कणं दंतशाणं २
गोग्रंथिः शल्कगोमये ॥ २ । ७० ॥ अष्टापदं नयपीठी २ नयस्तु जतुपु
त्रकः ॥ २ ॥ विदुतंत्रोभवेद्दक्षः पांचाली शालिभूरवला ॥ २ । ७१ ॥ प्र
स्तारस्तलिनं शय्या ३ रोमगुच्छः प्रकीर्णकं ॥ २ ॥ शिवालोपाशिको
ज्ञेया सरमातुंबरी भुनी ॥ ३ ॥ ७२ ॥ पादांगदी हंसकः २ स्यात् स्मृतिक
र्मप्रसाधने ॥ २ ॥ कर्णपाली तु कर्णोदू २ रंगुलीयकमूर्मिकाः २ । ७३
स्वातभूः प्रतिकूपः २ स्यात् लंभास्याद्वाटभूरवला ॥ २ ॥ कंधरा तोरणं
कंठी ३ सूत्रालीगलमेरवला ॥ २ । ७४ ॥ शासनं धर्मकीलः २ स्या

विस्तृतकरस्य २ हस्तपुच्छस्य २ (६५) उत्साहस्य २ रसशून्यस्य २ य
यशीलस्य २ संदेशवाक्यस्य २ (६६) शरावस्य २ कुसीदस्य २ त
लप्रहारस्य २ मुद्गरस्य २ (६७) गोष्ठागारस्य २ मंत्रणागृहस्य
२ अपराधस्य २ गृहवाटिकायाः २ (६८) शैलनितंबस्य २ प्रति
घासरस्य २ सूत्रस्य २ सतिलोदनस्य २ (६९) मदिराभेदस्य २ म
द्यभाजनस्य २ दंतशाणस्य २ शल्कगोमयस्य २ (७०) शारिफल
स्य २ गुटिकायाः २ पाशकस्य २ शारिभूस्वलायाः २ (७१) शय्या
यां ३ चामरस्य २ मृगाल्याः २ कुक्कुरस्त्रियः ३ नूपुरस्य २ (७२) वे
षस्य २ ताटंकस्य २ अंगुलीयकस्य २ (७३) परिखायाः २ वाटभूरव
लायाः २ कंठ्याः ३ गलसूत्रस्य २ राजशासनस्य २ (७५)

त्सकृतंभूद्दशासनं॥२॥पट्टोलिकाकुसकीला२सिंदुरंरक्तशासनं २।७५॥रासस्तुगोदुहांक्रीडा२गीतिःपारावती २तथा॥ वेणुर्यवफलोवंशो २नवीनेनवकालिका॥३।७६॥मुरवघंटादुलदुली २ नलाचीनलपट्टिका॥२॥नीपोधराकदंबःस्याद्वीरभद्रस्तुधीरणं॥२।७७॥रक्तदुरस्तुबृहत्काशं२कोशांगमिस्कटं२विदुः॥गंडीरस्तुसमंठैःस्याद्धीबेरंवारिवालकं॥२।७८॥शितोत्पलंगंधसोमं २हरिमंथोतिमुक्तकः॥२॥ कर्कारुकस्तुकालिंगः२शृंगाटोजलकंटकः॥२॥७९॥हिलमोचीजलब्रह्मी२वायसीकाकमाचिका २॥पुंनागःकेसरश्चैव २नांपेयोनागकेसरः३।८०॥स्याद्धोलिकाचहिंदोला २स्याद्वण्यंलवणं२मतं॥सुरवाशोराजतिमिषः२कटुकोराजसर्षपः२।८१॥सितमाषोराजमाषो२मसूरोव्रीहिःकांचनः२॥मधुक्षीरस्तुरवर्जूरः२शालःशंकुतरु२र्मतः॥८२॥मुस्तोराजकशेरुः२स्याद्रोहिणश्चंदनद्रुमः२॥ काकमाचुर्जलरंकः२कोयष्टिर्यलकुकुभः२॥८३॥वर्तिकाविष्णुलिंगी२स्याद्वनारुःशशकः२स्मृतः॥ताम्रकृमिरिंद्रगोपो२गृहगोधागृहा

भूदशासनस्य २ पट्टाख्यपत्रस्य २ रक्तशासनस्य २ (७५) गोप क्रीडायाः २ गोपशिशुगीतस्य २ वंशविशेषस्य ३ नवीनस्य २ (७६) मुरवाद्यस्य २ नलिपट्टिकायाः २ धराकदंबस्य २ वीरणस्य २ (७७) बृहत्काशस्य २ गोशांगस्य २ गंडीरस्य २ ह्रीबेरस्य २ (७८) सीतोत्पलस्य २ अतिमुक्तस्य २ कर्कारुकस्य २ शृंगाटस्य २ (७९) हिलमोच्याः २ काकमाच्याः २ पुन्नागस्य २ नागकेसरस्य २ (८०) हिंदोलिकायाः २ सौंदर्यस्य २ सुरवाशकस्य २ राजसर्षपस्य २ (८१) सितमाषस्य २ क्षुद्रमसूरस्य २ खर्जूरस्य २ सालवृक्षस्य २ (८२) मुस्तस्य २ रक्तचंदनस्य २ जलरंकस्य २ कारंडवपक्षिणः २ (८३) वर्तिकायाः २ शशस्य २ ताम्रकृमेः २ (८४)

लिका।२।८४॥ दिवांधोहरिनेत्रः२स्याद्भोनंदीलक्ष्मणा२मता॥ कुरंकुरःपुष्कराह्वो२वातुलिस्तरुतूलिका।२।८५॥ कोलपुच्छस्तकं कःस्याद्गर्गादोयोगनाविकः।२॥ ग्राम्यमद्गुरिकाशृंगी२राजशृंगस्तुसु द्गुरः॥२।८६॥ पंकग्राहस्तक्रमकरः२शफरःश्वेतकोलकः२॥ चिंगट स्तक्रमहाशल्कः२पोताधानंजलांडकं२।८७॥ फलकीतुचित्रफली२ मत्स्यराजस्तुरोहितः२॥ काकोचिकस्तुकाकोची२वकाचीवकचिं चिका॥२।८८॥ कवयीकक्षपृष्ठी२खलेशस्तुखलेशयः२॥ इल्लिशोराजशफर२इंचाकोजलवृश्चिकः२।८९॥ दंडपालोर्द्धशफरः२ कंकत्रोटोजलव्यथः२॥ लघुगर्गस्त्रिकंटःस्यात्सितांकोबालुकागड़ः॥२।९०॥ कनकपलःकुरुविंदः२करिकबलोविधानं२स्यात् ॥ब्राह्मीतुपंकगडकः२शकुलोदंडपालकः२।९१॥ निचोलकंनि चुलकं२मंदामणिरलिंजरः॥२॥ वेदिःस्थंडिलसितकंपल्याटो-निष्कुठः२स्मृतः॥ लोपासिकारिवेरिवरीस्यात्पल्याटोनिष्कुटः२स्मृतः॥ अंकेयेषांकमंगानि२स्मृतमुत्तानमुत्कटं२।९३॥ स्यान्मार्जिता रसाला२चचुक्कारःसिंहनादकः२॥ कर्णगूथंकर्णमलं२सिंहाणंना

मुशल्याः२।८४) पेनकस्य २ सारसयोषितः २ सारसस्य २ वातुलेः २ ।८५) कंकपक्षिणः २ गर्गादमत्स्यस्य २ शृंग्याः २ मुद्गरस्य २।८६) म कस्य २ शफरस्य २ चिंगटस्य २ रोहितादिशिशोः २।८७) फलक्याः २ रोहितस्य २ काकोचिकस्य २ वकचिंचिकायाः २।८८) कवयीमत्स्य स्य २ खलेशयस्य २ इल्लिशस्य २ जलवृश्चिकस्य २।८९) अर्धशफ रस्य २ जलव्यथस्य २ त्रिकंटस्य २ बालुकागडस्य २।९०) कनकप लस्य २ करिकबलस्य २ पंकगडकस्य २ शकुलस्य २।९१) निचो लस्य २ अलिंजरस्य २ वेद्याः २ उपवनस्य २।९२) रिवेरिवरिकायाः २ पल्याटस्य २ अंगस्य २ उत्तानशयस्य २।९३) नक्रस्य २ सिंह नादस्य २ कर्णमलस्य २।९४)

सिकामलं २।९४॥ दंतमलंपुष्पिका २स्यात्कुलकंरसनामलं २॥का
रंधमीधातुवादी २दरिद्रोदुर्विधः २स्मृतः॥९५॥स्यान्मंत्रगंडकोवि
द्या २त्पक्षद्वारंरवडक्किका।२॥आर्द्रवस्त्रंजलार्द्रःस्याद्दोषश्चादीन
वो २मतः॥९६॥योजनंमार्गधेनुः २स्यान्नल्वःकिंकुचतुःशतम् २॥
चोलकोवाणवारः २स्यात्कुर्पासस्त्वर्धचोलकः २।९७॥नागोदरमुर
स्त्राणं २जंघात्राणंतुमंक्षणं २॥स्याद्प्रासादोदेवकुलं २तत्तुचैत्यं २
विनामुखं॥९८॥तृणपूलीतुचंचा २स्याद्यथार्थंतुयथातथं २॥आ
घातनंवधस्थानं २कारांबंधनवेश्मनि।२।९९॥स्कंधाग्निःस्थूलका
ष्ठाग्नि २स्तृणाग्निस्तृणमेवसमः २॥इंगलस्तुकरीषाग्नि २र्ज्वराग्नि
स्त्वधिमन्यवः २।२००॥श्वश्रुरःस्वामिजनकः २साधुधीर्वरवत्सला
२॥भगसार्थस्तथाविद्धो २हेलावुकोऽश्वविक्रयी २।२०१॥गृहवि
त्तोगृहपति २स्तुंबीपुष्पंलतांबुजं २॥लोहिकारवरसोनिःस्यान्नि
लिंपस्त्रिदशः २स्मृतः २॥गंडूपदीभूलता २स्यान्मंडरीघुर्घुरी २म
ता॥स्वच्छट्यंगुलिसंदेशो २लंघनंचापतर्पणं २॥३॥गजदक्षा-
मदाम्नातः २शृंगारोगजमंडनं २॥प्रतिमोरणरंकः २स्यात्तंटकः

नासिकामलस्य २ (९४) दंतमलस्य २ जिह्वामलस्य २ स्वर्णकारस्य २ दरिद्रस्य २ (९५) विद्यायाः २ पक्षद्वारस्य २ आर्द्रवस्त्रस्य २ दोषस्य २ (९६) योजनस्य २ नल्वस्य २ कवचस्य २ कूर्पासस्य २ (९७) उरस्त्राणस्य २ जंघात्राणस्य २ देवप्रासादस्य २ यज्ञस्थानभेदस्य २ (९८) तृणपूल्याः २ यथार्थस्य २ वधस्थानस्य २ बंधनवेश्मनः २ (९९) काष्ठाग्नेः २ तृणाग्नेः २ करीषाग्नेः २ ज्वराग्नेः २ (२००) श्वश्रूरस्य २ श्वश्र्वाः २ कुटिलस्य २ अश्वविक्रयिणः २ (२०१) गृहपतेः २ तुंबीपुष्पस्य २ लोहपुष्पस्य २ त्रिदशस्य २ (२०२) भूलतायाः २ घुर्घुर्याः २ अंगुलिध्वनेः २ लंघनस्य २ (३) गजदक्षायाः २ गज शृंगारस्य २ रणकातरस्य २ (४)

कदरःभृणिः३।४॥ वीचीजलललताभृंडिः३फेणाग्रंबुबुदं२विदुः॥ जंबालोजलकल्कः२स्यादारणिःकुलहंडकः२॥५॥विनाघृतंविरहितं२गंडूषोमुखपूरणे२॥काष्ठमल्लःशवयानं२कषाय१स्तूबरोरसः॥६॥पर्वाधिःपरग्रंथिः२पिंजोलापत्रकाहला॥गोहलंछगलेगोधिट्३परियोद्वारकंटकः२॥७॥कर्करंचूर्णखंडे२स्यात्कर्कसारंकरंभकं२॥स्पर्धायामपिसंहर्षः२कठोरंकर्करं२विदुः८॥बंदीकवरकी२माहुरासंदीलघुरवट्टिका॥२॥घटराजःस्मृतःकुंभो२गर्गरीकलशोर्मता॥९॥विद्रधंजन्यमुत्पातं२निर्घातेज्यो मसुद्गरः२पर्यंतिकागुणाभ्रंशो२गागेष्टिकटशर्करा१०॥उल्काकुलुकगुंजा२स्याल्कुलक्कस्तालमर्दलः।२॥सूत्रकोणेडमरुकं२सूत्रवीणाचलाबुकी॥११॥मेलानंदोमसिमणि२र्लेखनीवर्णतूलिका॥२॥धातूपलःकठिनिका२मेलापत्रांजनंमसिः३॥१२॥तर्कुटीसूत्रलातर्कुः३शल्लोलस्तर्कुलासकः२॥वर्तुलातर्कुपाटीस्या२त्पिंजिकातूलनालिका॥२॥१३॥निर्वेष्टनंनाडिचीरंदग्धेष्टकास्याज्झावकं॥दोलाप्रेंखावपुमान्प्रेंखो२वारासनंवास्सदनम्॥१४॥पिष्टपर्णिस्तु

अंकुशस्य २९४) तरंगस्य २ फेनाग्रस्य २ जलकल्कस्य २ आरणेः २९५) विरहितस्य २ गंडूषस्य २ शवयानस्य २ कषायस्य २९६) अंगुलि पर्वणः २ पिंजोलायाः २ गोमयस्य २ हारलगुडस्य २९७) कर्करस्य २ दधिसक्तोः २ स्पर्धायाः २ कठोरस्य २९८) कवर्यायाः २ लघुरवट्टायाः २ कुंभस्य २ कलशस्याः २ ९९) उत्पातस्य २ निर्घातस्य २ गुणभ्रंशस्य २ कटशर्करायाः २९१००) उल्काग्नेः २ करतालस्याः २ डमरुकस्य २ सूत्रवीणायाः २९११) मसिमणेः २ कलमस्य २ धातूपलस्य २ मसेः २९१२) तर्कुट्याः २ तर्कुलासकस्य २ तर्कुपीठ्याः २ तूलनलिकायाः २९१३) निर्वेष्टनस्य २ दग्धेष्टकायाः २ दोलायाः २ जलस्थापित मंचस्य २९१४)

चमस २श्चित्रापूपश्चरुघ्नः २॥ म्लेंछितंपरभाषायां २ लुंटिकान्या असारिणी॥२॥१५॥ भूकापूर्तृस्तृणमणि २श्छात्रगंडःपदार्घवित्त॥ ३॥ कोशकारःकाष्ठतंतु २घुणःस्यात्काष्ठलंखकः॥२॥१६॥ विषशृंगोभृंगलोरो २वरोलस्तृणषट्पदः॥३॥ लुटुमोरंध्रबभ्रुः २स्याद्दीनालिंगालिका २स्मृता॥१७॥ विदारुककचेपादो २द्रुणश्चालिश्चवृश्चिकः॥३॥ पद्माक्षेपद्मबीजं २चकर्णिकाबीजमातृका॥२॥१८॥ रंगमाताभवेल्लाक्षा २धोलटिर्दुहितोमता॥ चादलोलश्चटुलो २जंगदोदोहदः २स्मृतः॥१९॥ धौतांजलीधौतबली २वज्रकंदुग्धपाचनम् २॥ चित्रोक्तिःपुष्पशकटी २चासेचनमतृप्तिकृत्॥२॥२०॥ कालरात्रिर्भीमरथी २अस्वाध्यायोनिराकृतिः २॥ ब्रह्मवादःश्रुतादानं २श्वकट्टुररवेदिकः॥१॥२१॥ हिंसालुकः१श्वादुकः२श्वायोगितोऽलर्क २इत्यपि॥ द्रगडस्तूर्यगंडः २स्यादादर्शोमुकुरः २स्मृतः॥२२॥ राहूत्सृष्टोरसोनः २स्याद्गंगरीकोलनासिका॥२॥ मयटःस्तृणहर्म्यः २स्यात्कुत्रगोमंचमंडपः॥२॥२३॥ स्रवद्गंगःपणग्रंथि २श्चितिकाकटिशृंखला॥२॥ विशारदःप्रसिद्धः २स्यात्श्रालक्ष्मीरिंदिरा ३मता॥२४॥

॥इतिपादावधिः॥

यज्ञपात्रविशेषस्य २ चित्रपिष्टकस्य २ अपशब्दस्य २ लुंटिकायाः २(२१५) तृणमणेः २ मदारघर्षितुः २ कोशकृमेः २ घुणस्य २(२१६) विषशृंगिनः २ तृणषट्पदस्य २ रंध्रबभ्रोः २ दीनायाः २(२१७) ककचपादस्य २ वृश्चिकस्य ३ पद्मबीजस्य २ पद्मकोशस्य २(२१८) लाक्षायाः २ दुहितुः २ सुचंचलस्य २ गर्भिण्यभिलाषस्य २(२१९) धौतांजल्याः २ दुग्धपाचनस्य २ क्षुद्रशकटस्य २ अतृप्तिकृतः २(२२०) कालरात्र्याः २ अस्वाध्यायस्य २ ब्रह्मवादस्य २ मृगयाकुशलशुनः २(२२१) हिंसालुकश्वनः २ उन्मत्तश्वनः २ सूर्पविशेषस्य २ आदर्शस्य २(२२२) लशुनस्य २ कोलनासिकायाः २ तृणच्छन्नहर्म्यस्य २ मस्यरक्षार्थकुटीरस्य २(२२३) पणग्रंथेः २ कटिशृंखलायाः २ प्रसिद्धस्य २ लक्ष्म्याः २(२२४)

प्राक्शालादृक्शब्दादर्धैःपादैरतःपरंशब्दाः॥नानार्थाअपिशब्देर्गज
शब्दात्प्रभृतिविज्ञेयाः॥२२५॥ ॥ ॥ ॥ ॥

अथनानार्थः

क्षीरंद्वारोगुडक्षोदेगुडेमधुनिचेष्यते॥कूपीटपानमिच्छंतिकेनिपाते
चवारिधौ॥२६॥रसालारसनायांस्यान्मथितेदध्निपाणिना॥पांचलोहे
श्रुतिकटःप्रायंचित्तेसरीसृपे॥२७॥विटोद्वेलवणेषिड्वेमूषिकेरबदरे
पिच॥वितंडाकरवीर्योंचदर्विवादप्रभेदयोः॥२८॥कारंडवेकरंडुःस्यान्म
धुकोषेदलादके॥रवदःश्लेष्मण्यंधकूपेप्रहारांतरदंकयोः॥२९॥पिच्छा
पूगच्छटाकोषेचोलिकाफणिलालयोः॥पिच्छलोस्फोटिकावात्यारामावा
तास्वपांशवः॥३०॥धरांकुरोवायुफलेनासीराशीकरेपिच॥कोट्टारोना
गरेकूपेपुष्करिण्यांचपाटके॥३१॥नागंजनानागयष्टिःकरिसुंदरिकाक्व
चित्॥पूत्यंडःपूतिकीटेचगंधकीठेचदृश्यते॥३२॥कटुकायांकेचनटेक
थितांशकुलादनी॥क्रौंचादनस्तुयेचुल्यांचिंचोटकमृणालयोः॥३३॥
संतानिकाक्षीरसरेतथामर्कटजालके॥रवड्गधेनुफलेफेनेपरांजस्तेल
यंत्रके॥३४॥भालांकोलोहितेदृष्टःकरपत्रेचकच्छपे॥संकरोग्निचटका
रेसंमार्जन्यपसारिते॥३५॥गोधाकलंविकादंतिवधूषुचकटंभरा॥पं
कारःशैवलेसेतोसोपानेजलकुल्यके॥३६॥पृष्ठभृंगीतिशब्दोयंदंश
भीरौपृथूदरे॥मेघपुष्पंतुनादेयेपिंडात्रेसलिलेविदुः॥३७॥पित्तज्व
रेकुलालस्यपवनेकूटपालकः॥स्तनवृंतेपिप्पलकंतथासीवनसू
त्रके॥३८॥पादलिकान्यमर्मज्ञेछात्रेस्यात्कालदेशिनि॥जिह्मापो द
षदंशेचस्यादिंद्रमहकर्मणि॥३९॥लाभेकामगुणेरूपेआमिषारव्या
तुभोजने॥छायापथेचदूर्वायांहरितालीध्वनिर्मतिः॥४०॥मालुधान
श्वित्रसर्पेमहापद्मेपिदृश्यते॥उन्मत्तेक्षपणेनर्थकरेकार्यपुटध्वनिः
॥४१॥सांघाटिकांविदुर्युग्मेकुट्टन्यांजलकंटके॥शराहतेचसर्पेचप्र
चलाकंप्रचक्षते॥४२॥चंद्रिकायामद्भधूलोरक्तांगेहरिचंदने॥स्त्री
रत्नेचहरिद्रायांलाक्षायांकुंकुमेनी॥४३॥कुकलासेचित्रकालेतू

णगोधाध्वनिंविदुः॥ डिंबभयेचकललेफुफुसेचभ्रचक्षते॥४४॥ धुंधुमारःशकगोपेगृहधूमेगृहालिके॥निक्तपर्वाहिलमोचीयुद्धे भमधुयष्टिषु॥४५॥जलबिल्वःककंटकेपंचांगेजलवल्कले॥चोलकी नागरंगेचकरीरेकिंकुपर्वणि॥४६॥कुलालचक्रेवाहनेदंडारःशरयंत्रके॥दिग्जयेवरयात्रायांदंड्यात्रांविदुर्बुधाः॥४७॥उष्ट्रेदासीसुतेचैवदासेरकइतिस्मृतः॥जलगुल्मोजलावर्त्तेकच्छपेजलचत्वरे॥४८॥काहलावेणुवीणादिध्वनिनानाध्वनिंविदुः॥ध्वयेंयेकारुंडिकायांचजाहकध्वनिरिष्यते॥४९॥विद्यादुत्कलिकाशब्दमुत्कंठावचिवाचकं॥दृष्टिविषेसूचकेचहिंजिह्मःपरिकीर्तितः॥५०॥मदमत्तावि दग्धस्त्रीनर्तकीषुचवाणिनी॥रोमावलीमेघमालाकरदीषुचकालिका॥५१॥मंजुलोमधुरेकुंजेजलरंकेजलांचले॥अनुकंप्यस्तास्त्रीस्यात्तपस्वीचधृतव्रतः॥५२॥ ॥इतिनानार्थाध्यश्लोकावधिः॥ ॥शालावृकोकृपिश्वानोनिष्ठुरःकठिनेत्रपे॥छर्दनोलंबुषेनिंबेव्युष्टंकल्पेनथोषिते॥५३॥इक्षौकरीरेकोषांगेव्रणचिन्हेघुणेकिणः॥नर्मटंचंचुकेपिंगेछेकःषडंघ्रिवक्रयोः॥५४॥धाराटश्वानकेवाहेलंजःस्यात्संगुकच्छयोः॥नर्मटःखर्परेसूर्येगोकीलोसुशलेहले॥५५॥भुंडिरीवारुकूष्मांडोफाणिर्गुडकलंबयोः॥तंडुकःखंजनेफेनेलवाशिन्यांरवगांतरे॥५६॥गर्जेपिनागमातंगेविशेषस्तिलकेपिच॥निष्पावःसूर्यवातेपिसूत्रकंठोद्विजेपिच॥५७॥विदुश्चतिस्मृतोवेधाःपुरंदेहेपिदृश्यते॥स्वरेपिकंठआख्यातःशरत्संवत्सरेपिच॥५८॥लाक्षापिजतुकाप्रोक्तालग्नाचार्योपिहिंडिकः॥नीलेचनेपिवारुंडःपादालिंदेपिपंकिलः॥५९॥कचोगीपतिपुत्रेपिकुंदंपिभ्रमरोवटौ॥भांडंभूषणमात्रेपिरुधिरंकुंकुमेपिच॥६०॥गोमेदकेपिगंगोलःकटाहोनिरयेपिच॥मरीचेपिभवेत्कृष्णःशूनांगगुणिकाभवेत्॥६१॥शरव्यामपिरत्नद्वधेनुर्निस्त्रिंशोऽकरुणेपिच॥स्कंधावारेऽपिकटकोबिंदुस्तत्त्वविदुरेपिच॥६२॥जलसूचिर्जलौकायां

वेश्यायामपिपिंगला॥ अहिरप्युदगवर्तेनिशास्वापिरवनिर्विकः ६३॥ भ्रमरः कामुकपिस्यादंगारेपिचाधमे॥ महालयेपितीर्थेस्या द्भोजनेपितथान्हिके॥६४॥ बालश्चामरदेपिस्यादपीतरपिपादपः॥ गोदंतोहरितालेपिवार्तारश्चित्रकेपिच॥६५॥आधारेप्याश्रयःप्रोक्तो गजसंघेप्यवग्रहः॥कथितासाजटायांचमार्गणेपिमृगःक्वचित॥६६ ॥मूषिकापिभवेद्वीनाजटादंकोहरेपिच॥अश्रमक्लमेपिस्फाटंमृद्वं डेप्यृष्टिकाभवेत्॥६७॥अंगसादेपिसदनंवनदानेपिझिंझिमः॥ दंतमांसेपिवेलास्याच्छल्कंनारीधनेपिच॥६८॥निंबेपिहिंगुनिर्यासेमेलानंदेपिचार्दलं॥लेखन्यांकर्णिकापिस्यात्कटिन्यामपिवर्णिका॥६९॥पटलेपिकासमर्दोदिष्टंदेवेपिकीर्तितं॥दाडिमेपिचहिंडीरवंशोवेणोकुलेपिच॥२७०॥ ॥इतिनानार्थः॥ ॥ काव्यादीनामनंतत्वाच्छब्दादीनांविशेषतः॥ कःकदाकेनकिंदृष्टमितिकोवेदितुंक्षमः॥७१॥अतःशब्दःकृदृष्टोयमर्थतश्चापिकीदृशः॥ इतिकाव्यमलीकंस्यान्मात्सर्यमलिनात्मनां॥७२॥शब्दार्णवेऽत्पलिनी संसारावर्तइत्यपि॥कोषावाचस्पतिव्याडिधिक्कमादित्यनिर्मिताः॥७३॥आ दायसारमेतेषामन्येषांचविशेषतः॥हारावलीनिर्मितेयंमयाद्वादशवत्सरैः॥ ७४॥उपास्यसर्वज्ञमनंतमीशंभूत्वातिथिःश्रीधृतिसिंहवाचां॥ हारावलीद्वादशमासमानैर्विनिर्मितेयंपुरुषोत्तमेन॥७५॥नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृतिज्योतिःशास्त्रगजाश्वमानवभिषक्कोषान्वयत्रादिकं॥दृष्ट्वान्यानिचशास्त्रिकैःसहकृताहारावली यत्नतः कर्तव्योवनसंशयःसुमनसःशब्दार्थलिंगेष्वपि॥७६॥सुधियाजनमेजयेनयत्नाद्धृतिसिंहेनसभांनिरूपितेयम्॥विदितोवदुदृश्वभिःकवींद्रैर्भुविकोषानुमनःश्रमोमदीयः॥७७॥हित्वामहाशाब्दिकतांमिमानंमात्सर्यमन्यत्रसुदुर्निधाय॥हारावलींयःप्रकरोतिकंठेविदग्धगोष्ठीषुपरंसभाजि॥७८॥ ॥२७८॥ ॥इतिश्रीमहामहोपाध्यायपुरुषोत्तमदेवप्रणीताहारावलीपर्यवसिता॥ समाप्ता-